Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

॥ श्रीउपदेशचिंतामणिः भाग ४ ॥

(कर्त्ता श्रीजयशेखरसूरिः)

छपावी प्रसिद्ध करनार

पंडित श्रावक हीरालाल हंसराज. (जामनगरवाळा)

वीरसंवत् २४४८, विक्रमसं० १९७८, सने १९२२.

किंमत—रु. २-८-०

श्री जैनभास्करोदय प्रिन्टिंग प्रेस—जामनगर.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुन्यो नमः ॥

॥ अथ श्रीउपदेशचिंतामणिः सटीकः प्रारभ्यते ॥

(कर्ता जयशेखरसूरिः)

(चतुर्थो नागः)

बपावी प्रसिद्ध करनार—पंमित श्रावक हीरालाल हंसराज (जामनगरवाळा)

अथ चतुर्थः सर्वविरत्यधिकारः प्रस्तूयते, तस्य च पूर्वेण सह संबंधगर्ना प्रस्तावनामाह— ॥ मूलम् ॥ इइ देसेणं विरई। भणिया इत्तोवि होइ कमणिज्जा ॥ नवाणं सव्वविरई। सरलो मग्गो सिवपुरस्स ॥ १ ॥ व्याख्या—इति पूर्वोक्तरीत्या नणिता प्रतिपादिता मया देशेन विरतिः, इतोऽस्या देशविरतेरपि सर्वविरतिर्नव्यानामासन्नमोक्षाणां कमनीया स्पृहणीया नवति, यत इयासितस्यानंतसुखास्पदस्य शिवपुरस्य सरल रुजुः पंथाः, यथा हि

For Private and Personal Use Only

सर्वविरतास्तद्भावेऽपि मोक्षं व्रजंति, न तथा देशविरतास्तेषां नवांतरेणैव मोक्षाभिधानादि-
त्यनेन संबंधेनायमधिकारः प्रस्तूयते; अथ सर्वविरतिप्रतिपादिकां द्वारगाथामाह—

॥ मूलम् ॥ वेरग्गं चारित्ते । पडिवत्तिनाणविणयकिरियाउ ॥ संयमभेया मुणिगुण-दि-
णकिच्चफलाइं इह वुच्छं ॥ २ ॥ व्याख्या–न हि वैराग्यं विना सर्वविरतिरुपतिष्ठते, इति प्र-
थमं वैराग्यं, वैराग्ये सत्यपि कोऽपि परीषहादिभीरुतया दीक्षां न प्रपद्यते, ततश्चारित्रे चा-
रित्रविषये प्रतिपत्तिमंगीकारं, ततो यथोत्तरं प्राधान्येन ज्ञानविनयक्रियास्ततः संयमभेदान्
सप्तदश, ततो मुनिनां गुणान्, ततः साधोर्दिनकृत्यं, दिनभणनाद्रात्रिरपि ग्राह्या. ततः सु-
पालितायाः सर्वविरतेः फलमिह चतुर्थाधिकारे वक्ष्ये इति सर्वत्र योज्यं. तत्र पूर्वं वैराग्य-
स्वरूपमाह—

॥ मूलम् ॥ रोगेण व सोगेण व । दुक्खेण व जं जणाण उल्लसइ ॥ मग्गंति न वेरग्गं ।
तं विबुधा अप्पकालंति ॥ ३ ॥ व्याख्या–रोगेण वा कासश्वासादिना, शोकेन वा पुत्रवियो-
गजन्मना, दुःखेन वा वधबंधादिकेन हेतुना जनानां निर्विवेकानां यद्वैराग्यं, धिगमुं रोग-

शोकाद्यपायबहुलं संसारमसारमिति विमर्शात्मकमुल्लसति, तद्वैराग्यं विबुधा न मार्गयंति, न स्पृहयंति, सर्वविरत्यनर्हत्वात् सर्वविरत्यनर्हत्वं, तस्य कस्मादित्याह–'अल्पकालंति' अल्पकालावस्थायित्वात्; अल्पकालावस्थायित्वं च रोगादिहेतुनिवृत्तौ तस्यापि निवर्तनात्, अत एव नैतद्विबुधानां स्पृहणीयमिति. अथ सर्वविरतियोग्यं वैराग्यमाह—

॥ मूलम् ॥ सुहियस्स व दुहियस्स व । जं वेरग्गं जवे विवेएण ॥ पायं अपच्चवायं । तं चिय चारित्ततरुबीयं ॥ ४ ॥ व्याख्या–सुखितस्य वा दुःखितस्य वा जंतोर्यद्वैराग्यं विवेकेन सम्यक् तत्वावबोधेन हेतुभूतेन जवेत्, तदेवं वैराग्यं प्रायोऽप्रत्यपायमविनश्वरं विवेकमूलतया दुःखादेर्निवृत्तावपि तस्यानिवर्तनादत एवैतत्सम्यक्त्वमूलस्य प्रथमव्रतस्कंधस्य शेषव्रतशाखस्य प्रशमादिप्रशाखस्य सकलक्रियाकलापप्रवालस्य लब्धिकुसुमस्य मोक्षफलस्य चारित्रतरोरुपादकत्वाद्बीजमिव बीजं जवति. स्तुतिकारोऽप्याह–दुःखगर्भे मोहगर्भे । वैराग्ये निष्ठिताः परे ॥ ज्ञानगर्भं तु वैराग्यं । त्वय्येवायततां गतं ॥ १ ॥ प्रायोग्रहणं नंदिषेणादिषु व्यजिचारस्यापि दर्शनात्. ननु जवदुःखार्त्तस्य वैराग्यं सहेतुकत्वात्सुखिनः पुनरिष्टान् शब्दादिवि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षयानुपभुंजानस्य कथं तत्संभव इत्याह—

॥ मूलम् ॥ जे जे भावा संसार-कारणं हुंति रागवंताणं ॥ ते चेव विरत्ताणं । निव्वुइ-पहसाहगा भणिया ॥ ५ ॥ व्याख्या—ते ये भावा स्वजनांगधनादयः सरागया बुद्ध्या विचार्यमाणा रागवतां संसारकारणं भवंति त एव तावंतो भावा वैराग्यबुद्ध्या विचार्यमाणा विरक्तानां निवृत्तिपथस्य सम्यग्ज्ञानक्रियात्मकस्य साधका भणिता उक्ताः परमर्षिभिः, तथा चागमः—जे जत्तिया य भावा । भवस्स ते चेव तत्तिया मुक्खे ॥ गणणाइया पुणा । दुन्नि-वि लोगा भवे तुल्ला ॥ १ ॥ सोऽयं भावः—इह न किमपि वस्तुतः संसारस्य मोक्षस्य च हेतुमालंबते, राग वैराग्ययोरेव तत्कारणत्वात्, ततस्तस्मिन्नेव वस्तुनि यो ममत्वकारणं रागाध्यवसायः स संसारहेतुकः, यश्च मुमुक्षात्मको वैराग्याध्यवसायः स मोक्षहेतुकः. अथैकस्यैव वस्तुनः संसारमोक्षहेतुतां दृष्टांतपूर्वमाह—

॥ मूलम् ॥ जं भत्तं पाणं वा । सरसं आसाइऊण भक्खेइ ॥ तं मलमुत्तनिमित्तं—ति कस्स न जणेइ वेरग्गं ॥ ६ ॥ व्याख्या—यद्भक्तं शाल्यादि, पानकं वा सरसमास्वाद्य सद्यः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सरागो भोक्ता नृत्यति हर्षप्रकर्षभाग् भवति, तदेव भक्तं पानकं वा परिणामे मलमूत्रनिमित्तमिति बुद्ध्या चिंत्यमानं कस्य मुमुक्षोर्वैराग्यं न जनयति? अपि तु जनयत्येव. तदेवमेकस्य भक्तस्य पानकस्य वा सरसतया मलमूत्रादिनिमित्ततया च विचार्यमाणस्य यथा रागवैराग्यहेतुता दर्शिता तथा सर्वेष्वपि वस्तुषु भावनीया. एतदेवाह—

॥ मूलम् ॥—जेण अलंकारेणं । अलंकिउ होइ रमणीमणइट्ठो ॥ सोवि परमत्थनासत्तिकस्स न जणेइ वेरग्गं ॥ ७ ॥ पासंतो फासंतो । जं रमणिं मन्नए महासुक्खं ॥ सावि कूरी कूराणं—ति कस्स न जणेइ वेरग्गं ॥ ८ ॥ द्व्वस्स जस्स कज्जे । नियए पाणे गणेइ तिणरूवे ॥ सोवि खणदिट्ठनट्ठो—त्ति कस्स न जणेइ वेरग्गं ॥ ९ ॥ जं पालियरज्जसिरिं । मन्नइ अमरेसरं व अप्पाणं ॥ स नरयगइनिमित्तं—ति कस्स न जणेइ वेरग्गं ॥ १० ॥ व्याख्या—चतस्रोऽपि गतार्थाः.

॥ मूलम् ॥— एवं सव्वे भावे । भावेमाणे विरत्तिहेउहिं ॥ को नायरिज्ज कुसलो । परिणामे सुंदरं चरणं ॥ ११ ॥ व्याख्या—एवमुक्तया दिशा सर्वानुक्तव्यतिरिक्तानपि भावान् परि-

For Private and Personal Use Only

णामविरसत्वाद्विरक्तिजनकैर्हेतुन्निर्नावयन् कः कुशलश्चरणं चारित्रं नाद्रियेत? अपि त्वाद्रियेतैवेति द्वितीयद्वारपरामर्शः. ननु सर्वन्नावांतःपातित्वेन चारित्रमपि परिणामविरसं नविष्यतीत्याह—परिणामे आयतौ वक्ष्यमाणरीत्या सुंदरं प्रधानं, अयमर्थः—इह सर्वेऽपि संसारिकाः शोन्नना न्नावा मुखमधुरतया किंपाकफलवदज्ञानानां रागं जनयंति परिणामदारुणत्वाच्च सज्ञानानां वैराग्यमिति. चारित्रं पुनस्तथाविधौषधवदापातकटुकमपि परिणतौ गुणकारकत्वात्कुशलानां कमनीयतामेव धत्ते. परिणामसुंदरत्वमेवाह—

॥ मूलम् ॥—नाणस्स लद्धीण य होइ लंनो । जुगत्तमिंदाइय वंदणस्स ॥ पत्ते चरित्ते न नयं न चिंता । न पुत्तमित्ताइवियोगडुक्खं ॥ १२ ॥ व्याख्या—चारित्रे प्राप्ते ज्ञानानां मतिश्रुतादीनां लब्धीनां चामर्षौषध्यादीनां लान्नो नवति, तथेंद्रादीनां वंदनस्य योग्यत्वं जायते, कदापि कालदोषादिंद्रादयः साक्षादुपेत्य न वंदंते तथापि तद्वंदनयोग्यता चारित्रिणोऽस्त्येवोपरितनगुणस्थानवर्तित्वात्, तथा न राजचौरादिभ्यो नयं प्राडुर्नवति, अकिंचनत्वात्. कथमहं निर्वहिष्यामीति चिंताराक्षसी न चेतोग्रस्ते न्निक्षान्नोजित्वात्. न च पुत्र-

मित्रादिवियोगदुःखं वर्धते निःप्रतिबंधत्वात्. यदुक्तं–नो दुष्कर्मप्रयासो न कुयुवतिसुतस्वामिदुर्वाक्यदुःखं । राजादौ न प्रणामोऽशनवसनधनस्थानचिंता न चैव ॥ ज्ञानाप्तिर्लोकपूजा प्रशमसुखरसः प्रेत्य मोक्षाद्यवाप्तिः । श्रामण्येऽमी गुणाः स्युस्तदिह सुमतयः किं न यत्नं कुरुध्वं ॥ १ ॥ ततः किमित्याह—

॥ मूलम् ॥–जइ चिंतेइ सुहं ता । देवाणहियं दुहं तु जं किंपि ॥ तंपि सुहकारणं ता । उवयारेणं सुहं चेव ॥ १३ ॥ अतः कारणाद्यदि जीवः सद्बोधिसुधाधौतं विवेकलोचनमुद्घाट्य बाह्ये लोचने क्षणं निमील्य चिंतयति तदा चारित्रे प्राप्ते सुखं देवेभ्योऽधिकं वर्तते, अयं भावः—इह नारकाणां तिरश्चां च का चर्या दुःखमयत्वात्. मनुष्याणां पुनः—न श्रीर्मे विपुला वधूर्न च मता जाताथवा सूनवो । जाता वा न गुणास्पदं न च मुदं दत्ते कुटुंबं मम ॥ द्विष्टो भूमिपतिः खलाश्च कुदृशो देहं रुगार्त्तं सुतो–ह्याद्यं भूरिक्षणं तृणंति गृहिणां चेतांसि चिंता इमाः ॥ १ ॥ ततस्तेऽपि नात्र ग्राह्याः, देवाः पुनर्यद्यपि मुक्तरोगा इष्टावधि प्राप्तसमग्रभोगास्तथापि चिंतार्तिवियोगवत्त्वान्न वस्तुतस्तेऽपि सुखं लभंते. अतश्चारित्रिणां सुखं

देवेभ्योऽप्युत्कृष्टं चिंतादिरहितत्वात्, दुःखं तु यत्किमपि दृश्यते परिषहादिकं तदपि सुखका-रणत्वादुपचारेण सुखमेव भवति, चकारेण कार्यव्यपदेशः, यथा तंदुलान् वर्षति पर्जन्य इति. किंच—

॥ मूलम् ॥–कम्मगिरिगरिम असणी । भवरोगाणोसहिव्व निम्महणी ॥ सिवनयरगमणविज्जा । एस चिय होइ पव्वज्जा ॥ १४ ॥ व्याख्या–कर्माण्येव दृढत्वाद्गिरयस्तेषां गरिम्णः प्रौढताया उच्छेदनेऽशनिर्वज्रं विशुद्धा, भवा नरनारकाद्यवतारास्त एव दुःखकरत्वाद्रोगास्तेषामौषधीव निर्मथनीकरणेन; शेषं स्पष्टं. अथास्य चारित्रस्य व्यक्तस्य फलं पुरो वक्ष्यते, अव्यक्तस्य त्वत्राह—

॥ मूलम् ॥–करवत्तदारणाइ–दारुणदुक्खं सहंति जस्स कए ॥ अव्वत्तंपि चरित्तं । जं रज्जं देइ जीवाणं ॥ १५ ॥ व्याख्या–करपत्रदारणमादिर्यस्य भृगुपाताग्निप्रवेशादेस्तत्करपत्रदारणादिकं दारुणमपि दुःखं सहंते मिथ्यादृश इति गम्यते, अव्यक्तं तथाविधबोधरहितमपि चारित्रं कर्तृ तद्राज्यं कर्मतापन्नं जीवेभ्यो ददाति. तथा च श्रूयते–पुरा प्रस्तुते दुर्भिक्षपूरे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बुभुक्षाक्षामकुक्षिः कश्चिद् द्रमकः साधूनां भिक्षाप्राचुर्यमालोक्य प्रवव्राज. स चैकदिवसं पालितव्रतो निशि सूचिकया विपद्य सद्यस्तत्प्रभावादवंत्यां संप्रतिर्नाम नरपतिर्बभूव. इह केऽपि स्वजनस्नेहग्रहिलहृदया एवंविधामपि प्रव्रज्यांप्रत्यलसायंते तान्प्रत्याह—

॥ मूलम् ॥—तेसिं सयणाण कए । चइए को वच्छलं चरणलच्छिं ॥ जाण सिणेहो असुहो । अबहुठिइ विहरुणासीलो ॥ १६ ॥ व्याख्या—तेषां स्वजनानां कृते कः कृती वत्सलां सकलसुखदायित्वेन तात्विकस्नेहवतीं चरणलक्ष्मीं चारित्रश्रियं त्यजति? तेषां केषामित्याह—येषां स्नेहोऽशुभो दुर्गतिबंधनत्वात्. यदाहुः—अमित्तो मित्तवेसेण । कंठे घित्तूण रोयइ ॥ मा मित्ता सोहगं जाहि । दोवि गच्छामो दोगइं ॥ १ ॥ तथा अबहुस्थितिरल्पकालभाव्येकभविकत्वात्. उक्तं च—जहा संझाए रुक्खंमि । मिलंति विहगा बहू ॥ पंथिया पहिआवासे । जहा देसांतरागया ॥ १ ॥ पहासे जंति सव्वेवि । अन्नमन्नदिसंतरं ॥ एवं कुडुंबवासेवि । संगया बहवो जिया ॥ २ ॥ कस्सवि कोइ न इट्ठो । इक्कंचिय इठ्ठ अप्पणो कज्जं ॥ कज्जावक्खिया संसा—रियाण सव्वेवि संबंधा ॥ १७ ॥ व्याख्या—उत्तानार्थाः. अत्रांतरे कश्चिदाह—न

ह्यस्माकं स्वजनस्नेहश्चारित्रप्रतिबंधकः, किंत्वयमाहतो गृहव्यापारजारः कथमर्धपथे मुच्यत इति तंप्रत्याह—

॥ मूलम् ॥—हुंति हु एकघरस्सवि । वावारजरेण वावमा केवि ॥ तं न वहिउं न मुत्तुं । सित्थंव पिपीलिया सत्ता ॥ १७ ॥ व्याख्या—केऽप्यैदंयुगीना वराका एकस्यापि गृहस्य व्यापारजरेन व्यापृता व्यग्रा जवंति, ते च तं व्यापारजरं न वोढुं शक्ताः, कुटुंबस्येष्टावधिदानाक्रमत्वात्. न च मोक्तुमपि शक्ताः प्रतिबंधबहुलत्वात्, यथा पिपीलिकाः सिक्थं जक्तजरं प्राप्य जारवत्त्वान्न तद्वोढुं, लौल्यान्न तन्मोक्तुं शक्नुवंतीति. तर्हि पूर्वे जीवाः कीदृशा आसन्नित्याह—

॥ मूलम् ॥ अवरे वरवसहा इव । पढमं धरिउं समग्गधरणिधुरं ॥ पच्छा खणेण चइऊण । गहियदिक्खं गया मुक्खं ॥ १८ ॥ व्याख्या—सुगमा, नवरमपरे श्रीभरतसगरादयः. उक्तं वैराग्यं चरणप्रतिपत्तिश्चेति द्वारद्वयं. अथ ज्ञानद्वारं विवरिषुराह—

॥ मूलम् ॥ मोहखउवसमेणं । चरणे पत्ते समुज्जमसु नाणे ॥ जं अंकुसंव जप्पइ—गयस्स

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुणिणो मणगयस्स ॥ २० ॥ व्याख्या-स्पष्टा, नवरं जंति यद्‌ज्ञानं मुनेर्मनोगजस्योत्पथगतस्यांकुशवत्सन्मार्गानयनक्षममिति. अथ ज्ञानस्य मुख्यां चारित्रांगतामाह—

॥ मूलम् ॥—हियमहियं वा पढमं । जाणंति तउ समायरंति हियं ॥ तम्हा नाणाइत्तं । मुणीण सयलं अणुठाणं ॥ २१ ॥ व्याख्या—सुबोधा. अथ ज्ञानिनोऽज्ञानस्य च मिथो महदंतरमाह—

॥ मूलम् ॥—मणिपत्थराण पुस्सिम—कुहूण तह चक्कुमंतअंधाणं ॥ जा होइ इह विसेसो । सुच्चिय नाणीण इयराणं ॥ २२ ॥ व्याख्या—योजनिका सुगमा, नावार्थस्त्वयं—यथा मणिर्द्रव्यलक्षैरपि क्रीत्वा गृहमध्यमानीयते, प्रस्तरस्तु गृहमध्यस्थोऽपि बहिः क्षिप्यते, पूर्णिमा च पूर्णेंदुना दिनायितोद्योतेति सर्वेषामिष्टानिष्टा च तमोमयीत्यमावास्या चक्षुष्मांस्तु सर्ववस्तुस्तोमं स्वयं पश्यन् स्वतंत्रोंधश्च पदे पदे परतंत्र इति. तथा ज्ञानी सर्वेषामिष्टः स्वतंत्रश्च सर्वविचारेषु, इतरस्त्वनिष्टः परमुखप्रेक्षकश्च विचारावसरे इति. यद्यपि सत्क्रियः साधुः सर्वेषां मान्यो नवति तथापि ज्ञानाधिकत्वेन विशेषमाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ मूलम् ॥–पुप्फो ससिव्व फलिउं । तरुव्व जलपूरिउं तलावव्व ॥ सुअसंपुण्णो साहू । ज-
ण कस्स न वल्लहो होइ ॥ २३ ॥ व्याख्या–सुबोधा, ननु ज्ञानवंतोऽपि केचन प्रतिपतंतो दृ-
ष्टास्ततः किमनेन ज्ञानान्नियोगेनेत्याह—

॥ मूलम् ॥–जइ असुहकम्मवसउं । जाणंतो कहविलंघए मेरं ॥ न य सव्वहा विण-
स्सइ । तहावि आसाढभूइव्व ॥ २४ ॥ व्याख्या–स्पष्टा–, नवरं 'मेरंति' चारित्रमर्यादां,
न च सर्वथा विनश्यति कदाचिदात्मानं समुद्धरत्येवेति. भावार्थः कथानकगम्यस्तच्चेदं—

मगधेष्वस्ति विस्तार–सारं राजगृहं पुरं ॥ पृथिव्यां प्रथितोऽपासी–त्तत्सिंहरथपार्थिवः
॥ १ ॥ तत्रान्यदा समाजग्मुः । श्रीधर्मरुचिसूरयः ॥ तच्छिष्याः पर्यटन् मध्ये–नगरं भैक्षहे-
तवे ॥ २ ॥ तपःप्रभावसंपन्न–लब्धिः प्रतिगृहं भ्रमन् ॥ आषाढभूतिनामर्षि–र्विवेश नटसद्म
नि ॥ ३ ॥ तत्रैकं मोदकं प्राप्य । निर्गतः स व्यचिंतयत् ॥ अयं तावद्गुरोर्भावी । भ्रमभूः
क्लम एव मे ॥ ४ ॥ काणीकृत्य ततो नेत्रं । स तत्र प्राविशत्पुनः ॥ प्राप्यैकं मोदकं प्राग्व–
न्निर्गतः कृतकृत्यवत् ॥ ५ ॥ भवितायमुपाध्याय–स्येति कुब्जीबभूव सः ॥ प्रविष्टश्च नटा-

गारं । मोदकं प्राप्य निर्ययौ ॥ ६ ॥ अयं च मे सहायेन । साधुना किल नोद्यते ॥ लाला
एव मया घुंट्या-स्तटस्थेन विलोकनात् ॥ ७ ॥ इत्यशेषं परावर्त्य । रूपं वैक्रियशक्तितः ॥
नटौकः प्राविशत्साधु-रहो लोभविडंबना ॥ ८ ॥ गवाक्षस्थो नटः सर्व । तद्वीक्ष्याचिंतयन्मु-
दा ॥ उचितोऽस्माकमेवायं । कृत्राणामिव युद्धवित् ॥ ए ॥ लोला ह्यतीव लोलास्य । तथा
हि विवशाः सुखं ॥ पाठिना अपि बध्यन्ते । धीवरैरामिषार्थिनः ॥ १० ॥ अथैत्य मोदकैस्त-
स्य । नटः पात्रमपूरयत् ॥ नैक्षायात्र सदागच्छे-रिति प्रार्थयतेस्म तं ॥ ११ ॥ अभूद् बुभुक्षि-
तः शंकः । क्षेत्रद्वारं त्वपावृतं ॥ इति न्यायान्नटस्योकः । साधुर्नित्यमियाय सः ॥ १२ ॥ प्र-
विशन्ननिशं रिक्तः । पूर्णश्च परमोदकैः ॥ निरगच्छन्नटागारा-त्कूपादिव घटो मुनिः ॥ १३ ॥
रूपगंधध्वनिस्वाद-सौकुमार्यैरमोदयत् ॥ मोदकास्तस्य पंचापि । खानि स्मरशरा इव ॥१४॥
नटोऽन्यदा स्वनंदिन्या-वन्वशादिति सादरं ॥ वत्से सोऽयं युवा कोऽन्यो । युवाभ्यां जंगमो
निधिः ॥ १५ ॥ प्राक्कटाक्षास्ततो नर्म । ततो वक्रोक्तिसंगयः ॥ ताभ्यां मुनेर्मनो नेतुं । व्या-
पार्यत शनैः शनैः ॥ १६ ॥ क्रमाद्धैर्यधनं साधो-र्बालाभ्यामप्यलुंट्यत ॥ यद्वा नहि गृहाया-

तो । डुमोंषो बालयोरपि ॥ १७ ॥ तयोर्मृदुगिरोल्लोल-दृशोः सोऽप्यन्वरज्यत ॥ विश्रभ्य चाखिलान् जावां-स्तत्कृतान् बहुमन्यत ॥ १८ ॥ अन्यदा मोदकप्राप्तौ । निर्गच्छन्नटमंदिरात् ॥ क यास्यत्रैव तिष्ठेति । ताज्यामज्यर्थितो मुनिः ॥ १९ ॥ गुर्वायत्तोऽस्म्यहं तत्ता-ननुज्ञाप्य सुलोचने ॥ एवमेव करिष्यामी-त्युक्त्वा स स्वाश्रयं ययौ ॥ २० ॥ एवं मनसिजाक्रांत-मनसं मुनिसंसदि ॥ ज्ञात्वा कथंचिद्गुरवः । कृपार्द्रा इत्यबोधयन् ॥ २१ ॥ विद्वन् विचार-चक्षुष्मा-नपि किं भ्रशसे पथः ॥ श्रुतप्रदीपहस्तोऽपि । किं वा तमसि मज्जसि ॥ २२ ॥ नार्यस्ते हृदये धर्म-ध्यानधौते स्फुरंति किं ॥ तारा हि न विजृंभंते । व्योम्नि सूर्यांशुमालिनि ॥ २३ ॥ तत् श्रुतं तत्तपः सा च । क्रिया सा च कुलीनता ॥ नारीशरीरकस्यार्थे । वत्स सर्वं किमुज्झसि ॥ २४ ॥ चिरं चारित्रमापाद्य । किं खंमयसि सांप्रतं ॥ बाहुज्यामंबुधिं तीर्त्वा । को वा मज्जति गोष्पदे ॥ २५ ॥ इतो गुरुगिरश्चैता-श्चेतो बालामृदूक्तयः ॥ दोलारूढमिवाकार्षुः । क्षणं तस्य मुनेर्मनः ॥ २६ ॥ गुरूक्तीरथ निर्धूय । स्मरोत्तालश्चचाल सः ॥ कुंभो गंजीरवेदी किं । गणयत्यंकुशाहतीः ॥ २७ ॥ पृष्टदानं गुरोर्माभू-दितिपश्चान्मुखैः पदैः॥

निर्गछंति गणात्तस्मिन् । गुरुरूचे मुनीनिति ॥ २८ ॥ अस्य वैनयिकादस्मा-ज्ज्ञानीमः श्रमणा वयं ॥ अयं भ्रष्टोऽपि न चिरात् । समुध्धृत्य स्वमेष्यति ॥ २९ ॥ सोऽपि प्राप्तो नटस्यौकः । कन्यके परिणीयते ॥ विषयान् बुभुजे सारा-हारानिव बुभुक्षितः ॥ ३० ॥ प्रछन्नमनुशास्तिस्म । नटः स्वतनये इति ॥ अयं भाग्यवशाद्भाव-द्भवत्योरभवत्पतिः ॥ ३१ ॥ पुनर्वा वीक्ष्य दुर्वृत्तं । चित्तमस्य विरंक्ष्यति ॥ सावधानं कुलस्त्रीव-दाराध्यस्तदयं सदा ॥ ३२ ॥ यथा प्राक् श्रुतचारित्र-श्रीभ्यां सह चिखेल सः ॥ विषदाचारसाराभ्यां । नटीभ्यां च तदा तथा ॥ ३३ ॥ अन्यदा कर्तुमस्त्रीकं । नाट्यमाषाढभूतिना ॥ नटपेटकयुक्तेन । भूपास्थानमगम्यत ॥ ३४ ॥ बंधमोक्षादिव प्रीते । तदानीं तस्य वल्लभे ॥ मंक्षु मैरेयमानीया-पिबतां द्रढितारती ॥ ३५ ॥ जातिस्वभावः किल यस्य योऽस्ति । त्यजत्यसौ तन्न सुशिक्षितोऽपि ॥ नृत्ये नियुक्तापि चिरं बिडाली । श्रुत्वाखु शब्दं स्वलयं भनक्ति ॥ ३६ ॥ नाट्यावसरमप्राप्य । भूपात्कार्यांतराकुलात् ॥ क्षणेनैव न्यवर्तिष्ट । नटैः सह नटाग्रणीः ॥ ३७ ॥ आगतः स्वगृहं दृष्ट्वा । द्वाःपिधानं स शंकितः ॥ दृशं व्यापारयामास । कपाटच्छिद्रवर्त्मना ॥ ३८ ॥ अंतरै-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्लिष्टभ्रूताक्षे । इवासंबद्धभाषिके ॥ स मुक्तवसने स्रस्त-रसने वल्भने उभे ॥ ३९ ॥ तद्दुर्वृत्तं
तयोः साक्षा-द्वीक्ष्य दध्यौ स खिन्नधीः ॥ ईदृशीभिः पुरंध्रीभि-रंधिता त्रिजगत्यहो ॥ ४० ॥
यद्वाभून्मे स्वजिह्वैव । वैरिण्यागः किमेतयोः ॥ यः स्याद्गृहे लघुरसौ । वायुना नीयते बहिः
॥ ४१ ॥ दीक्षा हाहा मयाहारि । दुरापाप्यनयोः कृते ॥ पंकार्थमिव कस्तूरी । काचार्थमि-
व सन्मणिः ॥ ४२ ॥ गार्हस्थ्यं पंकिलं वीक्ष्य । शुक्लपक्षो विवेकिराट् ॥ स्वगर्भंप्रति सोऽचा-
ली-न्मराल इव मानसं ॥ ४३ ॥ दृशैव तस्य वैराग्यं । जानन् वातायनस्थितः ॥ उपेत्य
श्वसुरः स्वीये । तनये इत्यबोधयत् ॥ ४४ ॥ रे रे युष्मत्प्रमादेन । याति कल्पद्रुमो गृहात् ॥
यद्यस्ति कापि शक्तिस्त-दमुं वालयतं द्रुतं ॥ ४५ ॥ अथ ते धाविते सिंह्या-विव तं साधु-
कुंजरं ॥ रुध्ध्वो चतुर्विहायावां । निःपुत्रे यासि किं प्रिय ॥ ४६ ॥ पूर्वं स्वीकृत्य सद्वृत्त । किं
नौ त्यजसि संप्रति ॥ ग्रंथेष्वेव सुवृत्तानां । श्रिये स्यादात्तमुक्तकं ॥ ४७ ॥ विरक्तः सर्वथा-
स्मीति । तेनोक्ते ते अवोचतां ॥ यावज्जीवं जीवनार्हं । तद्देहि धनमावयोः ॥ ४८ ॥ एवं
स त्यक्तकामोऽपि । बालाभ्यां वालितो बलात् ॥ चकार राष्ट्रपालाख्यं । नवं भरतनाटकं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ४ए ॥ अविसंवादिनीं नर्तु-र्धीरवीरकुलोद्भवां ॥ स नाट्याहमियाचिष्ट । पात्रपंचशतीं नृ- पात् ॥ ५० ॥ प्राप्य तावंति पात्राणि । नाट्यकौतुकिनो नृपात् ॥ सोऽचिराद्ग्राहयामास । सर्वाज्ञिनयचातुरीं ॥ ५१ ॥ अथाग्रे भूपमाषाढो-ऽजिनिन्ये दिग्ज्यादिकं ॥ केवलोत्पादपर्यं- तं । चरितं जरतेशितुः ॥ ५२ ॥ तुष्टः क्षितिपतिस्तस्मै । धनमिच्छाधिकं ददौ ॥ तत्सर्वं स्व- गृहे प्रैषि । पत्न्योराषाढभूतिना ॥ ५३ ॥ स्वयं च चिकुराँल्लुंच-न्नैर्ग्रंथं वेषमादधत् ॥ निर- गान्निर्मितानंग-रंगजंगः सरंगतः ॥ ५४ ॥ नाट्यमेतन्निवर्तस्व । क यासीति नृपोदितः ॥ सो- ऽज्यधाद्देव यस्यैत-न्नाट्यं किं स न्यवर्तत ॥५५॥ मया जरतवन्नाट्य-मन्यथा नाटकं वृथा ॥ स ए- वमालपन्नेव । सह पात्रैर्गुरून् ययौ ॥ ५६ ॥ सम्यक्पात्राणि पात्राणि । कृत्वा तान्येव सूरि- जिः ॥ सोऽज्यनायि रसं शांतं । चित्रमव्यजिचारिणं ॥ ५७ ॥ आषाढभूतिः स्खलितव्रतोऽ- पि । लेजे पुनः सद्गुरुजिः ससूत्रः ॥ एतत्प्रजावादद्भुतमागमस्य । नश्येत्ससूत्रा न हि सू- चिकापि ॥ ५८ ॥ इति आषाढभूतिकथा समाप्ता ॥

अथ ज्ञानभेदानाह—

॥ मूलम् ॥–आभिणिबोहियमाइ। तं पंचविहं सुएण इह पगयं ॥ सेसाइं नाणाइं। न हि गुरुसिक्खं अविक्खंति ॥ २५ ॥ व्याख्या–तत् प्रस्तुतं ज्ञानमाभिनिबोधकादिकं पंचविधं भवति, तद्यथा–आभिनिबोधिकज्ञानं १, श्रुतज्ञानं २, अवधिज्ञानं ३, मनःपर्यवज्ञानं ४, केवलज्ञानं ५ चेति. तत्र अभीत्याभिमुख्ये, नीति नैयत्ये, ततो ग्रहणार्हवस्तुनामभिमुखो नियतः श्रोत्रादींद्रियैः प्रविभक्तो बोधोऽभिनिबोधः, स एवाभिनिबोधिकं, तच्च तद्ज्ञानं चाभिनिबोधिकज्ञानं. इंद्रियमनोनिमित्तो वस्त्ववबोधो मतिज्ञानमित्यर्थः. श्रवणं श्रुतं, आभिलापप्लावितार्थोपलब्धिविशेषस्तच्च तद्ज्ञानं च श्रुतज्ञानं २. अवधिर्मर्यादा रूपिद्रव्यात्मिका तेनावधिनाज्ञानं अवधिज्ञानं. इंद्रियमनोनिरपेक्ष आत्मनः साक्षाद्रूपिद्रव्यग्रहणात्मको बोधः संज्ञिभिर्जीवैः काययोगेन ३. मनोवर्गणाभ्यो गृहीतानि मनोयोगेन मनस्त्वेन परिणमितानि वस्तुचिंताहेतूनि द्रव्याणि मनांसीत्युच्यंते, तानि पर्येत्यवगछतीति मनःपर्यायं, तच्च तद्ज्ञानं च मनःपर्यायज्ञानं, मनुष्यक्षेत्रांतर्वर्तिसंज्ञिजीवचिंतितार्थप्रकटनपर

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इंद्रियमनोनिरपेक्ष आत्मनः साक्षात्प्रवृत्तो बोधः ४. केवलं संपूर्णज्ञेयग्राहित्वात् संपूर्णं, तच्च तद्ज्ञानं च केवलज्ञानं, रूप्यरूपिद्रव्यग्राहकमिति समासार्थः. व्यासार्थो महाजाष्याद्वसेयः. एवं ज्ञानपंचकमुपदर्श्य येन प्रस्तुतोपयोगस्तदाह–इह ज्ञानशिक्षणाधिकारे श्रुतेन श्रुतज्ञानेन प्रकृतं अधिकृतं तस्यैव गुरूपदेशार्हत्वात्, शेषज्ञानानां स्वावारककर्मक्षयक्षयोपशमाज्यां स्वत एव जायमानत्वादेतदेवाह–"सेसाइं नाणाइंति" उत्तरार्धं स्पष्टं. किं तत् श्रुतज्ञानमित्याह—

॥ मूलम् ॥–अंगपविठं तह अंग–बाहिरं तं सुयं जवे डुविहं ॥ अंगपविठं बारस–जेयं इयरं अणेगविहं ॥ २६ ॥ व्याख्या–तत्प्रकृतं श्रुतं द्विविधं जवति, तद्यथा–अंगप्रविष्टं अंगबाह्यं च, तत्र-पायडुगं जंघोरू–गायदुगऊं तु दोय बाहुय ॥ गीवा सीरं च पुरिसो । बारस अंगो सुयविसिठो ॥ १ ॥'

एवंविधेषु प्रवचनपुरुषस्यांगेषु प्रविष्टं व्यवस्थितमंगप्रविष्टं द्वादशजेदं, तथाहि–प्रवचनपुरुषस्य पादयुगं आचारांगसूत्रकृते, जंघाद्विकं स्थानसमवायौ, ऊरुद्विकं जगवतीज्ञाता-

For Private and Personal Use Only

धर्मकथांगे, गात्रद्धिकं पृष्टोदररूपं उपासकांतकृद्दशांगे, बाहुद्धिकं अनुत्तरोपपातिकदशाप्रश्नव्याकरणं च, ग्रीवा विपाकश्रुतं, शिरश्च दृष्टिवाद इति, इतरदंगबाह्यं आवश्यकोपांगप्रकीर्णकादिभेदादनेकविधं नानाप्रकारं. अत्रांगप्रविष्टांगबाह्यस्वरूपावबोधाय महाभाष्यगाथा यथा–गणहरथेरकयं वा । आएसामुक्कवागरणउं वा ॥ धुवचलविसेसणाउं । अंगाणंगेसु नाणत्तं ॥ १ ॥ अस्या अर्थः–यद्गणधरैर्गौतमादिभिः कृतं, यच्च आदेशेन 'उपन्नेइ' वेत्यादिपदत्रयरूपेण प्रथमपौरुष्यां निष्पन्नं, यद्ध्रुवं सर्वदा सर्वतीर्थेषु भवति तदंगप्रविष्टं द्वादशांगीरूपं, यत्पुनः स्थविरैर्भद्रबाहादिभिः कृतं, यच्च गणधरैरपि मुत्कलव्याकरणरूपतया कृतं, यच्च चलं कदाचिद्भवति कदाचिन्न कस्यापि तीर्थे भवति, कस्यापि न तत्सूत्रमंगबाह्यं आवश्यकाद्यनेकविधमुच्यत इति.

ननु श्रुतज्ञानाभियोगरूपोऽयमुपदेशोऽशक्यानुष्टानः, सर्वस्य श्रुतस्य सागरस्येव सकलेनापि कालेनास्माभिर्दुरवगाहत्वादित्याह—

॥ मूलम् ॥–अत्थउ सुत्तं समग्गं । एगंपि पयं अमोहमाहंसु ॥ एगपएणं पत्तो । चि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लाइपुत्तो सहस्सारं ॥ २७ ॥ व्याख्या–अस्तु दूरे समग्रं श्रुतं, एकमपि पदं पद्यचतुर्थांशरूपं जावतो विचार्यमाणं सदमोघं महाफलमाहुर्महर्षयः. उत्तरार्धं स्पष्टं, जावार्थः कथानकगम्यः, अथ चिलातिपुत्रकथा–

क्षितिप्रतिष्टितपुरे । यज्ञदेवोऽजवद् द्विजः ॥ निर्जित्य वादे श्रमणै–र्जैनद्वेषी स दीक्षितः ॥ १ ॥ व्रतं स्वादं ददौ तस्या–धीयानस्य शनैः शनैः ॥ रसायनोपयुक्तस्य । मिष्टाशनमिवारुचेः ॥ २ ॥ परं मुनीनामस्नानं । प्राक्संस्कारान्निनिंद सः ॥ तेन हीनकुलोत्पाद्–वेद्यं कर्म बबंध च ॥ ३ ॥ जिक्षार्थमन्यदा ज्राम्य–न्निजं धाम जगाम सः ॥ तत्पत्नी तं वशीकर्तुं । जक्कांतः कार्मणं ददौ ॥ ४ ॥ स ऋषिर्विषयास्वाद्–विमुखः कार्मणात्ततः ॥ क्षणे क्षणे क्षीयमाणः । समये प्राप पंचतां ॥ ५ ॥ स्वर्गे गते मुनौ तस्मिन् । ब्राह्मणी स्वं पुनः पुनः ॥ निनिंद तादृशप्रेयः–साधुघातमलीमसं ॥ ६ ॥ ततश्चारित्रमादाय । सापि स्वर्गं गता रयात् ॥ जर्तारमित्युपालब्धु–मिव यासि क्व मां विना ॥ ७ ॥ च्युत्वा देवजवाद्यज्ञ–देवो राजगृहे पुरे ॥ धनस्य श्रेष्टिनश्चेट्या–श्चिलायास्तनयोऽजवत् ॥ ८ ॥ चिलातीपुत्र इत्येवा–जिधानं तस्य

For Private and Personal Use Only

पप्रथे ॥ दासीतनुरुहो नाम–करणे कः कुतूहली ॥ ९ ॥ ब्राह्मणी तु च्युता स्वर्गा–द्भूर्ध्वे त-
नयपंचकात् ॥ धनस्य पत्न्यां भद्रायां । सुंसुमेति सुताऽभवत् ॥ १० ॥ नियुक्तः पालने त-
स्या–श्चैलातेयो धनेन सः ॥ चपलोऽभूत्स्वभावेन । प्रतिष्टा हि कुलोचिता ॥ ११ ॥ गृहजा-
तोऽप्यसौ दुष्टः । श्रेष्टिना निरवास्यत ॥ लुंपन् कचवरो गेह–शोभां किं नापनीयते ॥ १२ ॥
भ्राम्यन् सिंहगुहां पल्लीं । स प्राप्तस्तत्र नाहलैः ॥ निन्ये दुष्टोऽपि दुष्टत्वं । कुपथ्यैरिव दु-
र्ज्वरः ॥ १३ ॥ पल्लीपतौ मृते सर्वैः । स एव विदधेऽधिपः ॥ विषस्य क्रियते कार्य । किमन्येन
विषं विना ॥ १४ ॥ सुंसमा हंसमानभ्रि–भ्रमना यौवनं ययौ ॥ यदा तदा स पल्लीशः । प्रो-
चे निजपरिच्छदं ॥ १५ ॥ महाधनमलुंटित्वा । प्रीयेमहि कथं वयं ॥ महाद्रुममविध्वस्य ।
किं पूर्येत गजोदरं ॥ १६ ॥ तन्नो राजगृहं यामो । लुंटामो धनमंदिरं ॥ धनं वः सकलं भू-
यात् । तस्य पुत्री पुनर्मम ॥ १७ ॥ इति व्यवस्थामाधाय । चिलातीनंदनश्चलन् ॥ निन्ये
धनगृहं भिल्लान् । मर्मज्ञः खलु दुर्ग्रहः ॥ १८ ॥ विह्वानवसरे तेषु । मुष्णत्स्वपि धनं धनः
॥ गृहकोणे स्थितस्तूष्णीं । निःसंग इव सांगभूः ॥ १९ ॥ धनजीवितसर्वस्व–मित्रोपादाय

सुंसमां ॥ लोप्त्रहस्तैः सहस्तेनै–र्ववले स बलेश्वरः ॥ २० ॥ धनं वः सुंसमा मे स्ता–दित्यु-
दित्वा निमंत्रितैः ॥ सहारक्षैः सपुत्रस्त–मन्वधावद्धनोऽप्यथ ॥ २१ ॥ क्रदंतं तं बोधयद्भिः ।
शोधयद्भिः पदात्पदं ॥ आरक्षकैर्निरैक्ष्यंत । पुरतस्ते मलिम्लुचाः ॥ २२ ॥ आरक्षकेषु दृष्टे-
षु । दिवाकरकरेष्विव ॥ आशु नेशुस्तमोनाशं । लोप्त्रमुत्सृज्य तस्कराः ॥ २३ ॥ बालः पो-
लीमिवामुंचं–श्चैलातेयस्तु सुंसमां ॥ समारोप्य निजस्कंधे । प्रविवेश महाटवीं ॥ २४ ॥ न्य-
वर्तंत धनं प्राप्य । क्षणादारक्षका अपि ॥ सर्वो हि स्वार्थसंसिद्धौ । परकार्येष्वनादरी ॥२५॥
धनः पुनः स्वतनयैः । सह दुस्सहदोर्बलैः ॥ कन्यां कालमुखात्क्रष्टुं । चिलातीपुत्रमन्वगात्
॥ २६ ॥ स्वमेकाकिनमालोक्य । धनं चोरुपरिच्छदं ॥ खिन्नः खड्गेन पल्लीशः । सुंसमायाः
शिरोऽछिनत् ॥ २७ ॥ पतिघातकृतं कर्म । सैवं प्राप्यमवेदयत् ॥ तन्मूर्धानं करे कृत्वा । पि-
शाच इव सोऽचलत् ॥ २८ ॥ पुत्रीं वीक्ष्य धनोऽशीर्षां । लूनपद्मामिवाब्जिनीं ॥ अरोदीन्मु-
क्तसूत्कारं । रोदयन् विहगानपि ॥ २९ ॥ मावधिदेष नवतो–ऽपीत्युक्त्वा स कथंचन ॥ सु-
तानशमयज्जामि–स्नेहात्तमनुधाविनः ॥ ३० ॥ पुत्र्यास्तत्रैव संस्कार्य । वपुः सौवपुरंप्रति ॥

र्व्यावृत्तोऽश्रुनिरुद्धाक्षो । मार्गभ्रंशमवाप सः ॥ ३१ ॥ घोरकांतारचारेण । क्षुत्तृड्भ्यामपि पीडितः ॥ ज्ञापितः श्वापदैर्मध्यं–दिने दध्याविदं धनः ॥ ३२ ॥ क सा स्थितिर्निजावासे । क्वेयं वनविहारिता ॥ क पुत्र्या मरणं हंत । विधेः किंचिन्न दुर्घटं ॥ ३३ ॥ न नागैर्न च पुं-नागै–र्न धनैर्न च साधनैः ॥ न शक्त्या न च भक्त्या च । विधिरेष निगृह्यते ॥ ३४ ॥ आ-नयेदपि दुःप्रापं । सुप्रापमपि नाशयेत् ॥ साधयेदपि दुःसाध्यं । सुसाध्यमपि बाधयेत् ॥३५॥ जीवयेन्म्रियमाणं च । जीवंतमपि मारयेत् ॥ कुरुते कौतुकी केली–रेवं दैवेंद्रजालिकः ॥३६॥ युग्मं ॥ एवं विभावयन् श्रेष्ठी । प्राप्तवर्त्मा कथंचन ॥ गृहं गतो विधत्तेस्म । स्वपुत्र्या ऊर्ध्वदे-हिकं ॥ ३७ ॥ विरक्तो व्रतमादाय । श्रीवीरस्वामिसन्निधौ ॥ स दुस्तपं तपस्तप्त्वा । पूर्णा-युस्त्रिदिवं ययौ ॥ ३८ ॥ प्राग्भवप्रेमतः पश्यन् । पुरस्तत्सुंसुमामुखं ॥ अविज्ञातश्रमः पल्ली-शोऽपि याम्यां दिशं ययौ ॥ ३९ ॥ यत्रैकं साधुमालोक्य । कायोत्सर्गस्थितं पुरः ॥ नियत्या प्रेरितः खड्ग–मुद्गीर्येति जगाद सः ॥ ४० ॥ मम निर्मम धर्मस्य । मूलं स्वल्पाक्षरैर्वद ॥ मुनेऽमुनैव खड्गेन । नो चेत्त्वां करवै द्विधा ॥ ४१ ॥ यद्वक्ति तत्करोत्येव । क्रूराणामग्रणीरसौ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मत्तः पृच्छति धर्मं च । न तु मंत्रौषधादिकं ॥ ४२ ॥ बीजं कृष्णचतुर्वीवात्र । धर्मो विस्तारमा-
प्स्यति ॥ व्यचारयदिति ज्ञान-खानिर्मुनिमतल्लिका ॥ ४३ ॥ युग्मं ॥ कार्याः स्वहितकामेन ।
शमविवेकसंवराः ॥ इत्युदित्वा ययौ व्योम्ना । स चारणमुनिर्द्रुतं ॥ ४४ ॥ पुनः पुनः स्मर-
न्नंतः । साधूदितपदानि सः ॥ प्राग्भवप्रतिज्ञोल्लासा-च्चौरश्चक्रे विचारणाम् ॥ ४५ ॥ तावन्मु-
नीश्वरः पूर्वं । दिदेशोपशमं मम ॥ क्रोधादि निग्रहे स स्या-न्निग्रहीतश्च तैरहं ॥ ४६ ॥ अ-
ग्नौ हिममिवामुष्मि-न्नासन्ने स्यात्क्षमः किमु ॥ ध्यात्वेति सकृपोऽमुंच-त्कृपाणं स स्वपाणितः
॥ ४७ ॥ हस्तन्यस्तकनीमौले-र्विवेकोऽपि कुतो मम ॥ ध्यायन्निति स तत्याज । सुंसमायाः
शिरः करात् ॥ ४८ ॥ कुधान्निधाविनो मर्त्य-द्रुमायुः फलपातिनः ॥ कपेरिव क्व वाक्काय-म-
नोन्निर्मम संवरः ॥ ४९ ॥ विचार्येति चिलातीभू-र्निरुद्धसकलेंद्रियः ॥ तस्थौ प्रतिमया तत्र ।
सानुमानिव निश्चलः ॥ ५० ॥ तद्देहस्यास्रगार्द्रस्य । गंधेनाकारिता इव ॥ कोटिशः कीटि-
काः क्रूराः । समुद्भिन्निदिरे ज्ञुवम् ॥ ५१ ॥ पदोरधः समुद्भूता । रंध्रयित्वा पदद्वयम् ॥ गत्यं-
तरमनासाद्य । तास्तस्य विविशुर्वपुः ॥ ५२ ॥ नवश्रोत्रोऽपि देहोऽस्य । ताभिः श्रोत्रशताकु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लः ॥ दुष्कर्मनिर्गमायेव । निर्ममे निर्ममेशितुः ॥ ५३ ॥ प्रतिलोमाः स्वभावेन । प्रतिलोमाजि-
सारिकाः ॥ दध्यौ सखीधिया सोंग-पीलिकास्ताः पिपीलिकाः ॥ ५४ ॥ कालेन भूयसाऽव्यय-
मचिर ।तुत्रोटयंति याः ॥ मम दुष्कर्म किं तासु । द्वेषो वा प्रेम वोचितं ॥ ५५ ॥ आत्मन्न
त्वमशंकिष्टाः । परेषां खड्गघातने ॥ का शंका तेऽधुना क्षुद्रकीटिकावदनार्दने ॥ ५६ ॥
स एवं भावयन् यामै-र्विंशत्या धुतकल्मषः ॥ सर्वसहः सहस्रारं । सहसार सुरालयं ॥ ५७ ॥
एकं पदं साधुगिरा चिलाती-पुत्रस्तथाराधयतिस्म सम्यक् ॥ यथा स भुक्तत्रिदिवोपभोगो-
ऽचिरेण गंता पदमेकमेव ॥ ५८ ॥ ॥ इति चिलातीपुत्रकथा ॥

गतं ज्ञानद्वारं, अथ विनयद्वारमाह—

॥ मूलम् ॥—इच्छइ जइ सुपहाणं । नाणं ता आयरे सुगुरुविणयं ॥ विणएण विणा
विज्जा । न होइ जइ होइ न फलइ॥ २८ ॥—व्याख्या—हे साधो! यदि सुप्रधानं ज्ञानमिच्छ-
सि तदा गुरावाचार्ये, विनयत्यष्टप्रकारं कर्मेति विनयः शुश्रुषणौपचारिकभेदभिन्नो भक्तिविशे-
षस्तं गुरुविनयमाद्रियस्व ? तत्राद्यो यथा—सक्कारब्भुट्ठाणे । सच्चाणासणं अभिग्गहो तह य॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आसण अणुप्पयाणं । कियकम्मं अंजलिगहो य ॥ १ ॥ इंतस्सणुगच्छणया-ठियस्स तह पज्जुवासणा भणिया ॥ गच्छंताणुव्वयणं । एसो सुस्सुसणाविणओ ॥ २ ॥ द्वे अपि सुबोधे, उपचारिकविनयस्तु सप्तधा, तद्यथा-अब्भासत्थण छंदा-णुवत्तणं कयपडिकिई तह य॥ कारियनिमित्तकरणं । दुक्खत्तगवेसणा तह य ॥ १ ॥ तह देसकालजाणण । सव्वत्थेसु तह अणुमई भणिया ॥ उवयारिओ य विणओ । एसो भणिओ समासेणं ॥ २ ॥ व्याख्या-गुरो-रभ्यासे समीपे आसीतव्यं, गुरोश्छंदानुवर्तनं कार्यं, कृतप्रतिकृतिः, कृते भक्तादिनोपचारे प्रसन्ना गुरवः प्रतिकृतिं सूत्रार्थदानतः करिष्यंति, न नाम केवलं मम निर्जरैवेति चिंतनं. तथा कार्यं श्रुतप्रापणादिकं निमित्तं कृत्वा श्रुतं प्रापितोऽहमनेनेति हेतोरित्यर्थः, विशेषेण तस्य विनये वर्तितव्यमिति कार्यनिमित्तकरणं. दुःखार्त्ते गुरौ गवेषणं औषधादेः कार्यं, तथा देशकालज्ञानं अवसरज्ञता, सर्वार्थेष्वनुमतिरानुकूल्यं चेति. ननु विनयं विना विद्याध्ययने को दोष इत्याह-विनयेन विना विद्या तावन्न भवति, गुरोरप्रसन्नत्वात्, भवति वा प्रज्ञा-दिबलात्तथापि न फलति. तत्र विद्यायाः फलमिह लोके यशःपूजासत्कारादिकं, परलोके तु

For Private and Personal Use Only

सङ्गतिगमनं, एतद् द्वयमपि दुर्विनयाध्यायिनो न भवति, कूलवालकादिवत्. अथ विनयहीनस्य विद्या न स्यादिति यदुक्तं तद्व्यक्त्यंतरमाह—

॥ मूलम् ॥—जे अविणीया थद्धा । गारविया गुरुजणंमि मछरिणो ॥ न हु ते आलावस्सवि । जुग्गा किर सुत्तसारस्स ॥ २९ ॥ व्याख्या—ये अविनीताः पूर्वोक्तविनयरहिताः, स्तब्धा अनम्राः, तथा ऋद्धिरससातगौरवैर्वयमेव गुरव इति गर्विताः, गुरुजने च शिक्षां ददाने मत्सरिणः कलुषचित्ताः, ते शिष्या आलापस्यापि न योग्याः, गुरूणामिति गम्यते. तर्हि सूत्रसारस्य शास्त्ररहस्यस्य योग्यतायाः किमुच्यते? अथ व्यतिरेकमाह—

॥ मूलम् ॥—बहुमाणजुए बद्धा–यरंमि विणउंणए समप्पंति ॥ गुरुणोज्झत्ति सुसीसे । पिउव्व पुत्ते सुयनिहाणं ॥ ३० ॥ व्याख्या—स्पष्टा, नवरं बहुमान आंतरः प्रीतिविशेषः, आदरस्तु बाह्योऽभ्युत्थानासनादिः, यत्स्थानांगसूत्रं—चत्तारि कप्पंति वाइत्तए, तंजहा, विणिए, अविगइपडिबद्धे विउसवियपाहुडे अमाइत्ति ॥ अथ प्रसंगतो न केवलं शिष्य एव, किंतु गुरुरपि गुणवान् एवोपदेशार्हो भवतीति दृष्टांतेनाह—

॥ मूलम् ॥—अणुरूवो आयरिओ। अणुरूवो चेव होइ जइ सीसो ॥ ता उवएसो स-
हलो। जह मेहमुणिम्मि वीरस्स ॥ ३१ ॥ व्याख्या–यथाचार्यो गुरुः स्नेहसौभाग्यमृदुभाषि-
त्वादिभिर्गुणैरनुरूपोऽनुगुणः शिष्यस्य भवति, यदि शिष्योऽपि लज्जाभयविनयक्षांत्यादिभिर्गु-
णैर्गुरोरनुरूप एव भवति तदा उपदेशस्तत्त्वार्थकथनरूपः सफलः स्यात्, तुरगितुरगयोरानु-
रूप्ये समरसंरंभवत्. अत्र दृष्टांतमाह—यथा वीरस्य श्रीवर्धमानस्वामिन उपदेशो मेघमुनौ
सफलो जातः, गुरुशिष्ययोर्द्वयोरप्यनुरूपत्वात्. तत्कथा चैवम्—अथ मेघकुमारकथा—

अस्ति राजगृहं नाम। पुरं मगधमंडने ॥ यत्र राजगृहायंते। पुराणि श्रीमतामपि ॥१॥ लोकं-
पृणगुणश्रेणिः। श्रेणिकस्तत्र भूपतिः॥ लीनो यस्य मनोभृंगः। श्रीवीरचरणांबुजे ॥२॥ तस्या-
भयकुमारोऽभू–दादिमः पुत्रमंत्रिषु ॥ धिया येन जितो जीवो। निशि स्फुरति नो दिवा ॥ ३॥
राज्ञोऽनेकावरोधस्य। धारिणी दयितान्यदा ॥ सितं सप्तकरोत्सेधं। स्वप्ने सिंधुरमैक्षत ॥४॥
श्रुत्वा स्वप्नफलं पुत्रं। भर्तुर्गर्भं बभार सा॥ गर्भानुभावतस्तस्याः। कालेऽभूदिति दोहदः ॥५॥
सेचनं गजमारूढा! भृशं वर्षति वारिदे ॥ वैभारभूधराभ्यर्णे। ससखीका लभाम्यहं ॥ ६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अजिज्ञपन्न सा भर्तु-स्तमकालाब्ददोहदम् ॥ गरीयसोऽप्यसंभाव्य-याच्ञया लाघवं ध्रुवम् ॥ ७ ॥ दुर्बला दोहदाप्राप्त्या । पृष्टा भूपेन साग्रहम् ॥ सा स्वाभिप्रायमाचख्यौ । त्रपमाणा कथंचन ॥ ८ ॥ अथ पृथ्वीपतिर्दध्यौ । नायं पूर्येत दोहदः ॥ भूयसापि भुजस्थाम्ना । न धनैर्न च साधनैः ॥ ९ ॥ ततोऽभयकुमाराय । तत्स्वरूपं जगौ नृपः ॥ रविरेव कृते मूढे । जनेन स्मर्यते यतः ॥ १० ॥ कृताष्टमतपाः सोऽपि । निलीनो दर्भसंस्तरे ॥ सस्मार पौषधागार-स्थितः प्राक्संगतं सुरम् ॥ ११ ॥ तपसा रज्जुनेवाशु । समाकृष्टः समागतः ॥ सुरस्तस्य पुरः स्थित्वा । किं करोमीत्यवोचत ॥ १२ ॥ जानतापि स्वयं सर्वं । किमेतत्परिपृच्छ्यते ॥ तेनेत्युक्ते सुरश्चक्रे । व्योम्नि वारिदमंडलम् ॥ १३ ॥ वारिप्लुतधरां धौतां—वरां विस्तारिनिर्झराम् ॥ विधायाकस्मिकीं वृष्टिं । तिरोधत्त सुरोत्तमः ॥ १४ ॥ अथाभयेन विज्ञप्ता । धारिणी हर्षधारिणी ॥ सेचनं द्वीपमारुह्य । ययौ वैभारपर्वतम् ॥ १५ ॥ सरिदंभसि खेलित्वा । जलदेवीव तत्र सा ॥ निवृत्तात्मा निवृत्याशु । निजमंदिरमाययौ ॥ १६ ॥ सा काले सुषुवे पुत्रं । पित्रा कृतमहोत्सवम् ॥ दोहदानुगमान्मेघ-कुमार इति विश्रुतम् ॥ १७ ॥ स क्रमाद्रुदये चंद्र-स्येव

For Private and Personal Use Only

वार्धिरवर्धत ॥ पित्राष्टवर्षदेश्यश्च । पाठितः सकलाः कलाः ॥ १८ ॥ वयो मध्यममध्यास्य । सा-
रसौभाग्यभाग्यभूः ॥ राजवंश्याः कनीरष्टौ । पर्यणैषीन्महेन सः ॥ १९ ॥ स्वर्णकोटीरथाश्वेभ
-शय्यासिंहासनादिकान् ॥ लेभे पदार्थानष्टाष्ट । स वधूपाणिमोचने ॥ २० ॥ पितृप्रदत्तसौ-
धेषु । प्रियाभिः सह संततम् ॥ भोगान् पुरः स्फुरत्तूर्य-लयोऽभुंक्त स देववत् ॥ २१ ॥

अन्यदा समवासार्षी-त्तत्रापश्चिमतीर्थकृत् ॥ अंभोद इव निर्भिंदन् । पापतापं वचोऽमृतैः
॥ २२ ॥ तदैव केवलज्ञान-वंतं नंतुं जगद्गुरुं ॥ चेलुः पौराः पुरुश्रद्धाः । श्राद्धे भोक्तुं द्विजा
इव ॥ २३ ॥ मेघः स्वसौधमौलिस्थो । यातस्तानेकया दिशा ॥ वीक्ष्य पप्रच्छ सद्भृत्या-नूचु-
स्तेऽपि जिनागमं ॥ २४ ॥ अथ सद्रथमालंब्य । वेगवंतं जगत्प्रियः ॥ वैभारगिरिमानं च ।
मेघो मेघ इवानिलम् ॥ २५ ॥ मुक्त्वा रथं भृशं भक्ति-भारभुग्नशिरोधरः ॥ स त्रिःप्रदक्षि-
णीकृत्य । जिनराजमवंदत ॥ २६ ॥ शुश्रूषोत्कंठया सर्वान् । सभ्यानुन्मुखयन्नथ ॥ वाण्या
योजनयायिन्या । जिनेशो देशनां व्यधात् ॥ २७ ॥ विश्वेऽत्र विश्वेऽपि जनाः सुखेच्छाः । सु-
खं च मोक्षे विशदं वदंति ॥ तं गंतुकामा रथवद्भजध्वं । सद्ज्ञानसम्यक्त्वहयं चरित्रं ॥२८॥

पीत्वा जैनेश्वरीं वाचं । दृष्ट्वा च श्रेणिकात्मजं ॥ सन्यैर्मेघोऽत्र कः सम्य-गित्यंतः समसय्य-
त ॥ २९ ॥ प्राप्तशांतरसो मेघः । श्रीवीरक्षीरनीरधेः ॥ पितरौप्रति वाग्धाराः । सद्रूपा इत्यमुं-
चत ॥ ३० ॥ आगर्भवासात्पितरौ । युवाभ्यां पालितोऽस्म्यहं ॥ तन्मां जावारिजिः क्रांतं ।
न किं संप्रति रक्षतं ॥ ३१ ॥ तौ ततः प्रोचतुर्वत्स । त्रस्ता किं त्रायते परं ॥ नावाज्यां र-
क्ष्यते स्वात्मा । तेन्यस्त्वं रक्ष्यसे कथं ॥ ३२ ॥ मेघोऽवदद्यदि न वां । शक्तिस्तद्रक्षणे त-
तः ॥ आदिशतं येन वीर-स्वामिनं शरणं श्रये ॥ ३३ ॥ यद्धारयति दुर्वारं । वैरिवारं विना-
श्रमं ॥ ततो धत्ते महावीर । इत्याख्यां विदितामसौ ॥ ३४ ॥ जूत्वा श्रीवीरशिष्योऽहं । भा-
वारीन् यज्ञयाम्यथ ॥ पुत्रवत्सलयोर्वस्तु-वृत्या स युवयोर्गुणः ॥ ३५ ॥ वचसा तेन वज्रस्य ।
निर्घातेनेव पीमितौ ॥ आतुरौ प्रोचतुर्माता—पितरौ गद्गदध्वनी ॥ ३६ ॥ कुमार सुकुमार-
स्त्वं । व्रतं च क्रकचोपमं ॥ अनेन वपुषा वत्स । व्रतेच्छुर्ग्रहिलोऽसि किं ॥ ३७ ॥ सोऽवदद्या-
ति यो जंतु-र्नरकं दुरितेरितः ॥ दारुणाः सहते तत्र । सोमालोऽपि स वेदनाः ॥ ३८ ॥ सो-
ढाज्ञिरपि नो ताज्ञि-र्लाज्ञः कोऽपि चरीरिणां ॥ व्रतकष्टं पुनः स्वल्प-मपि सोढं शुजायति

॥ ३९ ॥ धारिण्यथ पृथक् स्माह । त्वं त्रैलोक्यप्रियोदयः ॥ वत्स मेघोऽपि मे घोरं । संतापं वितनोषि किं ॥ ४० ॥ तव दृष्टौ च ते सूनु–र्यदि संसारसंकटात् ॥ उन्मुच्यते ततो मातः। किं विषादो वृथा तव ॥ ४१ ॥ इत्याद्युक्तिबलात्तस्य । माता जाता निरुत्तरा ॥ एकाहं राज्यमादत्स्व । वत्सेति तमयाचत ॥ ४२ ॥ सोऽप्येकं दिवसं राज्यं । भेजे पित्रोः समाधये ॥ सारसंयमसाम्राज्ये । स्वं निवेश्य मनः पुनः ॥ ४३ ॥ द्वितीयेऽह्न्यथ भूजत्रा । निर्मापितमहोत्सवः ॥ दीक्षां श्रीवीरपादांते । दांतेभ्यः स्वीचकार सः ॥ ४४ ॥ दिनं समाधिनातीत्य । मेघः सर्वलघुर्निशि ॥ प्रस्तरे पादवत्सर्वा–धस्तात्प्रापदवस्थितिं ॥ ४५ ॥ स हंसतूलिकाशायी । सुप्तः केवलभूतले ॥ अस्पर्शि साधुसंघट्ट–भीतयेव न निद्रया ॥ ४६ ॥ वृषत्सखैस्तीक्ष्णनखै–र्घृष्यमाणो महात्मनां ॥ चरणैश्चरणोद्विग्न–मना एवं स दध्यिवान् ॥ ४७ ॥ आशा बलवती बद्ध–माशयैव जगत्त्रयं ॥ कुर्वत्याशावशा एव । मुनयोऽप्यादरं नृणां ॥ ४८ ॥ राज्यस्थं मामभी पूर्व–मालपन् मुनयो मुदा ॥ आत्तव्रतमिदानीं तु । दारयंति नखैर्यतः ॥ ४९ ॥ अनुभूतं व्रतं लब्धः । स्वादो भग्नो भ्रमश्च सः ॥ नमोऽस्तु तस्मै चारित्रा–याद्या यस्येदृशी निशा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ५० ॥ सोऽहं राजसिको युक्तं । पितृभ्यां वारितस्तदा ॥ सुखावहं कुठारेण । दारणं न पुनर्व्रतं ॥ ५१ ॥ क्षिपा यास्यति यद्येषा । तदा स्वं वेषमार्हतः ॥ समर्प्य राज्यसौख्यानि । पुनर्जोद्ये यथारुचि ॥ ५२ ॥ एवं तस्मिन्नपध्यानं । दधाने व्यगलन्निशा ॥ सोऽपि स्वोपधिमादाय । ययौ श्रीवीरसंनिधिं ॥ ५३ ॥ पराशयस्फुटीकार–क्रमकेवलसंविदा ॥ प्रविशन्नेव वीरेण । मृदुवाग्भिरभाणि सः ॥५४॥ क्षामपुण्यपरीणामः । समागछसि मेघ किं ॥ मा मुह प्राक्तनं जन्म । स्मर धीर सुधीरसि ॥ ५५ ॥ इतो भवे तृतीयेऽभू–रुपवैताढ्यभूधरं ॥ त्वं सुमेरुप्रनाख्योऽन्य–करिणां नीषणः करी ॥ ५६ ॥ सहस्रेजप्रजुः सोऽभूद् । ह्रस्तः सप्तकरोब्रूयः ॥ श्वेतो दशकरव्यासः । षोमनवकरायतः ॥ ५७ ॥ ग्रीष्मर्त्तावन्यदारण्ये । दहत्युग्रे दवानले ॥ त्यक्तयूथः स यूथेशः । पलायत दिशैकया ॥ ५८ ॥ नौमेष्मणा चरणयोः । पार्श्वयोर्दावहेतिभिः ॥ मौलौ रविकरैस्तप्तः । सोऽबाध्यत तृषा नृशं ॥ ५९ ॥ इतस्ततो भ्रमन्नीराशयाऽपश्यत्पुरः सरः ॥ अतिस्वछपरसं भूरि–पंकं लोकं कलात्रिव ॥ ६० ॥ जलध्यानाज्जलीनूतो । विशंस्तत्रापवर्त्मना ॥ निममज्जांतरा पंक–संकटे स जरी करी ॥ ६१ ॥ शुंमादंतादि-

For Private and Personal Use Only

उप चिं- भिर्देहा-वयवैर्दर्शयन् बलं ॥ तैरेव पंकनिर्मग्नैः । सोऽभूद्योगीव निश्चलः ॥ ६२ ॥ सरस्तदा
ता भा.४ तदायात-स्तोयेच्छुस्तद्विपुर्द्विपः ॥ जघान दंतशुंडाग्रैः । सुखं तं पंककीलितं ॥ ६३ ॥ तत्प्र-
८९१ हारव्यथाः सप्त । दिवसाननुभूय सः ॥ आयुः प्रपूर्य विंशत्या-धिकं वर्षशतं मृतः ॥ ६४ ॥
विंध्याटव्यां ततश्चाभू-दिभो मेरुप्रभाभिधः ॥ रक्तवर्णश्चतुर्दंतो । दंतिसप्तशतीपतिः ॥ ६५ ॥
अन्यदा वनदावाग्नि-दर्शनात् प्राग्भवं स्मरन् ॥ दवोपद्रवरक्षार्थ-मुपचक्राम सामजः ॥६६॥
पृथग् योजनविस्तार-मकार्षीन्मंडलत्रयं ॥ कालग्राहीव निर्ग्रंथो । भूमिशुद्धिं विधाय सः ॥
॥ ६७ ॥ आदिमध्यावसानेषु । वर्षर्तावुच्चखान सः ॥ तत्रोत्पन्नांस्तृणांकूराँ-श्लोचकारी कचा-
निव ॥ ६८ ॥ ज्येष्ठमासि पुनर्लग्ने । दववह्नौ स्वयूथयुक् ॥ दधावे सिंधुराधीशः । प्रति प्रथ-
ममंडलम् ॥ ६९ ॥ तावत्तन्मंडलं दाव-त्रस्तैः सिंहमृगादिभिः ॥ वन्यसत्वैः कणैः कोष्टा-गा-
रवत् परिपूर्यत ॥ ७० ॥ तत्रावकाशं सोऽप्रेक्ष्य । द्वितीयं मंडलं गतः ॥ तस्मिन्नप्यंगिभिः पू-
र्णे । तृतीये प्रविवेश सः ॥ ७१ ॥ तत्रापि जीवकोटीषु । निर्वैरासु स्थितासु सः ॥ ऊर्ध्वस्थो-
ऽराजत गजः । कायोत्सर्गी मुनिर्यथा ॥ ७२ ॥ कायकंडूमपाकर्तुं । तस्योत्क्षिप्तवतः क्रमं ॥

क्रमस्थाने शशः कोऽपि । निलिल्ये त्रासितः परैः ॥७३॥ तमधो वीक्ष्य संजात-करुणः करिणां
प्रभुः ॥ भवितव्यतया भाद्रि-भद्र एवं व्यभावयत् ॥ ७४ ॥ अयं दवाग्निना नुन्नः । प्रविष्ट
इहमंडले ॥ इहापि नुन्नः केनापि । लीनो मम पदे शशः ॥ ७५ ॥ मुंचाम्यधः स्वपादं चे-द्रू-
राकस्यास्य तद्ध्रुवं ॥ सर्वेऽपि कुपिता दैव-दवह्नीपिह्निपादयः ॥ ७६ ॥ न तस्मादादवप्लोषं ।
मया मोच्यः क्रमो भुवि ॥ अभिगृह्येति तस्थौ स । गणीव त्रिपदीस्थिरः ॥ ७७ ॥ तदा बद्ध-
मनुष्यायुः । शांतेऽह्नोभिस्त्रिभिर्दवे ॥ जंतुजातैः समं याते । शसे सोऽधः पदं ददौ ॥ ७८ ॥
पादमोक्षक्षणे भूमौ । पतितो गिरिवद्गजः ॥ अध्यासामास सद्बुध्ध्या । त्रिपादावस्थिति-
व्यथां ॥ ७९ ॥ विंशत्या प्रहरैस्त्यक्त-प्राणैर्यूथ्यैरिव द्विपैः ॥ भावादविच्युतः सोऽभू-न्मृत्वा
त्वं श्रेणिकांगजः ॥ ८० ॥ अज्ञातोऽपि तदा तिर्य-ग्भवे त्वं तादृशीं व्यथां ॥ कृपालुरतिति-
क्लिष्टाः । केयं ते मृदुताधुना ॥ ८१ ॥ बोधिं विनापि विहितः । शमस्तेऽभून्महाफलः ॥ रोषं
करोषि तत्किं भो । बोधेरधिगमेऽधुना ॥ ८२ ॥ पार्श्वधारासिधाराद्यैः । पीड्यंते केऽपि निर्दयैः
॥ मन्यस्व धन्यमात्मानं । स्पृष्टस्त्वं साधुभिः पदैः ॥ ८३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

इत्यर्हतो गिरा जाति-स्मरो जातत्रपाज्जरः ॥ श्रीवर्धमानमानम्य । मेघ एवं व्यजिज्ञपत्
॥ ७४ ॥ व्रतमार्गपरित्यागात् । पापकूपे निपातिनं ॥ स्ववाक्यरश्मिभिः स्वामि-न्नद्य त्वं मा-
मुदक्षिपः ॥ ७५ ॥ जावतस्त्यक्तदीक्षस्य । दीक्षादानात्प्रसीद मे ॥ इत्युक्ते तेन जगवां-स्त-
स्मै दीक्षां ददौ पुनः ॥ ७६ ॥ दृग्वर्जं सकलं देह-मृषिज्यः परिकल्प्य सः ॥ एकादशांग-
पारीणः । प्रजुमेवं व्यजिज्ञपत् ॥ ७७ ॥ अनधीतोऽपि पूर्वाणि । प्रजो जवदनुज्ञया ॥ इज्ञामि
संप्रति यति-प्रतिमाः परिसेवितुं ॥ ७८ ॥ प्रजुरप्रतिमल्लं तं । प्रतिमासु विचारयन् ॥ जजल्प
प्रतिमाकल्प-मित्याशाकल्पपादपः ॥ ७९ ॥ स्युः सप्त प्रतिमा एक-मासाद्या मासवृद्धितः ॥
सप्त रात्रिंदिवा तिस्रो-ऽहोरात्रिक्येकरात्रिकी ॥ ८० ॥ तत्राद्यप्रतिमायां स्या-डुपसर्गसहो मु-
निः ॥ अज्ञातोंछचरो जक्ते-पानेऽप्येकैकदत्तिकः ॥ ८१ ॥ अलिंदं स्वपदोरंतः । कृत्वा दात्री
ददाति चेत् ॥ एकगोचरकालोऽसौ । तद्भैक्ष्यं लाति नान्यथा ॥ ८२ ॥ ज्ञातो निशां वसत्ये-
का-मज्ञातस्तु निशाद्वयं ॥ अतः परं वसन् ग्रामे । स छेदपरिहारजाक् ॥ ८३ ॥ वृक्षे वि-
कटगेहे वा-रामे वा स च तिष्ठति ॥ निलये दह्यमानेऽपि । वह्निना न निरेति च ॥ ८४ ॥

आकर्षति पदादेष । न दृषत्कंटकादिकं ॥ निर्ममोऽपनयत्यक्ष्णो-र्न हि रेणुतृणाद्यपि ॥९५॥
समे वा विषमे वापि । यत्रास्तं याति भास्करः ॥ रात्रिमास्ते स तत्रैव । पुरः प्राप्तः प्रतिष्टते
॥ ९६ ॥ स न प्रक्षालयत्यंघ्रि-मात्रमप्युज्ज्वलो गुणैः ॥ सिंहाश्वादिष्वभियत्सु । धीरो नेर्यां
भिनत्ति च ॥ ९७ ॥ छायात आतपं तस्मा-च्छायां वा स न सर्पति ॥ प्रतिमां साधयत्याद्यां ।
मासं कष्टमिदं चरन् ॥ ९८ ॥ प्रतिमाः सप्तमीं याव-देवं ज्ञेयाः परा अपि ॥ तास्वेकैकोऽ-
धिको मासो । दत्तिश्च परिवर्धते ॥ ९९ ॥ सप्तरात्रिंदिवाप्येव-मष्टमी प्रतिमा भवेत् ॥ चतुर्थं
तु तपस्तत्र । नवरं स्यादपानकं ॥ १०० ॥ अंत्ये दिने बहिर्ग्रामा-द्बत्तदृक् प्रासुपुञ्जले ॥ ति-
ष्टत्युत्तानकः पार्श्व-वर्ती नैषद्यिकोऽथवा ॥ १ ॥ नवमी प्रतिमाप्येयं । दिनेंत्ये तूत्कटासनः ॥
स्थानं लगुडशायी वा । भजेद्दंडायतोऽपि वा ॥ २ ॥ एवं दशम्यपि परं । विशेषश्चासने स हि
॥ गोदोहिकासनी वीरा-सनी वा कुब्जकासनी ॥ ३ ॥ अहोरात्रप्रमाणैव-मेकादश्यपि केवलं
॥ कृतषष्टतपा ध्यानं । लंबमानभुजो भवेत् ॥ ४ ॥ द्वादशी प्रतिमाप्येक-रात्रिक्येवं पुनर्मु-
निः ॥ तस्यां कृताष्टमतपा । ईषत्प्राग्भारविग्रहः ॥ ५ ॥ एकपुद्गलदृग् मुक्त-निमेषः संवृते-

न्द्रियः ॥ लंबमानभुजस्तिष्ट–त्युत्कटाद्यासनोऽपि वा ॥ ६ ॥ युग्मं ॥ एवं श्रीदेवदेवस्य । निपीय वचनामृतं ॥ आरराध सुधीः साधु–प्रतिमाः स यथाविधि ॥ ७ ॥ अधिकाधिकपुण्योत्क–मना मेघमुनिस्ततः ॥ तपः षोडशभिर्मासै–र्गुणरत्नाख्यमातनोत् ॥ ८ ॥ निर्वाह्य द्वादशाब्दानि । व्रतमंते जिनाज्ञया ॥ मासं संलेख्य स तनूं । तन्वीमपि तनुं व्यधात् ॥ ९ ॥ समाधिमृत्या विजय–स्थाने कर्मारिमारणे ॥ स निस्तृंशस्त्रयस्त्रिंशत्–सागरायुरभूत्सुरः ॥१०॥ ॥ इति मेघकुमारकथा ॥

गतं विनयद्वारं, अथ क्रियाद्वारं प्रस्तावयन्नाह—

॥ मूलम् ॥—किरियाजुत्तेणं चिय । नाणेण जिणा भणंति फलसिद्धिं ॥ सत्थजल अंधपंगुल–नरित्थिसंजोगदिठ्ठंता ॥ ३२ ॥ व्याख्या—क्रिया यथोक्तानुष्टानाचरणं, तद्युक्तेनैव ज्ञानेन जिनाः केवलज्ञानोपलब्धस्याद्वादमुद्रामुकुलितसकलवस्तुतत्वाः पुण्यानुष्टानफलभूतां सिद्धिं फलसिद्धिं; यद्वा फलसिद्धिं कार्यनिष्पत्तिं निर्जरारूपां भणंति, अथ दृष्टांतत्रयमाह–"सत्थजलेत्यादि" स्पष्टं. दृष्टांतत्रयभावना चैवं—न केवलं तीक्ष्णमपीह शस्त्रं । करोति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वंगं द्विषतां कदापि ॥ न तेन हीनः प्रबलोऽपि योद्धा । पुनर्द्वियोगे रणसिद्धिरस्ति ॥ १ ॥ तथा—एकस्मिन् विपिने प्रदीप्तदहने दग्धौ दवार्चिष्मता । चक्षुष्मानपि पंगुलो गतिरतोऽप्यंधश्च भिन्नाशयौ ॥ अंधो मूर्ध्नि दधाति चेद्चरणं तत्तत्प्रणीताध्वना । धावन्नेष सुखं निरेति द्वतः पंगुश्च तद्योगतः ॥ २ ॥ तथा—अध्वस्तबीजोऽपि पुमान् विधत्ते । स्त्रिया विहीनो नहि वंशवृद्धिं ॥ विना पुमांसं न तु साप्यवंध्या । योगे द्वयोः स्यात् पुनरिष्टसिद्धिः ॥ ३ ॥ एवं न क्रियाविहीनेन ज्ञानेन, न च ज्ञानहीनया क्रियया सिद्धिर्जायते, तत्संयोग एव सद्भावात्, यदाहुः—संजोगसिद्धीइ फलं वयंति । न हु एगचक्केण रहो पयाइ ॥ अंधो य पंगू अ वणे समिच्चा । तेसिं पउत्ता नगरं पविट्ठा ॥ १ ॥ अथ यः कश्चित्क्रियालालसो ज्ञानेनैव स्वं कृतकृत्यं मन्यते तंप्रत्याह—

॥ मूलम् ॥—मा जाणसु जीयहिए । जियअहिए किं जयं सुए अहिए ॥ अहिए परुसि जवोहे । जइ किरियाए पमाएसि ॥ ३३ ॥ व्याख्या—जो आलस्योपहत! मा एवं ज्ञासीर्यंज्जीवानां हिते अहिंसोपदेशकत्वात्, तथा जिता अहिता अज्ञानादयो येन तस्मिन्

For Private and Personal Use Only

जिताहिते, एवंविधे श्रुते आवश्यकादिकेऽधीते मम किं जयं? श्रुतमेव मां तारयिष्यतीति. यदि त्वं क्रियायां चरणकरणरूपायां प्रमाद्यसि, तदाऽधीतश्रुतोऽप्यज्ञानावस्थातोऽधिके जवौघे संसारपूरे पतसि. जानतः प्रमादकरणे प्रभूततरकर्मबंधात्. ॥३३॥ एतदेव विशेषं जावयति—

॥ मूलम् ॥—चउद्दसपुव्वीवि सया । पाविज्जंते पमायपरिवडिया ॥ साहारणेसुऽणंता । असंखया सेसकाएसु ॥ ३४ ॥ व्याख्या—आसतामल्पपाठिनः, चतुर्दशपूर्विणोऽपि प्रमादेन क्रियाशैथिल्येन परिपतिता ज्ञानादिगुणेभ्यो भ्रष्टास्तिर्यग्नारकादिजवपरंपराः स्पृशंतः कदाचिन्निगोदवासमप्यनुजवंति. ते च कालस्यानंत्यात् पिंडिताः संतो यदा विवक्षितक्षणे चिंत्यंते, तदा साधारणेषु सूक्ष्मेषु बादरेषु च निगोदेषु सदा सर्वकालं अनंताः प्राप्यंते, तत्र जीवराशेरनंतत्वात्. शेषेषु स्थानेषु पृथ्व्यप्तेजोवायुप्रत्येकवनस्पतिद्वित्रिचतुःपंचेंद्रियतिर्यग्देवनारकरूपेषु असंख्येयास्ते प्राप्यंते, उक्तराशीनामसंख्यजीवात्मकत्वात्. मनुष्येषु पुनः कदाचित्संख्येयाः कदाचिदसंख्येयाश्चेत्यनुक्तमपि द्रष्टव्यं, मनुष्याणां द्विस्वजावत्वात्. यदाह प्रज्ञापनाकारः—नेरईयाणं जंते केवईया आहारगसमुग्घाया अइया? गोयमा!

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

असंखिज्जा, केवईया पुरक्खमा? गोयमा! असंखिज्जा, एवं जाव वेमाणियाणं. नवरं वण-
स्सइकाइयाणं मणूस्साणं य इमं नाणत्तं. वणस्सइकाइयाणं भंते केवईया आहारगसमुग्घा-
या अइया? गोयमा! अणंता.मणुस्साणं भंते केवइया? गोयमा! सिय संखिज्जा सिय असंखि-
ज्जा, एवं पुरक्खमावित्ति ॥३५॥ अथ यः क्रियाहीनोऽपि परप्रतिबोधमात्रेण माद्यति,तंप्रत्याह—

॥ मूलम् ॥—-नीसारेसि भवाउ । भविए कह अप्पणा न नीसरसि ॥ जं तरइ अ-
प्पणावि हु । तारंतो तारउ लोयं ॥ ३६ ॥ व्याख्या—स्पष्टा, पुनरेतदेव दृष्टांतांतरेणाह—

॥ मूलम् ॥—बुज्झसि बोहेसि परं । तेणं किं जइ सयं न उज्जमसि ॥ नाणेणुवएसेण
य । अभुंजमाणस्स न हि तुट्ठि ॥ ३७ ॥ व्याख्या—बुध्यसे स्वयं तत्वं, बोधयसि च परमु-
पदेशद्वारेण, तेन बोधेन बोधनेन च तव किं? न किंचित्कार्यं सिध्यतीत्यर्थः, यदि हे
मूर्ख! स्वयं नोद्यच्छसि क्रियायां. यतः स्वयं मोदकादिकमभुंजानस्य स्वादु पुष्टिकृच्चैतदिति
ज्ञानेन त्वं भुंक्ष्वेदं, ते तृप्तये भविष्यतीत्याद्युपदेशेन च न हि मनागपि तुष्टिर्जायते. प्रति-
प्राणि प्रसिद्धमेतत्. उक्तं च पंचमांगवृत्तौ—क्रियैव फलदा पुंसां । न ज्ञानं फलदं मतं ॥ य-

For Private and Personal Use Only

तः श्रीभद्दयज्नोगाङ्गो । न ज्ञानात् सुखितो भवेत् ॥ १ ॥ अत्र ज्ञाननयो ज्ञानस्यैव प्राधान्यं ब्रूते, क्रियानयस्तु क्रियाया एव. ततो मिथ्यादृशावेतौ एकांशावलंबित्वात्. जिनमतं पुनर्द्वे अपि समुदिते ज्ञानहेतू वदति, न तु विभिन्ने, सम्यगेवैतत् सर्वनयात्मकत्वात्. एवं शेषेष्वपि कालस्वभावादिपदार्थेष्वन्योन्यं निरपेक्षेषु स्वस्वप्राधान्यं वदत्सु मिथ्यादृष्टिता. तत्समुदायिप्रतिपत्तौ च सम्यग्दृष्टिता जावनीया. उक्तं च—कालो सहाव नियई-पुव्वकयं पुरिसकारणेगंता ॥ मित्थत्तं तं चेव उ । समासउ होइ सम्मत्तं ॥ १ ॥ इत्यत्र बहु वक्तव्यं, तत्तु नोच्यतेऽनधिकृतत्वात्. ॥३६॥ व्याख्यातं क्रियाद्वारं, अथ क्रमायातान् संयमन्नेदानाह—

॥ मूलम् ॥— पंचमहव्वयधरणं । चउपंचकसायइंदियनिरोहो ॥ गुत्तितियं इय संयमन्नेया सत्तरस जणंति ॥ ३७ ॥ व्याख्या—पंचानां महाव्रतानां धरणं; चतुर्णां कषायाणां, पंचानामिंद्रियाणां च निरोधो निग्रहः, गुप्तित्रिकं मनोगुप्त्यादिकं, एते सर्वसंख्यया सप्तदश. सं सामस्त्येन यमनं सावद्ययोगेन्य उपरमणं संयमस्तस्य न्नेदा जण्यंते. ॥ ३७ ॥ तत्र प्रथमं महाव्रतान्याह—

॥ मूलम् ॥-पाणिवहप्पमुहाणं । पंचह्नं आसवाण नावेण ॥ जं सव्वविरमणं ते । महव्वया पंचमूलगुणा ॥ ३७ ॥ व्याख्या—आ इति स्वनिमित्तमर्यादया श्रवंत्यशुनं कर्मेत्याश्रवाः प्राणिवधादयः पंच, तेन्य आश्रवेन्यः, विनक्तिव्यत्ययः प्राकृतत्वात्, नावेनांतःकरणशुध्ध्या, न तूच्चारमात्रेण, यत्सर्वैः करणकारणानुमतिनेदैर्विरमणं, तानि पंच महाव्रतानि नवंति. एतानि साधूनां मूलगुणा इति व्यपदिश्यंते. ॥ ३७ ॥ अथैतेषां स्वरूपमाह—

॥ मूलम् ॥—तसथावरेवि जीवे । तितिहा न हणेइ जिअसरूवविऊ ॥ हासनयकोहलोहा । अलियंपि न नासए कहवि ॥ ३७ ॥ व्याख्या—साधुस्त्रसान् द्वींद्रियादीन्, स्थावरान् पृथ्व्यादीनपि जीवान् न हंति, न देशविरतवत् त्रसानेव केवलमित्यपिशब्दार्थः. कथं न हंतीत्याह–त्रित्रिधेति, इह हि प्रथमशब्दः करणकारणानुमतिवाची, द्वितीयस्तु मनोवाकायार्थः. ततोऽयमर्थः–मनसा, वाचा, कायेन च स्वयं जीवान्न हंति, न चान्यैर्घातयति, न च घ्नंतमन्यमनुजानातीत्येवंरूपेण एकैकेनैव नंगकेन, कथंभूतः साधुः? जीवस्वरूपवित्, न हि अज्ञातजीवस्वरूपस्तत्पर्यायविनाशदुःखोत्पादश्चित्तसंक्लेशात्मिकां त्रिविधामपि हिं-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सां निषेद्धुमलं. उक्तं च—जो जीवेवि न याणेइ । अजीवेवि न याणई ॥ जीवाजीवे अयाणंतो । कहं सो नाइ संयमं ॥ १ ॥ उक्तं प्रथमं महाव्रतं, अथ द्वितीयमुच्यते, हासेत्यादि. हास्यात् हसनात्, अनेन प्रेमद्वेषकलहाभ्याख्यानादिपरिग्रहः, भयाद्भीतेः, क्रोधादप्रीतेः, लोभादभिष्वंगात्, आद्यंतग्रहणान्मानमायापरिग्रहः, अलीकं मृषावादं प्राणांतेऽपि न भाषंते. तदलीकं चतुर्धा—सद्भावनिषेधः १, असद्भावोद्भावनं २, अर्थांतराभिधानं ३, गर्हावचनं ४ चेति. तत्राद्यं यथा नास्त्यात्मेत्यादि, द्वितीयं यथा श्यामाकतंदुलमात्र आत्मा ललाटस्थो वेत्यादि. तृतीयं तु गामश्वं ब्रुवाणस्य, चतुर्थं तु काणं काणमेव वदतः ॥ ३९ ॥ इत्युक्तं द्वितीयं महाव्रतं, अथ तृतीयचतुर्थे आह—

॥ मूलम् ॥—वज्जेइ जीवकेवली—सामिगुरूहिं अदिन्नमाउत्तो ॥ न य सेवेइ सिवट्ठा । अट्ठारसहावि अबंभं ॥ ४० ॥ व्याख्या—आयुक्त उपयुक्तः सन् साधुर्जीवादिभिरदत्तं वस्तु वर्जयतीति तृतीयं महाव्रतं, तत्र जीवादत्तं सचित्तमुच्यते, तापाय शंकिना जीवेन स्वाश्रितदेहस्यानर्पणात्तद्गृह्णतो जीवादत्तं, यद्वा हठेन प्रव्राज्यमानः शिष्योऽपि जीवादत्तमित्युच्यते.

For Private and Personal Use Only

तथा अचित्तमपि यत्केवलिनाऽननुज्ञातं हिरण्यादि; तद्गृह्णतः केवल्यदत्तं, तथा केवलिनाऽनुज्ञातमपि वस्तु स्वामिनाऽदत्तं वसनादि गृह्णतः स्वाम्यदत्तं. तथा स्वामिनाऽनुज्ञातमपि यद्वस्तु केनापि हेतुना गुरुणा निषिद्धं, यथा साधोऽद्य त्वमिदं मा ग्रहीरिति, तद्भोजनादिना गृह्णतो गुर्वदत्तं, गुरोरनालोच्य भक्तादिकं वा भुंजानस्य गुर्वदत्तं भवतीति. तथा शिवार्थं मोक्षार्थमष्टादशधाऽब्रह्म मैथुनं न सेवते, इति चतुर्थं महाव्रतं. तत्रौदारिकं मनुष्यतिर्यक्स्त्रीविषयं मैथुनं मनसा न सेवते, न चान्यान् सेवावयति, सेवमानं चान्यं नानुमन्यते, इति त्रयो भेदाः. एवं च वचसापि त्रयः, कायेनापि त्रयः, सर्वेऽप्यमी नव भेदाः. एवं यथौदारिकेण नव भेदा लब्धास्तथा वैक्रियेणापि देवीविद्याधरीविषयेण मैथुनेन नव भेदा लभ्यंते. सर्वेऽप्यमी अष्टादशेति. ॥ ४० ॥ अथ पंचमं महाव्रतमाह—

॥ मूलम् ॥—उंहोवग्गह उवहिसु । दव्वाइसु च चउसुवि ममत्तं ॥ जं नायरेइ तितिहा । महव्वयं पंचमं एयं ॥ ४१ ॥ व्याख्या—उंघेन प्रवाहेण यो गृह्यते, कारणे च भुज्यते स उंघोपधिः, यश्च सति कारणे गृह्यते, कारणे च भुज्यते स उपग्रहोपधिः. उक्तं च-उंहेण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जस्स गहणं । जोगो पुण कारणे स उहोही ॥ जस्स डुगंपि नियमा । कारणउ सो उवग्ग-हिउ ॥ १ ॥ तत्र उंघोपधिः स्थविरकल्पानां चतुर्दशधा, तद्यथा—पत्तं पत्ताबंधो । पायठव-णं च पायकेसरिया ॥ पडलाइं रयत्ताणं । गुच्छो इय पायनिज्जोगा ॥ १ ॥ तिन्नेव य पछा-गा । रयहरणं चेव होइ मुहपत्ती ॥ तत्तो य मत्तए खलु । चउदसे चोलपट्टो य ॥ २ ॥ युग्मं ॥ साध्वीनां तु पंचविंशतिधा, तद्यथा–" पत्तं पत्तावंधो गहा ". तिन्नेव य वत्थागा । रयहरणं चेव होइ मुहपत्ती ॥ तत्तो य मत्तए खलु । चउदसमेकमढए चेव ॥ ३ ॥ उग्गहणं-तगपट्टो । अद्धोरू चलणिया य बोधवा ॥ अप्भंतर बाहिरियं । सणीय तहा कंचुए चेव ॥४॥ उगत्थी वेगत्थी । संघाडी चेव खंधकरणी य ॥ उहोवहिम्मि एयं । अज्जाणं पणवीसं तु ॥५॥ औपग्रहिकश्च द्वयेषामपि संस्तारोत्तरपट्टादिरनेकधा. एतयोरोघोपग्रहोपध्योर्यन्मुनि-र्ममत्वं प्रतिबंधं त्रिविधा नाचरत्येतत्पंचमं महाव्रतं. अयं भावः–तणगहणाणलसेवा–निवा-रणा धम्मसुक्कझाणठा ॥ दिठं कप्पग्गहणं । गिलाणमरणठया चेव ॥ १ ॥ यदार्ष–जंपि व-त्थं व पायं वा । कंबलं पायपुच्छणं ॥ तंपि संयमलज्जठा । धारंति परिहरंति य ॥ १ ॥ न

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सो परिग्गहो वुत्तो । नाइपुत्तेण ताइणा ॥ मुच्छा परिग्गहो वुत्तो । इइ वुत्तं महेसिणा ॥२॥ पुनर्विध्यंतरमाह—अथ द्रव्यादिषु चतुःषु यन्ममत्वं न करोति, तत्र द्रव्यत उपध्यादौ श्राव-कादौ वा; क्षेत्रतो नगरादौ निर्वातवसत्यादौ वा, कालतः शरदादौ दिवसादौ वा, भावतो व-पुरुपचयादौ क्रोधादौ वा. अत्राद्यंतयोर्महाव्रतयोस्त्रिविधत्रिविधभंगकग्रहणात् शेषेष्वपि स एव प्रतिपत्तव्यः. ॥४१॥ एवं सर्वमपि परिग्रहं त्याज्यमुक्त्वार्थविषयस्य तस्य विशेषत्याज्यतामाह—

॥ मूलम् ॥—पडिसिद्धो साहूणं । सव्वोवि परिग्गहो परमगुरुणा ॥ सव्वाणत्थनिमित्तं । विसेसओ अत्थविसओ सो ॥ ४२ ॥ व्याख्या—प्रतिषिद्धस्तावत्साधूनामुपसर्गतः सर्वोऽप्यधि-कोपकरणधरणात्मकः परिग्रहः परमगुरुणार्हता. यदाह—जं वट्टइ उवयारे । उवयरणं तंसि उवगरणं ॥ सेसं अहिगरणं पुण । अजओ अजयं परिहरंतो ॥ १ ॥ अपवादतस्तु क्वचित् क्वचिदनुज्ञातोऽपि, यथा पंचकल्पभाष्यं—एगो तित्थयराणं । निक्खममाणाण होइ उवहीओ ॥ तेण परं निरुवहिणो । जावज्जीवाइ तित्थयरा ॥ १ ॥ गणणाइपमाणेणं । उवहिपमाणं दुहा मुणेयव्वं ॥ गणणाइ जिणाणं तु । इक्को दोतिन्नि वाकप्पा ॥ २ ॥ दो रयणीसंकासो ।

For Private and Personal Use Only

सोत्थउवावि होइ आयामो ॥ रुंदो दिवड्ढहत्थं । एयपमाणप्पमाणेण ॥ ३ ॥ दो खोमियात्त इक्को । थेराणं तिन्नि होंति गणणाए ॥ आयायामपमाणा । दुहत्थमड्ढं च वित्थिन्ना ॥ ४ ॥ एसो उ नवे कप्पो । पकप्पउं गिलाणए गुरुणं च ॥ चउ सत्त वावि पाउणे । माणइरित्तं च धारिज्जा ॥ ५ ॥ परं स परिग्रहोऽर्थविषयः, अर्थमाश्रित्य विशेषतोऽपवादतोऽपि निषिद्ध एव, सर्वानर्थनिमित्तत्वात्. अयं भावः–गृहिणां भवत्वर्थः, क्वापि क्वापि सत्केवलोपयोगेनार्थकार्येपि भवति, साधूनां तु केवलोड्डाहहेतुत्वादनर्थ एव. यदाह–दोससयमूलजालं । पुव्वरिसिविवज्जियं जइवंतं ॥ अत्थं वहसि अणत्थं । कीस निरत्थं तवं चरसि ॥ १ ॥ ४२ ॥ अथ महाव्रतोपयोगित्वात् षष्टं रात्रिभोजनविरमणव्रतमपि साधुभिरवश्यं धार्यमित्याह—

॥ मूलम् ॥–तेसिं परिपालणट्ठा । चउहा चइयव्वमेव निसिभत्तं ॥ न हु ठप्पा अप्पावि हु । वसहीए सन्निही मुणिणा ॥ ४३ ॥ व्याख्या–इह रात्रौ पर्यटनेनेर्यापथाऽशुद्धेराद्यव्रतस्य भंगः. रात्रिबलेनागम्यगमनमपि कृत्वाहं गोचरचर्यां गतोऽभूवमिति कूटोक्त्या गुरुं प्रत्युत्तरयतो द्वितीयस्य. तमिस्रबलात्परस्वं गृह्णतः स्त्रियं वा कामयमानस्य तृतीयचतुर्थयोरपि. त-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भंगे तु पंचमं भग्नमेव. यद्वा रात्रिभुक्तेऽधिकीभूतं भक्ताद्यं पुनः प्रातर्भोक्ष्ये, इति बुद्ध्या स्थापयतः पंचमव्रतभंगो वाच्यः, यत एवं ततस्तेषां महाव्रतानां पालनार्थं मुनिना चतुर्धा निशिभुक्तं रात्रिभोजनं त्यक्तव्यमेव. यद्भाष्यं—जम्हा मूलगुणा चिय । न हुंति तव्विरहियस्स पडिपुण्णा ॥ तो मूलगुणग्गहणे । तग्गहणं निच्छओ नेयं ॥ १ ॥ चातुर्विध्यं चास्यैवं—दिवा गृहीतं दिवा भुक्तं १, दिवा गृहीतं रात्रौ भुक्तं २, रात्रौ गृहीतं दिवा भुक्तं ३, रात्रौ गृहीतं रात्रौ भुक्तं ४ इति. अत्र दिवाऽशनाद्यं गृहीत्वा रात्रौ तद्वसताववस्थाप्य पुनर्द्वितीयदिने भुंजानस्य प्रथमो भेदः, शेषास्त्रयः सुबोधाः. तथा न चाल्पोऽपि लवणमात्रोऽपि सन्निधिर्वसतौ स्थाप्यः. लिंगव्यत्ययः प्राकृतत्वात्. इह चतुर्विधाहारमध्ये यत्किमपि निशि वसतौ निवसति, स समयभाषया सन्निधिरुच्यते, सोऽपि रात्रिभोजनप्रायत्वादुत्सर्गतस्त्याज्य एव. यदागमः—"संनिहिं च न कुविज्जा । अणुमायंपि संजए ॥" इदं च रात्रिभोजनविरमणं महाव्रतानामत्यंतोपकारित्वात् साधूनां मूलगुणः. श्रावकाणां चाहारविरतिमात्रत्वादुत्तरगुणस्तपोवत्. यद्भाष्यं— निसिभत्तविरमणंपि हु । नणु मूलगुणो कहं न गहियं तं ॥

For Private and Personal Use Only

वयधारिणो च्चिय तयं । मूलगुणो सेसयस्सियरो ॥ १ ॥ ४३ ॥

॥ मूलम् ॥—जं अप्पयासठाणे । जं वा अपयासभायणे असणं ॥ तंपि हु राईभोयण-सरिसं रिसिणो उवइसंति ॥ ४४ ॥ व्याख्या—यदप्रकाशे स्थानेऽपवरकादौ; यद्वाऽप्रकाशे संकटमुखे भाजनेऽशनमभ्यवहरणं तदपि रात्रिभोजनसदृशं ऋषय उपदिशंति, सूक्ष्मजीवानिरीक्षणान्निर्दयपरिणामत्वाच्च. ॥ ४४ ॥ तस्मात्किं कार्यमित्याह—

॥ मूलम् ॥—सपरसमए निसिद्धं । असक्कपरिहारसुहुमजीववहं ॥ पच्चक्खनाणिणंपि हु । वज्जं वज्जेह निसिभुत्तं ॥ ४५ ॥ व्याख्या—स्वपरसमये निषिद्धं, स्वसमयनिषेधः प्रतीतोऽभक्ष्यांतः पठितत्वात्. परसमये त्वेवं—ब्रह्मादितेजःसंभूतं । भानुं वेदविदो विदुः ॥ स्पृष्टं करैस्ततस्तस्य । शुभं कर्म समाचरेत् ॥ १ ॥ तथा—नैवाहुतिर्न च स्नानं । न श्राद्धं देवतार्चनं ॥ दानं वा विहितं रात्रौ । भोजनं तु विशेषतः ॥ २ ॥ अन्यच्च—मध्याह्ने ऋषिभिर्भुक्तं । पूर्वाह्णे त्रिदशैस्तथा ॥ अपराह्णे तु पितृभिः । सायं भुंजंति दानवाः ॥ ३ ॥ संध्यायां यक्षरक्षोभि-र्भुक्तमेवं यथाक्रमं ॥ सर्ववेलामतिक्रम्य । रात्रौ भुक्तमभोजनं ॥ ४ ॥ युग्मं ॥ तथाऽ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शक्यपरिहारः परिहर्तुमशक्यः सूक्ष्मजीवानां कुंथुपनकादीनां वधो यत्र तत्तथा. अत एव प्रत्यक्षज्ञानिनां अवध्यादिज्ञानवतामपि वर्ज्यं, ते हि ज्ञानबलाद्यद्यपि पश्यंति सूक्ष्मजीवान्, तथापि परिहर्तुं न शक्नुवंतीति निशि न भुंजते. यदागमः—जइवि हु फासुयदवं । कुंथुपणगा य तहवि दुप्पेसा ॥ पच्चक्खनाणिणोवि हु । राइभत्तं परिहरंति ॥ १ ॥ तत एवंविधं निशि भुक्तं हे साधवो यूयं वर्जयत? चर्मचक्षुषां युष्माकं तत्सर्वथा न युक्तमित्यर्थः. इत्युक्तं पंचमहाव्रतप्रतिपालनं. ॥ ४५ ॥ अथ चतुर्णां कषायाणां निरोधमाह—

॥ मूलम् ॥—भवपुरदुवारभूए । मोहमहाचरटपयडसामंते ॥ रुंधिज्ज पावपायव—विडवे चत्तारिवि कसाए ॥ ४६ ॥ व्याख्या—कष्यंते कदर्थ्यंते प्राणिनोऽनेनेति कषं कर्म, तस्यायो लाभो येभ्यस्ते कषायाः, यद्वा कष्यंते प्राणिनोऽत्रेति कषः संसारस्तं अयंते गच्छंत्येभिरिति कषायाः क्रोधादयश्चत्वारस्तान् रुंध्यान्मुनिरनुदितानामनुदीरणेनोदयप्राप्तानां वा विफलीकरणेन. शेषं सुगमं, नवरं पादपस्य विटपान् शाखाप्रायान्. ॥ ४६ ॥ अथ कषायाणां सप्रभेदान् भेदानाह—

॥ मूलम् ॥—कोहाई ते चउरो । भेया चत्तारि तेसिं पत्तेयं ॥ अण अपच्चक्खाणा । पच्चक्खाणा य संजलणा ॥ ४७ ॥ व्याख्या—ते कषायाः क्रोधादयश्चत्वारो भवंति, क्रोधो, मानो, माया, लोभश्चेति. तेषां च चतुर्णामपि प्रत्येकं प्रत्येकं चत्वारो भेदास्तद्यथा—"अ-णत्ति" सूचामात्रत्वात्सूत्रस्य, अनंतं भवं भ्रमणीयत्वेनानुबध्नंतीत्यनंतानुबंधिनः क्रोधादयः, येषामुदये जीवः सम्यक्त्वं न लभते, लब्धं वा सम्यक्त्वं वमति. "अपच्चक्खाणत्ति" नञः सर्वनिषेधकत्वान्नास्ति सर्वथापि विरतिरूपं प्रत्याख्यानं येषु तेऽप्रत्याख्यानाः, यदुदये प्राप्त-सम्यक्त्वानामपि न जायते देशविरतिपरिणामः, जातो वा निर्नाम नश्यति. "पच्चक्खाणत्ति" प्रत्याख्यानं सर्वविरतिरूपमावृण्वंतीति प्रत्याख्यानावरणाः, यदुदये न सर्वविरतिं प्राप्नोति, प्राप्तापि वा सा विलीयते. संज्वलयंति औदयिकभावमानयंति चारित्रिणमपि ये ते संज्वल-नाः, यदुदये न भवति यथाख्यातचारित्रं, शेषचारित्रभेदास्तु भवंत्येव. बहुवचनं क्रोधादि-षु चतुर्ष्वेषां संबंधार्थं. तद्यथा—अनंतानुबंधी, अप्रत्याख्यानः, प्रत्याख्यानावरणः, संज्वल-नः क्रोधः. अनंतानुबंधी, अप्रत्याख्यानः, प्रत्याख्यानावरणः, संज्वलनश्च मानः. एवं माया·

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोर्नयोरपि योजना कार्या. ॥ ४७ ॥ अथ स्थितिगतिभ्यां गुणघातकत्वेन चैषामनंतानुबंध्या-दीनां विशेषलक्षणमाह—

॥ मूलम् ॥—जम्म वासं चउमास–मद्धमासं कमा ठिई एसिं ॥ नारयतिरियनरामर–गईसु एसु मया जंति ॥ ४८ ॥ सम्मत्तं गिहिधम्मं । जइधम्मं अणुकमा अहक्खायं ॥ वी-सासघायगा इव । वीसत्थाणं हणंति इमे ॥ ४९ ॥ व्याख्या–द्वे अप्युत्तानार्थे, नवरं " एसु मयत्ति " एष्वनंतानुबंध्यादिकषायाध्यवसानेषु मृताः. आह परः—ननु अनंतानुबंध्युदये नरकगतिः, संज्वलनोदये तु देवगतिरिति गतिनियमोऽत्राभिहितस्ततः कथं क्षायिकसम्य-ग्दृष्टित्वादनंतानुबंधिषु क्षीणेष्वपि श्रेणिकादीनां नरकगमनं ? मिथ्यादृष्टित्वात् सत्यप्यनंतानु-बंध्युदयेऽभव्यानां च देवगतिगमनमागमे प्रत्यपादीत्यत्रोच्यते—सत्यं, किंत्वत एव वचनब-लादेषामनंतानुबंध्यादिभेदानां प्रत्येकं अनंतानुबंध्यादिभेदतुल्यत्वमागमे साक्षादनुक्तमपि युक्तियुक्तत्वात् प्रतिपत्तव्यं, तद्यथा—अनंतानुबंधी क्रोधोऽनंतानुबंधितुल्यः, अप्रत्याख्यान-तुल्यः, प्रत्याख्यानावरणतुल्यः, संज्वलनतुल्यश्च. एवमप्रत्याख्यानक्रोधोऽनंतानुबंधितुल्यः,

For Private and Personal Use Only

अप्रत्याख्यानतुल्यः, प्रत्याख्यानावरणतुल्यः, संज्वलनतुल्यश्च. एवं प्रत्याख्यानावरणसंज्वलनावपि क्रोधौ प्रत्येकमनंतानुबंध्यादिभेदचतुष्टयतुल्यौ वाच्यौ. एवं मानमायालोभेष्वपि चतुर्णामप्यनंतानुबंध्यादिभेदानां प्रत्येकं चातुर्विध्यं भावनीयं. ततश्च श्रेणिकादीनामप्रत्याख्याना अपि कषाया अत्यंतदुस्सहतयाऽनंतानुबंधिकल्पाः संभाव्यंते. अभव्यानां चानंतानुबंधिनोऽपि ज्ञानध्यानादिभिः प्रतनुकृताः संज्वलनतुल्याः, तेन तेषां नरकगतिदेवगती न व्यभिचरतः, हेत्वंतरं वा सुधीभिर्विमृश्यं, तत्वस्य केवलिगम्यत्वात् ॥ ४८ ॥ ४९ ॥ अथ कषायाणां सामर्थ्यसीमानमाह—

॥ मूलम् ॥—इक्कारस्स गुणठाण-गस्स सीसंपि जं समारूढो ॥ पाडिज्ज कसाएहिं । भणाहि को तेसिं वीसंभो ॥ ५० ॥ व्याख्या—एकादशं गुणस्थानकमुपशांतमोहमित्युच्यते. एतच्च यथा श्रेणिक्रमेण भवति तथा प्ररूप्यते. इहोपशमश्रेणिप्रारंभकोऽप्रमत्तसंयतो भवतीति केचित्. अविरतदेशविरतप्रमत्ताप्रमत्तानामन्यतर इत्यन्ये. श्रेणिसमाप्तौ च निवृत्तोऽप्रमत्तगुणस्थाने प्रमत्तगुणस्थाने वावतिष्टति. कालगतस्तु देवेष्वविरतो वा भवति. उक्तं च—

उवसामगसेढीए । पढवओ अपमत्तविरओ य ॥ पज्जवसाणे सो वा । होइ पमत्तो अविरओ अ ॥ १ ॥ अन्ने भणंति अविरय-देसपमत्तापमत्तविरयाणं ॥ अन्नयरो पडिवज्जइ । दंसणसमणंमि उ नियट्टी ॥ २ ॥ कर्मग्रंथाभिप्रायेण तु प्रतिपतितोऽसौ मिथ्यादृष्टिगुणस्थानमपि यावद्गच्छति. तत्रेत्थमेतामारभतेऽसौ प्रतिपत्ता प्रशस्तेष्वध्यवसायस्थानेषु वर्तमानः प्रथमं युगपदंतर्मुहूर्तेनानंतानुबंधिनः क्रोधमानमायालोभानुपशमयति. ततो मिथ्यात्वमिश्रसम्यक्त्वरूपं दर्शनत्रिकं युगपदंतर्मुहूर्तेनोपशमयति. ततो यदा पुरुषः श्रेणिसमारब्धा स्यात्तदानुदीर्णमपि नपुंसकवेदमंतर्मुहूर्तेनोपशमयति. ततः स्त्रीवेदमंतर्मुहूर्तेन, ततो हास्यरत्यरतिशोकभयजुगुप्सालक्षणं षट्कं युगपदंतर्मुहूर्तेन, ततः पुरुषवेदमंतर्मुहूर्तेनोपशमयति.

अथ स्त्री प्रारंभिका, ततः पूर्वं नपुंसकवेदं, ततः पुरुषवेदं, ततो हास्यादिषट्कं, ततः स्त्रीवेदं. अथ नपुंसकः प्रारब्धा, ततोऽसावनुदीर्णमपि पूर्वं स्त्रीवेदं, ततः पुरुषवेदं, ततो हास्यादिषट्कं, ततो नपुंसकवेदं. अयं भावः—यो वेद उदये वर्तते, तस्माच्छेषस्य वेदद्वयस्य मध्ये यो जघन्यो वेदस्तं प्रथममुपशमयति, ततो द्वितीयं, ततो हास्यषट्कं, ततो य उदये

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्तते तं वेदमुपशमयतीति क्रमः. अतः परमप्रत्याख्यानप्रत्याख्यानावरणौ क्रोधो युगपदंतर्मुहूर्तेनोपशमयति. ततः संज्वलनं क्रोधमेकाकिनमेवांतर्मुहूर्तेनोपशमयति. ततोऽनया रीत्याऽप्रत्याख्यानप्रत्याख्यानावरणौ मानौ युगपत्, ततः संज्वलनं मानं, ततोऽप्रत्याख्यानप्रत्याख्यानावरणे माये, ततः संज्वलनां मायां, ततोऽप्रत्याख्यानप्रत्याख्यानावरणौ लोभौ, ततः संज्वलनं लोभं. अमुं चोपशमयंस्त्रिधा कृत्वा द्वौ भागौ युगपदुपशमयति. तृतीयं तु भागं संख्येयानि खंडानि करोति. तान्यपि पृथक्कालभेदेनोपशमयंश्चरमखंडमसंख्येयानि खंडानि करोति. तान्यपि समये समये एकैकमुपशमयन्नंतर्मुहूर्तेन सर्वाण्युपशमयति. इह च दर्शनसप्तके उपशांतेऽपूर्वकरणोऽनिवृत्तिबादरो वाभिधीयते, न पुनस्तत्र किंचिदुपशमयति. तत ऊर्ध्वमनिवृत्तिबादरो यावत् संख्येयखंडानां चरमाख्यखंडनिष्पन्नानि त्वसंख्येयखंडान्युपशमयन् सूक्ष्मसंपरायः, ततः परमंतर्मुहूर्तमुपशांतमोहो भवति. सर्वापि चेयं श्रेणिरारोहतामंतर्मुहूर्तेन समाप्यते.

—अस्याः स्थापना—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र शून्यस्थाने अनंतानुबंधिचतुष्टयादयो ज्ञेयाः. येषामुपशमस्य प्रारंभो निष्ठा च समकालं तत्तच्छून्यानि तिर्यक् समतया स्थाप्यंते. अत्र यदि बद्धायुरिमां श्रेणिमारभते, तदा श्रेणेः समाप्तावसमाप्तौ वा कालं कृत्वा नियमादनुत्तरसुरेष्वेवोत्पद्यते. उक्तं च—बद्धाऊपडिवन्नो । सेढिगओवा पसंतमोहो वा ॥ कुणइ कोइ कालं । सो वच्चइणुत्तरसुरे य ॥ १ ॥ अबद्धायुः पुनः श्रेणिं संपूर्णीकृत्यांतर्मुहूर्तमुपशांतमोहो भूत्वा कुतश्चिन्निमित्तादुदितकषायः प्रतिपतन्नियमाद्यथारूढस्तथा श्रेणेः पश्चान्मुखं निवर्तते. उक्तं च—अनिबद्धाउ होउ । पसंतमोहो मुहुत्तमित्तं तु ॥ उइयकसाउं नियमा । नियत्तए सेढिपडिलोमं ॥ १ ॥ अथ गाथार्थ उच्यते—इत्युक्तस्वरूपस्य एकादशस्य गुणस्थानस्य शीर्षमग्रविभागमपि समारूढो यदि कषायैः पात्यते, पुनर्मिथ्यात्वमपि नीयते साधुः. ततो

For Private and Personal Use Only

नाम कस्तेषां सर्वानर्थमूलानां कषायाणां विश्रंभो विश्वासः? सर्वथा नैषां विश्वसितव्यमि-
त्यर्थः. उक्तंच—जइ उवसंतकसाउ। लहइ अणंतं पुणोवि पमिवायं ॥ न हु ने वीससिअव्वं।
थोवेवि कसायसेसंमि ॥ १ ॥ ५० ॥ एतत्कषायाणां दौरात्म्यमजानानास्ताननिगृह्य ये धर्मार्थं
क्लिश्यंति ते जमा एवेत्याह—

॥ मूलम् ॥—कट्ठकिरियाहिं देहं। दमंति किं ते जमा निरपराहं ॥ मूलं सव्वदुहा-
णं। जेहिं कसाया न निग्गहिया ॥ ५१ ॥ व्याख्या—स्पष्टा, न वरं कष्टक्रियाभिस्तपोवन-
वासकायोत्सर्गादिभिर्निरपराधमिति देहस्याचेतनत्वात् ॥ ५१ ॥ अत एव—

॥ मूलम् ॥—तत्तमिणं सारमिणं। दुवालसंगीइ एस नावत्थो ॥ जं भवभवणसहाया।
इमे कसाया चइज्जंति ॥५२॥ व्याख्या—मोक्षमार्गप्रकाशिकाया द्वादश्यांग्या इदं तत्वं रहस्यं,
इदं सारं दध्न इव नवनीतं. एष च नावार्थस्तात्पर्यार्थः. यद्भवभ्रमणसहाया इमे प्रागुक्तस्व-
रूपाः कषायास्त्यज्यंते. एभिस्त्यक्तैर्भवभ्रमणमपि त्यक्तमेव, निःसहायत्वात्. ॥ ५२ ॥ एवं
सामान्यतः कषायनिग्रहमुपदिश्याथ पृथक् पृथक् तन्निग्रहाय विशेषोपदेशमाह—

॥ मूलम् ॥—एसु दुहनट्टरंगे । मित्तिमहावल्लिमलणमायंगे ॥ सुविवेयदिसामोहे । रज्जिज्जइ कहसु कह कोहे ॥ ५३ ॥ व्याख्या—एषु कषायेषु वैरव्यसनविग्रहादिदुःखान्येव नानारूपत्वान्नाट्यानि, तेषामभिनयनाय रंगे रंगभूमौ, मैत्री सौहार्दं सैव चिरप्ररूढत्वान्महावल्ली, तस्या मर्दनाय मत्तमातंगे समदहस्तिनि, सुविवेकस्य प्रतिपदं स्खलनाय दिग्मोहे कथय कथमेवंविधे क्रोधे रज्यते, नैव रज्यत इत्यर्थः. ॥ ५३ ॥ अथ श्लिष्टविशेषणगर्भं क्रोधस्य वह्नेरपि वैषम्यमाह—

॥ मूलम् ॥—कट्ठाइं पवड्ढंतो । पज्जलइ जलंमि न हु जलइ नेहे ॥ दिप्पंतो देइ तमं । कोहहुयासो इह अपुव्वो ॥ ५४ ॥ व्याख्या—इह अपूर्व इतराग्निभ्यो विलक्षणः क्रोध एव हुताशः क्रोधहुताशो वर्तते, तद्यथा—क्रोधः कष्टानि स्वशिरउरःकुट्टनादीनि वर्धयन् जडे मंदबुद्धौ जने प्रकर्षेण ज्वलति, न पुनर्ज्वलति स्नेहेऽन्योन्यप्रीतिबंधात्मके, दीप्यमानो ज्वलन् सन् तमः पापं ददाति. अन्यो हि हुताशः काष्ठानि भस्मीकुर्वन् जलेंभसि न ज्वलति. ज्वलति च स्नेहे तैलादौ दीप्यमानः सन् तमोंधकारं नाशयतीति क्रोधहुता-

शस्य युक्तमपूर्वत्वं. ॥ ५४ ॥ यत एवं ततः साधुनिर्यत्कर्तव्यं तदाह—

॥ मूलम् ॥—मा रुसह रोसिल्ले । मा वसह परंमि अहिसवंतंमि ॥ मा पहरह पहरंते । उवसमसारं खु सामण्णं ॥ ५५ ॥ व्याख्या—स्पष्टा, अथ मानस्वरूपमाह—

॥ मूलम् ॥—नासियगुरूवएसं । विज्जा अहलत्तकारणमसेसं ॥ कुग्गहगयआलाणं । को सेवइ सुव्वउ माणं ॥ ५६ ॥ व्याख्या—नाशिता दूरीकृता गुरुपदेशा येन तं तथा, न हि मानेन गजनिमीलिकां दधतां गुरवो हितोपदेशं ददतीति भावः. तथा अशेषं पूर्णं विद्यानां प्रज्ञप्त्यादीनां शास्त्राणां वा अफलत्वस्य कारणं. न हि मानवतां विद्याः फलंतीति भावः. कुग्रहोऽसद्ग्रहः, स एव सबलत्वाद्गजस्तस्य स्थिरीकरणायालानं कः सुव्रतः सेवते माने? ॥ ५६ ॥ अथ मानस्य सांदृष्टिकं फलमाह—

॥ मूलम् ॥—जेणं माणो पाणो । वसाविउ निययहिययठाणंमि ॥ जुत्तं नाणाइगुणा । सुपवित्ता तं न छिप्पंति ॥ ५७ ॥ व्याख्या—येन केनचिन्मान एव पाणो देशीभाषया चंडालः स्वकीयहृदयस्थाने वासितः, युक्तमुचितं ज्ञानादयो गुणास्तं मानचंडालसंसर्गमलिनं न

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्पृशंति. कथंभूता गुणाः? सुष्टु अतिशयेन पवित्राः, सुपवित्रैर्हि आस्तां चंमालस्तत्संपर्क-कारी अपि दूरतस्त्यज्यते इत्यर्थः. ॥ ५७ ॥ अथ पारभविकं फलमाह—

॥ मूलम् ॥—पवरकुलजाइवलसुय—तवरूवे सरियलाभठाणेसु ॥ जो जेणं इह मच्चइ । मुच्चइ सो परभवे तेणं ॥ ५८ ॥ व्याख्या—प्रवराणि वर्तमानकालापेक्षया प्रधानानि कुलादीनि, तत्र कुलं पैतृकं उग्रादिकं वा, जातिर्मातृकी विप्रादिका वा, बलं शारीरिकं स्थाम, श्रुतं प्रज्ञोन्मेषजन्मशास्त्राधिगमः, तपो विकृष्टतपश्चरणं; रूपं सुसंस्थानत्वं, ऐश्वर्यं गृहादिप्रभुत्वं, लाभो धनाद्याप्तिः. एतेष्वष्टसु मदस्थानेषु यः कश्चिद्येन मदहेतुना माद्यति, अहो अहं कुलीनोऽहं बलवान्, इत्याद्युत्कर्षं धत्ते, स परभवे तेनैव जात्यादिना गुणेन मुच्यते, हीनो भवतीत्यर्थः. ॥ ५८ ॥ अथ मायायाः परिहारमाह—

॥ मूलम् ॥—दुब्बुद्धितिमिरराई । विविहदुरायारवल्लिवणराई ॥ नीसेसदोसमाया । वोज्झइ दूरउ माया ॥ ५९ ॥ व्याख्या—दुर्बुद्धयः परवंचनन्यासापहारादिचिंतात्मिकास्ता एव विवेकलोचनाच्छादकत्वात्तिमिराणि, तेषां समुल्लासाय रात्रिरिव रात्रिः, विविधदुराचारा

विश्वासघातकूटलेखनकूटतुलामानकरणाद्याः, त एव जनप्रियत्वाद्दल्लयस्तासामवस्थानाय वनराजिरिव वनराजिः, निःशेषाणां दोषाणां पैशुन्यादीनां पोषणाय मातेव माता माया दूरतो वर्ज्यते. ॥ ५९ ॥ यतः—

॥ मूलम् ॥—कुडिलगई कूरमई । होइ सया चरणवज्जिओ मलिणो ॥ मायाइ नरो भु-यगुव्व । दिट्ठमित्तोवि भयजणओ ॥ ६० ॥ व्याख्या—मायया हेतुभूतया नरः पुरुषो भुजगः सर्प इव दृष्टमात्रोऽपि भयजनको भवति, तत एव न कोऽपि तस्य विश्वसितीत्यर्थः. कथंभू-तः सः? कुटिला शाठ्यबहुला गतिश्चर्या यस्य सः कुटिलगतिः. क्रूरा दुष्टाध्यवसायवती म-तिर्यस्य स क्रूरमतिः. तथा सतामाचरणानि न्यायव्यवहारसत्यभाषणादीनि, तैर्वर्जितः, तथा मलिनः पापबहुलत्वात्, भुजंगपक्षे कुटिला गोमूत्रिकाकारा गतिर्यस्य सः, तथा क्रूरमति-रिति विशेषणं स्पष्टं. सदा शश्वच्चरणवर्जिता गूढपादत्वात्, मलिनः कालमूर्तित्वात्. ॥ ॥ ६० ॥ अन्यच्च—

॥ मूलम् ॥—होइ अविससणिज्जो । उवहयकित्ती विरत्तसयणो य ॥ परवंचणं कुणं-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तो । मायिल्लो वंचिउ विहिणा ॥ ६१ ॥ व्याख्या—मायावी पुरुषः परुषहृदयतया परवंचनां कुर्वन् स एव विधिना वंचितो भवति. विधिर्दैवं कर्म चेत्येकार्थाः. यतोऽसौ पूर्वं सर्वेषां विश्वासपात्रं भूत्वा मायया सर्वत्राऽविश्वसनीयो जायते, यशस्वी भूत्वा उपहतकीर्तिर्जायते, स्वजनप्रियो भूत्वा विरक्तस्वजनश्च जायते. ततो यः परं वंचयितुं मायां प्रयुक्ते, वस्तुतः स एव स्वकर्मणा वंच्यते, सर्वस्वार्थभ्रंशादिति तात्पर्यार्थः. ॥ ६१ ॥ अथ लोभमाह—

॥ मूलम् ॥—गुणतिमि तिमिंगिलसमं । सुचारुचारित्तचंदराहुवमं ॥ नयपायवनइउहं । विबुहो बहुमन्नइ न लोहं ॥ ६२ ॥ व्याख्या—गुणा एव सज्जनहृदयांभोधिजातत्वात्तिमयो मत्स्यास्तेषां ग्रसनाय तिमिंगिलसमं, यथा तिमिंगिलस्तिमीन् ग्रसते, तथा लोभो गुणानिति भावः. यत्परेऽप्याहुः—भूमिस्थोऽपि रथस्थांश्च । पार्थः सर्वधनुर्धरान् ॥ एकोऽपि वारयामास । लोभः सर्वगुणानिव ॥ १ ॥ तथा सुचारित्रमेव निर्मलत्वाच्चंद्रस्तदाच्छादनाय राहूपमं. नयो न्यायव्यवहारः, स एव जनमनःकमनीयत्वात्पादपो वृक्षस्तस्य ध्वंसनाय नद्योघं सरित्प्रवाहं, एवंविधं लोभं विबुधो विद्वान्न बहु मन्यते. ॥ ६२ ॥ अथास्य सामर्थ्यमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ मूलम् ॥—कोहाइणो कसाया । नवमगुणं जंति लोनपरिगहिया ॥ इक्कोवि खंफिडंवि हु । वच्चइ दसमं गुणं लोहो ॥ ६३ ॥ व्याख्या—क्रोधादयस्त्रयः कषायाः समर्था अपि लोनपरिगृहीता लोनसहिता एव नवमं गुणस्थानकमनिवृत्तिबादरं यावद्यांति, न परतः, तत्र तेषामुदयस्य सत्तायाश्च व्यवच्छेदात्. लोनः पुनरेकोऽपरकषायनिरपेक्षोऽपि तथा खंडितः किट्टीकृतोऽपि दशमं गुणस्थानकं सूक्ष्मसंपरायं व्रजति. ततः कथं नाम सामर्थ्यमस्य न प्रशस्यते? यथा चासौ खंफितस्तथोपशमश्रेणिनणने नावितमेव. ॥ ६३ ॥ किंच—

॥ मूलम् ॥—कोहो माणो माया । तिन्निवि लोनं विणा अणाहव्व ॥ तत्तो कसायसिन्ने । मन्ने अस्सेव सामित्तं ॥ ६५ ॥ व्याख्या—क्रोधो मानो माया चेति त्रयोऽपि कषाया लोनं विना अनाथा इव न कचित्प्रवर्तमाना दृष्टाः, ततोऽहमेवं मन्ये, निजबलनिविरुविरुंबितविश्वत्रये सुरासुरपतिभिरप्यप्रतिहतप्रसरेऽस्मिन् कषायसैन्येऽस्यैव लोनस्य स्वामित्वं दृश्यते. हि स्वामिना विना कृता महायोधा अपि न परेन्यः प्रहर्तुमुत्सहंतीति. ॥ ६४ ॥ एवं चतुर्णामपि कषायाणां दौरात्म्यमुक्त्वाथ तन्निग्रहोपायमाह—

॥ मूलम् ॥--कीडियपयत्तमेलिय—धम्मकणाणं दवा इमे चउरो ॥ उवसमसद्दवअ-ज्जव–संतोसजलेहिं जिप्पंति ॥ ६५ ॥ व्याख्या—यथा कीटिका शनैः शनैः स्वगात्रोचितप्रयत्नेन नीवारादिकणान् संचिनोति, दवानलस्तु ज्वलन्नेकपदे क्षणेन तान् दहति. तथा प्रमादबहुलत्वाज्जीवैः कीटिकाप्रयत्नेन कथंचिन्मीलिता ये धर्मकणास्तेषां सपदि भस्मीकरणाय दवानलप्राया इमे प्राग् निर्दिष्टाश्चत्वारः क्रोधादयः कषाया उपशममार्दवार्जवसंतोषैरेव जगदानंदकत्वाज्जलैर्मेघोदकैः क्रमाज्जीयंते. ॥ ६५ ॥ अथ कषायत्यागस्य मुख्यं मोक्षांगत्वमाह—

॥ मूलम् ॥—सव्वेसुवि तवेसु । कसायनिग्गहसमं तवो नत्थि ॥ (अत्रोपपत्तिमाह) जं तेण नागदत्तो सिद्धो बहुसोवि भुंजंतो ॥ ६६ ॥ व्याख्या—यद्यस्मात्कारणात्तेन कषायनिग्रहेण नागदत्तो मुनिर्बहुशोऽपि भुंजानः सिद्धः ॥ ६६ ॥ तत्कथा चैवं, अथ नागदत्तमुनिकथा–

कापि गच्छे पुरा साधुः । क्षपकोऽभून्महामनाः ॥ सोऽटतिस्म प्रतिगृहं । मासक्षपणपारणे ॥ १ ॥ एका पदा तदामर्दि । मंडूकी तेन वृष्टिजा ॥ प्रमादमाचरंतं च । स्मारितः क्षुल्ल-

केन सः ॥ २ ॥ मंडूकीमर्दिता लोकै-र्दर्शयन्नवदन्मुनिः ॥ किमेता अपि रे दुष्ट । ह्यस्तने
मया हताः ॥ ३ ॥ सोऽपि कोपं परिज्ञाय । मुनेर्मौनमशिश्रयत् ॥ प्रतिक्रमणकाले च । तं
प्रमादमसस्मरत् ॥ ४ ॥ प्रतिक्रांतेरनुक्रुद्धः । कृतांत इव मूर्तिमान् ॥ क्षुल्लकं श्लेष्मपात्रेण ।
हंतुं साधुरधावत ॥ ५ ॥ अंतरा स्फालितः स्तंभे । साधुः सद्यो व्यपद्यत ॥ क्रोधः स्वाश्रय-
नाशाय । क्षयव्याधिरिव ध्रुवं ॥ ६ ॥ उदपद्यत सोऽटव्यां । कुले दृग्विषभोगिनां ॥ मूर्त्याति-
मलिः क्रोध-मातंगस्येव संगतः ॥ ७ ॥ कुले च तत्र ये सर्पा—स्ते विद्यंतेऽखिला अपि ॥
प्राग्विराधितचारित्रा-ज्जातिस्मरणशालिनः ॥ ८ ॥ मास्मभूज्जंतुसंघात-घातोऽस्माकं दृशा दि-
वा ॥ इति सर्वे निशि भ्रांत्वा । प्रांशुः प्रासुकमेव वै ॥ ९ ॥ सोऽपि तत्र स्मरन् जातेः । स्वं
निनिंद मुहुर्मुहुः ॥ विदधे प्रासुकाहारै-र्वृत्तिं च विचरन्निशि ॥ १० ॥ इतश्च निश्चलस्थामा ।
श्रीवसंतपुरे पुरे ॥ पुत्रोऽरिदमनक्षोणी-भर्तुर्दष्टोऽहिना मृतः ॥ ११ ॥ कोपकंप्राधरः क्ष्मापो ।
जातिवैरं वहन्नथ ॥ जघान घातयामास । स्वयमन्यैश्च भोगिनः ॥ १२ ॥ निहत्याहेरवयवं ।
तस्य यः कोऽप्यदर्शयत् ॥ तस्मै ददौ स दीनारं । भर्मण्यामिव भूपतिः ॥ १३ ॥ तदा गा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रुम्फिकः कोऽपि । तदेवालोकयन् वनं ॥ जुवि नोजंगमी रेखा । नूयसीर्वीक्ष्य पिप्रिये ॥ १४ ॥
तत्र प्रतिबिलद्वार-क्षिप्तौषधबलेन सः ॥ सर्पान् संदंशकेनेवा-चकर्ष निजघान च ॥ १५ ॥
सोऽप्यौषधबलान्मध्ये-बिलं स्थातुमशक्नुवन् ॥ दध्यौ कृपकजीवाहि-रयं मा मद्दृशा मृतः ॥
॥ १६ ॥ निरगच्छत्ततः पुच्छे-नैष सोऽपि च चिच्छिदे ॥ कृष्णेक्षुयष्टिवत्तस्य । निर्गतं निर्गतं
वपुः ॥ १७ ॥ अमुंचन् शमसाम्राज्यं । वेदनाव्याकुलोऽपि सः ॥ समत्यज्यत कुस्थान-वासो-
द्भग्नैरिवासुनिः ॥ १८ ॥ तथा सोऽप्रीणयद्भूपं । हतानादाय नोगिनः ॥ स्वयमेवाभवन्नोगी ।
तद्दत्तद्रविणैर्यथा ॥ १९ ॥ इतश्च भूपतिं नाग-देवता काप्यवोचत ॥ मावधीः फणिनः सू-
नु-र्नविता तव भूधव ॥ २० ॥ स एव कृपकात्माथ । भूनाथस्य सुतोऽजनि ॥ चक्रे च ना-
गदत्ताख्या । पितृन्यां तस्य सान्वया ॥ २१ ॥ तस्याभूत्पयसः शैत्य-मिव स्वाभाविकः शमः ॥
कृपा प्रियसखीवास्य । जातु तत्याजनांतिकं ॥ २२ ॥ सोऽन्यदा श्रमणान् वीक्ष्य । सस्मार
प्राच्यजन्मनः ॥ कथंचित्पितरौ पृष्ट्वा-ङ्गीचक्रे च संयमं ॥ २३ ॥ आभवं प्राग्भवाभ्यासात् ।
क्षुदभूत्तस्य नूयसी ॥ अतःप्रतिदिनं स त्रि-रभुक्त व्रतधार्यपि ॥ २४ ॥ नीरागसंवरानंदी । घ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नागमधृतोदयः ॥ तत्रागतस्तपःस्फातौ । मुनींद्रो ध्यायतिस्म सः ॥ २५ ॥ चतुस्त्रिद्व्येकमासां-
त--क्षुजोऽभूवन्महर्षयः ॥ गच्छे तत्रैव चत्वारः । पुण्यभेदा इवांगिनः ॥ २६ ॥ तपस्यतः स
तान् वीक्ष्य । दध्यौ बालर्षिरंजसा ॥ धन्या अमी तपःखड्गै-र्ये लुनंत्यांतरद्विषः ॥ २७ ॥ न
पयःपूतरो धान्य-कीटः कुर्वे कदाप्यहं ॥ एकाशनकमप्येषां । वैयावृत्त्यं करोमि तत् ॥ २८ ॥
तं क्षुल्लमन्यदा नित्य-वैयावृत्त्यपरायणं ॥ क्षपकर्षीनतिक्रम्य । ववंदे शासनामरी ॥ २९ ॥ प्र-
त्यावृत्तां चतुर्मास-क्षपकस्तामवोचत ॥ वंद्यक्रमं लंघमाना । कासि रे कटपूतने ॥ ३० ॥ ब-
हुमन्ये च पांथानां । श्रेयः प्रत्यूहसूचिकां ॥ त्वत्तस्तां वन्यचटकां । देवीं च व्योमगामपि ॥
॥ ३१ ॥ यदेनं वंदसे बालं । विहायास्मांस्तपस्यतः ॥ ततस्त्वमपि बालासि । तुल्यैः प्रायेण
सौहृदं ॥ ३२ ॥ उवाच देवता साधो । किमेवं कलहायसे ॥ किं द्रव्यक्षपकैर्भाव-क्षपकेषु
ममादरः ॥ ३३ ॥ यज्जीवितं तपस्याया । यच्च नीवी महात्मनां ॥ वर्तते निष्कषायत्वं ।
तदस्मिन्नपि बालके ॥ ३४ ॥ सुखं घ्नंति नृणामुदग्राः कषाया । वपुः शोष्यते किं तपोभिर्वरा
कं ॥ नृशंसैर्जगद् ग्रस्यते कृष्णसर्पै-र्विनाश्येत हि गोनसो न्युनसत्वैः ॥३५॥ तपो द्वादशधा तत्र ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वैयावृत्यं विशिष्यते ॥ तस्म न्नेकाग्रहृत्वेन । बालोऽप्येषोम हातपाः ॥३६॥ इत्युक्त्वा व्यरमद्देवी । सोऽपि क्रुद्धो बुभुक्षितः ॥ प्रातः करंभमानीय । न्यमंत्रयत तंमुनिं ॥ ३७ ॥ आयूनः क्षोभयत्येष । किमस्मानिति कोपनः ॥ स तत्पतद्ग्रहे श्लेष्म—स्तबकं मुमुचे रुचिः ॥ ३८ ॥ एवमामंत्रितास्तेन । त्रयः शेषा महर्षयः ॥ चक्रुस्तथैव तेषां हि । न क्रोधः पंक्तिभेदकृत् ॥ ३९ ॥ क्षुब्धो दध्यौ चनाऽद्यापि । यत्तेषां कफभाजनं ॥ निष्ठीवंतस्तदस्थाने—ऽप्येते निंद्याःकिमुत्तमाः॥४०॥ क्षुधार्हं न तपस्यायां । शक्तः किं क्षोभयाम्यमुं ॥ स्वयं डुर्गतो दैवात् । किं लक्ष्मीवत्सु कुप्यति ॥ ४१ ॥ नासंभाव्या किल कफौ—षधिलब्धिस्तपस्विनां ॥ कासोऽयं तन्ममाप्यस्तु । कर्मव्याधिविनाशनः ॥ ४२ ॥ एवं विभावयन्नंतः । क्षपकैर्वारितोऽपि तैः ॥ कफं तं तेमनीकृत्य । करंमं बुभुजे मुनिः ॥ ४३ ॥ व्यराध्यंत समाधिस्था । यन्मयामी तपस्विनः ॥ अपुनःकरणेनैत—न्मिथ्यादुष्कृतमस्तुमे ॥ ४४ ॥ इति ध्यानमहावातो—धूतदुष्कर्मशैवले ॥ केवलश्रीमरालीना—खेलत्तस्यात्मपल्वले ॥ ४५ ॥ तदैव स्वर्णकमलं । समलंकृत्य दैवतं ॥ शमडुमसुधां चक्रे । साधुचक्री स देशनां ॥ ४६ ॥ नत्वा केवलिनं सैवं । देवता क्षपकान् ज-

For Private and Personal Use Only

गौ ॥ महिमानममानं भो । वाल्लस्यास्यप्रपश्यत ॥ ४७ ॥ विहाय वस्तपोराशीन् । बालेऽस्मि-न्ननुरागिणीं ॥ मामिवोपलब्धवे किं । नाधुना केवलश्रियं ॥ ४८ ॥ ते दध्युर्ज्ञानमुत्पेदे । य-देतस्य तपोविना ॥ ततस्तत्प्रशमायत्तं । तं विना वंचिता वयं ॥ ४९ ॥ न कषायात्तचित्तस्य । स्यात्तपोऽपि फलप्रदं ॥ अंतर्वह्नि वसंतोऽपि । किं नु पल्लवति द्रुमं ॥ ५० ॥ एवं ते शममापन्ना । वव्रिरे केवलश्रिया ॥ क्रमादवक्रमानंचु—र्गतिं पंचापि पंचमीं ॥ ५१ ॥ यन्नागदत्तस्य मुनेर-नेकदा—श्नतोऽपि तेषां च तपस्यतामपि ॥ इयान् विशेषः किल केवलश्रिया । चक्रे तदेत-त्प्रशमस्य जृंभितं ॥ ५२ ॥ इत्युपदेशचिंतामणौ कषायजये नागदत्तमुनिकथा. ॥

तदेवमुक्तः कषायनिग्रहरूपः संयमः. अथ पंचेंद्रियनिग्रहरूपं तं प्रस्तावयन्नाह—

॥ मूलम् ॥—-अकसाइत्तं इब्रइ । जइ ता कुण इंदियाण निग्गहणं ॥ मुत्तूण रागदो-से ॥ पंचसु सद्दाइविसएसु ॥ ६७ ॥ व्याख्या—हे चारित्रिन्! यदि त्वमकषायत्वमिच्छसि, तदा कुरु इंद्रियाणां श्रोत्रनेत्रजिह्वाघ्राणस्पर्शानां निग्रहं. कथमित्याह—पंचसु शब्दादिषु शब्दरूपरसगंधस्पर्शेषु तद्विषयेषु रागद्वेषौ मुक्त्वा. अयं भावः—यदा वेणुवीणावनिताव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लयादीनां शुभं, काककरभवृकघरट्टादीनां त्वशुभं शब्दमाकर्ण्य, विभूषितहयहस्तिहरिणाक्षीणां शुभं, वृद्धकुष्टिकुणपादीनां त्वशुभं रूपं निरीक्ष्य; कर्पूरागुरुचंदनादीनां शुभं, मलमूत्रमृतगात्रादीनां त्वशुभं गंधमाघ्राय, मधुमत्स्यंडीमोदकादीनां शुभं, रूक्षपर्युषितान्नक्षारजलादीनां त्वशुभं रसमास्वाद्य, तरुणीतूलिकादुकूलादीनां शुभं, दृषत्कंटककर्करादीनां त्वशुभं स्पर्शमनुभूयेष्टमेतन्ममेति रागः, अनिष्टमेतन्ममेति द्वेषश्च नोपजायते, तदा क्रमेण श्रोत्रादींद्रियनिग्रहो भवति. एतेषु निगृहीतेषु कषाया निग्रहीता एव, तन्मूलत्वात्कषायाणां. तथाहि—अनिष्टेष्विंद्रियार्थेषु गोचरं गतेषु क्रोधः, प्राप्तसर्वेंद्रियसुखस्य च नान्यो मत्तः सुखीत्यभिमानः, इंद्रियार्थसाधनस्य धनस्य वार्जनाय मायालोभौ प्रादुर्भवतः. जितेंद्रियस्य च निर्हेतुकत्वात्कथं नाम क्रोधादयः प्रवर्तेरन्? ततः कषायजयमिच्छता पूर्वमिंद्रियजयः कार्य इति तत्त्वं. ॥ ६७ ॥ अथेंद्रियजयस्य दुष्करत्वमाह—

॥ मूलम् ॥—हणइ रणंमि अरिणो । अरिणसेणंपि भुअबलेण भडो ॥ पिंडत्थे पंचरिऊ । निहणेउं सोवि किंवुव ॥ ६८ ॥ व्याख्या—कश्चिद्भट्टो भीमभार्गवादिर्हरिशिखरिशि-

खरानुकारिकरिनिकरां, जलधिकल्लोललोलरंगत्तुरंगसंयतां; चलत्प्रासादप्रतिमपृथुलरथसंमर्दडुःसंचरां, निजबलसमुच्छलत्सुनटकोटिकोलाहलवाचालितसकलदिग्वलयां, निशितेतरवारिपरिघपट्टिशप्रमुखप्रहरणप्रस्थापितपरप्राणामरीणां सेनामपि नुजबलेनारीणोऽखिन्नःसन् हंति, सोऽपि पिंमस्थान् पंचरिपूनिंद्रियलक्षणान्निहंतुं क्लीबः कातर इव चेष्टते. ॥ ६७ ॥ अथेंद्रियनिग्रहोपायमाह—

॥ मूलम् ॥—सव्वत्थ अहयदप्पा । इंदियसप्पा न तं परिनवंति ॥ हिययम्मि जस्स जग्गइ । इय अणुसिट्ठिमहामंतो ॥ ६९ ॥ व्याख्या—सुगमा, तामेवानुशिष्टिमाह—

॥ मूलम् ॥—परिमियमाउ जुव्वण—मसंठियं वाहिबाहियं देहं ॥ परिणइविरसा विसया । अणुरच्चसि तेसु किं जीव ॥ ७० ॥ व्याख्या—यदा कस्यचित्साधोर्नुक्तनोगस्य पूर्वक्रीमितस्मरणादिना, इतरस्य च कुतूहलीतया इंद्रियाण्युछृंखलीनवंति, तदा स एवमात्मानमनुशास्ति. गाथार्थः सुगम एव. ॥ ७० ॥ विषयाणां वैरस्यमेव नावयति—

॥ मूलम् ॥—धम्मधणवहारिणं । अणेगनवलक्खडुक्खकारिणं ॥ विसयाण अरीणंपि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व । को मइमं देइ अवयासं ॥ ७१ ॥ व्याख्या—स्पष्टा, न वरं, अवयासंति अवकाशं. ॥ ॥ ७१ ॥ अथ पूर्वानुभूतदिव्यसुखस्मरणं हि करुणेषु (तुच्छेषु) मनुष्यभोगेषु वैराग्यं जनयतीति तद्व्याख्यानमाह—

॥ मूलम् ॥—बहुलद्धधणो तरुणो । चिरागउ सह मणाणुकूलाए ॥ भज्जाए पंचविसए । भुंजंतो जं लहइ सुक्खं ॥ ७२ ॥ तो वंतराण सुक्खं । णंतगुणं भवणवासिणं तत्तो ॥ तो जोइसाण वेमा-णियाण कमणो अणंतगुणं ॥ ७३ ॥ व्याख्या—इह मनुष्यलोके तरुणो युवा पंच विषयान् शब्दादीन् भुंजानो यत्सौख्यं लभते, तरुणस्याप्येकाकिनो न तादृग्मनोविनोदः स्यादित्याह–भार्यया, सापि यदि अयोग्या, तदा कुतो रतिरित्याह–मनोऽनुकूलया, तस्यापि दारिद्र्ये क सौख्यमित्याह—लब्धधनः, एवंविधोऽपि सततं गृहावस्थायितया न तादृग्मान्यः स्यादित्याह—चिरागतः, अयं भावः—कश्चिद्युवा देशांतरे षोडश वर्षाणि स्थित्वा तत्रोपार्जितप्रभूतद्रव्यः स्वस्थानमायातः स्नातः सरससप्तदशभक्ष्यभोजनजनिततृप्तिः सुकुमारस्पर्शशयनीये कमनीयरूपसंपन्निर्जितरंभया, भयभ्रांतहरिणानुहारिनेत्रया, सकल-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कामोपचारचतुरया, वयोवेषवचनविलासादिगुणग्रामसमग्रया, सर्वांगसंगतसौवर्णशृंगारया, चिरमिलनोत्कंठासंवर्धितस्नेहग्रहिलया महिलया सह स्वेच्छया पंचविधान् विषयानुपभुंजानो यत्सौख्यमनुभवति, ततस्तस्मात् सौख्याद्विविधं अल्पर्द्धिकमहर्द्धिकादिकमंतरं येषां तेऽव्यंतराः पिशाचादयस्तेषां सौख्यमनंतगुणं, ततस्तस्माद्व्यंतरसौख्याद्भवनेषु बहिर्वृत्तेष्वंतश्चतुरस्रेऽवधः पुष्करकर्णिकासंस्थानेषु वसंतीत्येवंशीला भवनवासिनो नागकुमारादयोऽसुरकुमाराणां प्रायेणावासेष्ववस्थानात्. आवासाश्च कायमानस्थानीया महामंडपास्तेषां सौख्यमनंतगुणं, ततोऽसुरकुमाराणां सौख्यमनंतगुणमित्यनुक्तमपि बोधव्यं. ततो द्योतयंति स्वशिरोमुकुटाग्रवर्तिभिः स्वमंडलकल्पैश्चंद्रादिचिह्नैर्जगदीति ज्योतिषश्चंद्रादयः, तेषां सौख्यमनंतगुणं, तस्माज्ज्योतिःसौख्याद्विविधं मन्यंते भुज्यंते पुण्यवद्भिरिति विमानानि, तेषु भवा वैमानिकाः कल्पोपपन्नादयस्तेषां सौख्यमनंतगुणं चंद्रप्रज्ञप्त्याद्यागमेषु प्रतिपादितं, तच्च त्वया हे आत्मन्ननंतशोऽनुभूतं. यदागमः—सोहम्मीसाणेसुणं कप्पेसु सव्वे पाणा, सव्वे भूया, सव्वे जीवा, सव्वे सत्ता पुढविकाइयत्ताए जाव वणस्सइकाइयत्ताए देवत्ताए देवित्ताए, आसणसयणजा-

णत्तं फोवगरणत्ताए उववन्नपुव्वा, हंता गोयमा! असइं अदुवा अणंतखुत्तो सेसेसु कप्पेसु, एवं चेव नवरं नो चेवणं देवित्ताए जाव गेविज्जगा अणुत्तरोववाइएसुवि, एवं चेव नो चेवणं देवत्ताए देवित्ताएत्ति. ॥ ७३ ॥ ततश्च—

॥ मूलम् ॥—जाइतिएहिं दिव्वेहिं । तुह न जोगेहिं पसमिया तिल्हा ॥ सा कह समिही माणु—सएहिं तुच्छेहिं कलुणेहिं ॥ ७४ ॥ व्याख्या—सुगमा, न वरं तुच्छैः क्षणिकत्वादल्पैः, करुणैर्मानुष्यशरीरिणां मलमूत्रादिमयत्वाज्जुगुप्सनीयैः, उक्तं च स्थानांगे—सिंगारा कामा देवाणं, कलुसा कामा मणुस्साणं, बीजच्छा कामा तिरिक्खजोणीयाणं, रुद्दा कामा नेरईयाणं. सूक्तं चात्र, किंच—

॥ मूलम् ॥—विसएसु सुहं पिच्छसि । न उ नरयं जीव कंडरीउव्व ॥ जह मुद्धाए मच्छो । पिच्छइ मंसं न उण वडिसं ॥ ७५ ॥ व्याख्या—सुगमा, नवरं वडिशं मत्स्यबंधनं गलिकेति प्रसिद्धं. ॥ ७५ ॥ कंडरीककथानकं यथा कंडरीककथा—

पृष्टचंपा जनादृष्ट—कंपा पूरस्ति भारते ॥ तत्र सालः क्षमापालः । कालः प्रत्यर्थिनाम-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूत् ॥ १ ॥ तत्रोद्याने सुभूभागे । वर्द्धमानो जिनेश्वरः ॥ अन्यदा पुण्यदानाय । सोल्लासः
समवासरत् ॥ २ ॥ प्रभोर्वाक्यामृतैः शांत–भवतापः क्षमापतिः ॥ महासालेऽनुजे राज्य—
श्रियं सालो न्यधित्सत ॥ ३ ॥ उत्के संयमराज्याय । तस्मिन् राज्यमगृह्णति ॥ आह्वयामा-
स कांपिल्या–द्भागिनेयं स गागलिं ॥ ४ ॥ तस्मै प्रदत्तराज्योऽथ । श्रीवीरचरणांतिके ॥ प्रा-
व्राजीत्सानुजन्मासौ । साध्वाचारमबुद्ध च ॥ ५ ॥ अन्यदा मगधदेशा–च्चंपापुरींप्रति ॥
ताभ्यां व्यज्ञप्यत स्वीय—ज्ञातीन् वंदयितुं जिनः ॥ ६ ॥ श्रीगौतमं पुरस्कृत्य । जगदीश-
निदेशतः ॥ जग्मतुः पृष्टचंपां तौ । महर्षी हर्षशालिनौ ॥ ७ ॥ समं मात्रा यशोमत्या । पित्रा
पिठरभूभुजा ॥ गागलिः सपरिवारं । ववंदे गौतमं गुरुं ॥ ८ ॥ श्रीगौतमस्वेगोक्ति–बोधिता-
च्चित्तपंकजात् ॥ भवाशाभ्रमरी तेषां । त्रयाणामपि निर्ययौ ॥ ९ ॥ पुत्रप्रदत्तराज्यश्रीः । पि-
तृभ्यां सह दुर्वहां ॥ महाव्रतधुरां वोढुं । नाभवद्गागलिर्गलिः ॥ १० ॥ कलभैरिव यूथेशः ।
पंचभिस्तैः समन्वितः ॥ कृतकृत्यस्ततो नंतु । श्रीवीरं गौतमोऽचलत् ॥ ११ ॥ धन्या वयम-
मी येषां । संपन्नो गुरुरीदृशः ॥ इति भावनया प्रापु–र्ज्ञानं ते पंच पंचमं ॥ १२ ॥ न गंभी-

For Private and Personal Use Only

रा गुरुमपि । स्वं ते ज्ञानमजिज्ञपन् ॥ रहो लब्धं निधानं हि । प्रकाशयति कः सुधीः ॥१३॥
प्राप्ताः समवसरणं । ते सुरासुरपूजितं ॥ प्रभुं प्रदक्षिणीचक्रु–र्नथज्ञा गुरुणा सह ॥ १४ ॥ ते
स्वामिनमनत्वैवा–सीनाः केवलिपर्षदि ॥ नैते नीतिं विदंतीति । गौतमेन वितर्किताः ॥ १५ ॥
जगौ च गौतमो ज्ञान–हीनानां च तपोधनाः ॥ न निःस्वानामिवाढ्येषु । युक्ता केवलिषु
स्थितिः ॥ १६ ॥ जगदे जगदीशेन । गौतमो गोतमोन्निदा ॥ आशातयसि किं वत्स । केव-
लज्ञानिनो ह्यमून् ॥ १७ ॥ शिष्याणां केवलं श्रुत्वा । चिखिदे यज्ञणाग्रणीः ॥ तद्युक्तं स्वस्व-
भुक्तेन । जनः सर्वोऽपि तृप्यति ॥ १८ ॥ ज्ञानं प्रापुरमी राज्य–भुजः स्वल्पदिनव्रताः ॥ चि-
रव्रतोऽपि नाहं तु । विममर्शेति गौतमः ॥ १९ ॥ सन्नायामादिदेशाथ । नाथस्तस्य समाधये
॥ भूचरोऽष्टापदं गंता । यः स तद्भवसिद्धिभाक् ॥ २० ॥ तत् श्रुत्वा गौतमो व्योम्ना–ऽचा-
लीदष्टापदंप्रति ॥ लूतातंतून् करे धृत्वा । दिनकृत्करपद्य या ॥ २१ ॥ इतश्चाष्टापदोपांते ।
संति काननवासिनः ॥ कोडिन्यदत्तशेवाल–नामानस्तापसास्त्रयः ॥ २२ ॥ एकद्वित्र्युपवासा-
ख्यं । तपस्तेषां यथाक्रमं ॥ पारणं च फलैः शुष्क–दलैर्नीरसशैवलैः ॥ २३ ॥ तापसानां श-

तान्येकै–कस्य पंच परिछदे ॥ शुश्रुवुस्तेऽपि देवेज्यो । व्योम्नि तद्वीरजाषितं ॥ २४ ॥ शक्तिं निजामजानाना–स्त्रयस्ते मोक्षकांक्षिणः ॥ तं तुंगशृंगमारोढु–मारजंत गिरीश्वरं ॥ २५ ॥ एकद्वित्रिषु सोपाने–ष्वारूढानां तपोबलात् ॥ तेषां शक्तिः क्रमात् क्षीणा । स्वल्पतैलेव दीपिका ॥ २६ ॥ तत्र स्थित्वा गुणस्तोम–हारिणां व्योमचारिणां ॥ ते श्रीगौतममालोक्या–लोचयांचक्रिरे मिथः ॥ २७ ॥ एष स्थूलः कथं तूल–लीलया प्लवतेंबरे ॥ यद्विवा त्रुटिते शक्ति–रनेन तपसैव नः ॥ २८ ॥ अमुमेव गुरुं कुर्मो । येन सिद्धिं लजामहे ॥ एवं प्रजल्पतां तेषा–मारुरोह गिरिं गुरुः ॥ २९ ॥ त्रिगव्यूतोच्छ्रये तत्र । चैत्ये जरतकारिते ॥ इंद्रभूतिरवंदिष्ट । चतुर्विंशतिमर्हतां ॥ ३० ॥ अशोकपादपस्याधो । दिश्यैशान्यां जिनौकसः ॥ शिलापट्टे विशश्राम । स्वामी तीर्थोपवासकृत् ॥ ३१ ॥ तदा तत्रागतः श्रीदः । सह सामानिकैः सुरैः ॥ जिनपूजां तनोतिस्म । जक्त्या शक्त्या च पूर्णया ॥ ३२ ॥ अष्टापदं समारूढं । जीवंतं साधुकुंजरं ॥ तं निरीक्ष्य दधच्चित्रं । व्यमृशन्नरवाहनः ॥ ३३ ॥ जिनयात्रार्थमेताना–मत्र श्रीगौतमेक्षणात् ॥ बजूव द्विगुणो लाजो । व्यवसायं विनापि नः ॥ ३४ ॥ वंदित्वा धन-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दस्याथ । पुरो नक्त्या निषेदुषः ॥ जगौ जगत्त्रयीवंद्य–स्तत्वमेवं गणाधिपः ॥३५॥ देवः केव-
लसंपदः पदमजितक्षीणोग्ररागाग्रहः । क्षामांगस्तपसागमोदितगुणग्रामाजिरामो गुरुः ॥ धर्मो
दानदयादमादिनिरजिष्टुत्यः समस्तांगिना–मेतच्चेतसि धारयंतु सुधियो रत्नत्रयं वास्तवं ॥३६॥
श्रुत्वा तत्त्वत्रयीमेवं। श्रीदसामानिकाः सुराः॥ विकल्पतल्पमध्यास्ला–मासुरेवमनल्पकं ॥३७॥
वदतस्तपसा कार्श्यं । स्थौल्यं देहेऽस्य वीक्ष्यते ॥ विघटंते गुरोर्वाच–श्चेन्नस्तदक्षूषणं किमु ॥
॥ ३७ ॥ अयं नादर्शि नुंजानः । प्रकटं येन वच्महे॥ पिशुनः पुनरस्यायं । कायो मिष्टाशन-
स्य हि ॥ ३९ ॥ त्रिर्नोजनेऽपि शेषाणां । वपुस्तादृग् न पीवरं ॥ यादृगस्य स्वनावेन । यदि-
वासौ गणाधिपः ॥ ४० ॥ एवं तान् शंसयापन्नां–श्चतुर्ज्ञानखनिर्मुनिः ॥ अज्यधाद्विबुधानां
वः । केयं चिंता जक्तोचिता ॥ ४१ ॥ वर्ण्यतेस्म तपःकार्श्य–मस्माभिर्व्यवहारतः ॥ परिमाण-
प्रमाणं हि । नवेन्निश्चयतः पुनः ॥ ४२ ॥ पीवरोऽप्यल्पकर्मा स्या–त्कोऽपि क्षामोऽपि नापरः॥
तन्वप्यतिन्नरं वज्रं । तुलं न स्थूलमप्यहो ॥४३॥ न हेतुः सदसक्त्योः । कृषता स्थूलताथ-
वा ॥ अत्रार्थे पुंडरीकस्या—ध्ययनं शृणुतादृताः ॥ ४४ ॥ विजये पुष्कलावत्यां । प्राग्विदे-

For Private and Personal Use Only

हैकमंकने ॥ नगर्यां पुंकरीकिण्यां । महापद्मोऽजवन्नृपः ॥ ४५ ॥ पुंकरीककंकरीकौ । तस्या-
जूतां सुतावुजौ ॥ धुर्याविव स्वराज्यस्य । वर्धितौ तौ महीजुजा ॥ ४६ ॥ व्याख्यां निशम्य
सूरीणां । नलिनीगुल्ममीयुषां ॥ पुत्रप्रदत्तराज्यश्री–र्महापद्मोऽग्रहीद् व्रतं ॥ ४७ ॥ स चतुर्द-
शपूर्वाब्धि–पारदृश्वा तपोनिधिः ॥ उत्पन्नकेवलज्ञानः । स्थानं प्रापापुनर्जवं ॥ ४७ ॥ जिघृक्षुः
कंकरीकोऽपि । दीक्षां तस्यांतिके गुरोः ॥ पुंकरीकं महीपालं । स्थिरधीरन्वजिज्ञपत् ॥ ४ए ॥
सोऽज्यधाद्वत्स किं दीक्षां–तरायं करवै तव ॥ धन्योऽसि जनकक्षुण्णं । पंथानं चेत्प्रपद्यसे ॥
॥ ५० ॥ अजय्या विषया लोलं । मनस्तीव्रतरं व्रतं ॥ तथा कुर्या न हृष्यंति । वत्स मत्स-
रिणो यथा ॥ ५१ ॥ अथासौ जगृहे दीक्षां । बंधुना कारितोत्सवः ॥ विहरन् गुरुनिः साक–
मागमज्ञो बभूव च ॥ ५२ ॥ रोगैरंतः समुत्पन्नै–रन्यदा तत्कलेवरं ॥ तपःशुष्कं कृशीचक्रे ।
शमीकाष्ठं घुणैरिव ॥ ५३ ॥ पुनः श्रीसूरयः प्राप्ता । नगरीं पुंकरीकिणीं ॥ पुंकरीकेण जूज-
र्त्रा–ज्येत्य जक्त्या ववंदिरे ॥ ५४ ॥ शशिसोमं मुनिस्तोमं । नामं नामं नरेश्वरः ॥ कंकरी-
कऋषिं क्षीण–देहं वीक्ष्य गुरून् जगौ ॥ ५५ ॥ पिंकः किं कंकरीकस्य । तपसा वा रुजाश्र-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वा ॥ कयाचिच्चिंतया यद्वा। जगवन् दृश्यते कृशः ॥५६॥ गुरवोऽथ जगुर्नित्यं । तपः कृत्यं म-
ह्रात्मजिः ॥ कथं तार्यो भवांभोधि—रिति चिंतापि शाश्वती ॥५७॥ पुनरस्य कृषे रोगे—र्जप्रसे
प्रासुकाशिनः ॥ निरौषधं वपुर्गेह—मनाथमिव तस्करैः ॥ ५८ ॥ पितृप्रायो यतिजन—स्याज्य-
धाद्रसुधाधवः ॥ उपेक्ष्यते प्रज्ञोवह्वि—स्फुलिंग इव नामयः ॥ ५९ ॥ तपस्तावज्जपस्ताव—त्ता-
वद्धर्मो गुणा अपि ॥ यावत्पतति नात्मायं । दुःसाध्यव्याधिसंकटे ॥ ६० ॥ धर्मः स्याद्दृते
देहे । रक्ष्यते तेन तद्बुधैः ॥ तदादिशत येनैवं । साधुमुल्लाघयाम्यहं ॥ ६१ ॥ कंरूरीक-
मथादिक्तद् । गुरुराजः सगौरवं ॥ चिकित्सय वपुः साधो । बंधोराशां च पूरय ॥ ६२ ॥ गु-
र्वाज्ञया समं भ्रात्रा । गतोन्तर्नगरं मुनिः ॥ अंतिके राजसौधस्य । तस्थौ सद्मनि पुष्कले ॥
॥ ६३ ॥ अगदैरगदंकारा । आदिष्टा अवनीभुजा ॥ तं लघूल्लाघयांचक्रु—र्गुरवश्चान्यतो ययुः
॥ ६४ ॥ अंतरांतःपुरं तत्त—द्भक्ष्यग्रहणलंपटः ॥ पुष्टो बभूव देहेन । प्रमादेन च स क्रमात्
॥ ६५ ॥ सातगौरवतः क्षीणा—मपि ग्लानिमियेष सः ॥ स्थानवासाय मिष्टान्ना—शनाय प्रति-
भूर्हि सा ॥ ६६ ॥ वचःप्रवयणे राज्ञा । प्रेरितोऽपि गुरून् प्रति ॥ वार्तामपि विहारस्य । अ-

For Private and Personal Use Only

दधौ गलिवन्न सः ॥ ६७ ॥ तमथो पृथिवीनाथो । बलेनापि व्यहारयत् ॥ श्रावका अंकुशा-
यंते । यतीनां हि प्रमादिनां ॥ ६८ ॥ आसाद्य कंचन ग्राम–माश्रितः स्थपुटां कुटीं ॥ लेभे
पर्युषितं रूक्षं । भैक्षं भिक्षाक्षणे मुनिः ॥ ६९ ॥ प्रजावतीरसवती–रसग्रसनलालसः ॥ ईक्षु-
कीट इवारिष्टे । नक्ते तस्मिन्न सोऽतुषत् ॥ ७० ॥ स दध्यिवान् क तत्सौधं । सस्नेहाः श्रा-
विकाः क ताः ॥ क सा रसवती सर्वं । दुष्टदैवेन हूरितं ॥ ७१ ॥ यस्मादिह भवे कष्टं । किं
परत्र सुखं ततः ॥ विद्वांसोऽपीति किं तत्र । व्रते रज्यंति जंतवः ॥ ७२ ॥ अलं व्रतेन राज्यां-
श–मादास्येऽहं पुनर्निजं ॥ इति निश्चित्य स व्रात्यो । ववले कवलेच्छया ॥ ७३ ॥ प्रातः पुर्या
उपवनं । वनपालेन भूपतिं ॥ स्वागमं ज्ञापयामास । कंदरीकः स निस्त्रपः ॥ ७४ ॥ वज्रपात-
मिव श्रुत्वा । बंधोराकस्मिकागमं ॥ तमभ्यगान्नृपः साकं । सचिवैः शुचिवेषभाक् ॥ ७५ ॥
उपधिं चौरवद् वृक्ष–शाखायामवलंबितं ॥ लुठंतं शाड्वले तं च । स लुलोके लुलायवत् ॥
॥ ७६ ॥ मन्येऽसौ सर्वथोत्तीर्ण–चेताश्चारित्रपर्वतात् ॥ स्तुत्यस्तथापि स्तुत्या हि । कदाचि-
न्नजते त्रपां ॥ ७७ ॥

विमृश्येति महीनाथः । संतुष्टाव यथा तथा ॥ सोऽधः श्वभ्रपथं शोध्धु-मिवैक्षत तथा तथा ॥ ७७ ॥ सर्वथाप्यवषण्णोऽसा-विति मत्वा महीपतिः ॥ तमूचे यदि गृह्णासि । राज्यं तद्ब्रूहि बांधव ॥ ७८ ॥ वार्तयापि तया जातो-ह्ववासायास्मै ददौ नृपः ॥ स्ववेषं तस्य वेषं च । स्वेनादाय चचाल सः ॥ ८० ॥ दधानो राजचिह्नानि । सावेशः स विशन् पुरि ॥ अवकीर्णीति नालोकि । लोकैः प्रीतिस्पृशा दृशा ॥ ८१ ॥ असौ नेमे न सामंतैः । सिषेवे न च सेवकैः ॥ न च सिंहासनस्थोऽपि। रेजे भेक इवांबुजे ॥ ८२ ॥ अकुंठोत्कंठयाकंठं । बुभुजे भोजनक्षणे ॥ स नानारसमाहारं । श्राद्धाहूत इव द्विजः ॥ ८३ ॥ अत्याहाराद्भूत्तस्य । क्षणान्मूढविसूचिका ॥ अभुक्तश्चापि भुक्तश्चा-हारो हा रोगकारणं ॥ ८४ ॥ विलपंतं तयैवार्त्या । वेलंतं शयने भृशं ॥ सविद्या अपि वैद्यास्त-मुपैक्षंत क्षतव्रतं ॥ ८५ ॥ नवं प्रवर्तये तैलं । रे वैद्या वैद्यनामकं ॥ चेज्जीवामीति जल्पाकः । प्राणैरपि स तत्यजे ॥ ८६ ॥ अहो कर्मगतिर्घोरा । यत्तादृग् क्षपकोऽपि सः ॥ रौद्रध्यानवशाल्लेभे । सप्तमे नरके स्थितिं ॥८७॥ इतश्च त्यक्तराज्यश्रीः । पुंडरीकः स पिप्रिये ॥ जितप्रत्यर्थिवत्क्षीण-व्याधिवत्तीर्णवार्धिवत् ॥ ८८ ॥ कृताष्टम-

तपाः क्वापि । ग्रामे शीताशनाशनात् ॥ उदरव्यथयालिंगि । स जन्मावधिनोगनाक् ॥ ८९ ॥
सम्यग्देवगुरुध्यानं । पीडार्त्तोऽपि न सोऽमुचत् ॥ ईक्षुदंडः कटूयेत । किं यंत्रेणापि पीडितः
॥ ९० ॥ गुरून् द्रक्ष्यामि कर्हीति । चिंतया स्वं पवित्रयन् ॥ मिथ्यादुःकृतदानेन । समस्तै-
नांसि शोधयन् ॥ ९१ ॥ कृतार्थं मन्यमानः स्व-मेकाह्निक्यापि दीक्षया ॥ पुंडरीको विपद्या-
नू-द्देवः सर्वार्थसिद्धिगः ॥ ९२ ॥ युग्मं ॥ पुष्टोऽपि पुंडरीकोऽनू-द्देवः क्षामोऽपि सोऽनुजः ॥
नारकोऽजनि तद्देवा । नावस्यैव प्रमाणता ॥ ९३ ॥ श्रुत्वेति जहृषुः सर्वे । श्रीदसामानिकाः
सुराः ॥ तेषु श्रीवज्रजीवस्तु । तदध्ययनमग्रहीत् ॥ ९४ ॥ तत्र रात्रिदिवं स्थित्वा । प्रनाते
वलितः प्रनुः ॥ उत्कैर्दृष्टोऽद्रिसोपान-स्थितैस्तैस्तापसाधिकैः ॥ ९५ ॥ प्रणम्य प्रार्थितो दी-
क्षां । तैरुत्खातशिरोजकैः ॥ देवतादत्तने पथ्यान् । सर्वान् प्रनुरदीक्षयत् ॥९६॥ शिष्याश्चलत
येन श्री-वीरं वंदामहे गुरुं ॥ एवमालाप्य तानिंद्र-नूतिः प्रास्थित सुस्थितः ॥ ९७ ॥ अय-
मीदृग्गुणागारं । गुरुश्चास्य स कीदृशः ॥ इति नावनया नुन्ना-स्तेऽपि सर्वे तमन्वगुः ॥९८ ॥
नोक्ष्यध्वेऽद्य किमित्युक्ता । गुरुणा ते ययाचिरे ॥ पायसं कायसंतोषि । कदाहारकदर्थिताः

॥ ९९ ॥ संनिकृष्टादथो गोष्टात् । प्रभुरेकं पतद्ग्रहं ॥ आनयत्पायसन्नृतं । दुर्लभं तादृशां हि किं ॥ १०० ॥ कृष्णचित्र इव क्षिप्ते । पात्रे तत्रेंद्रभूतिना ॥ स्वदक्षिणकरांगुष्ठे । न पाय-समह्रीयत ॥ १ ॥ शिष्यव्रातं कणेहत्या-ऽबूभुजद्वसुभूतिजः ॥ व्याधाच्च पारणं स्वेन । सा-वशेषेण तेन सः ॥ २ ॥ ध्यायँल्लब्धिं गुरोर्भुक्त्वा । शेवालः प्राप केवलं ॥ सत्यं लाभकरो जज्ञे । स हि तस्य गणाधिपः ॥ ३ ॥ प्राकारपुष्पप्रकरा-दिकां वीरजिनेशितुः ॥ श्रियमालो-क्य दत्तोऽपि । वव्रे केवलसंविदा ॥ ४ ॥ लोकोत्तरस्फुरद्रूपं । साक्षाद्वीक्ष्य जगत्प्रभुं ॥ आ-नंच पंचमं ज्ञानं । कोडिन्यः सपरिच्छदः ॥ ५ ॥ प्रभुं प्रदक्षिणीकृत्य । यांतः केवलपर्षदं ॥ गौतमेन न्यषेध्यंत । ते सुवत्सलया धिया ॥ ६ ॥ दधानो वनवासित्वा-त्तेषु मुग्धमृगभ्रमं ॥ सोऽज्ञाणि प्रभुणा वत्स । किं केवलिषु कुप्यसि ॥ ७ ॥ निशम्य केवलं तेषां । केवलं शोक-मावहन् ॥ वीरेणोचे स किं जैनी । वाक् तथ्या वितथाथवा ॥ ८ ॥ तथ्या चेत्तर्हि किं ध-न्य । मच्चिरं नानुमन्यसे ॥ आवामंते भविष्याव-स्तुल्याविति पुरातनीं ॥ ९ ॥ चतुर्धाः स्युः कटाः शुंब-छिदलाजिनकंबलैः ॥ मयि त्वं कंबलकट-प्रेमा तन्नैषि केवलं ॥ १० ॥ निर्वाणे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मम ते ज्ञान-मिति वीरगिरा गुरुः ॥ गौतमोऽमोदत प्रोक्त-मेतत्सर्वं प्रसंगतः ॥११॥ इतीह दुष्टायति कंडरीक-राजस्य सम्यक् चरितं निशम्य॥ चिराय चारित्रमवाप्य चारु। को याति मोहं विषयेषु विद्वान् ॥ १२ ॥ इत्युपदेशचिंतामणिटीकायां कंडरीककथा. ॥

तदेवं विषयगृद्धानां नरकनिपातं निध्यायाथ विशेषवैराग्याय तद्दुःखानि विभावयति-

॥ मूलम् ॥—सव्वो पुग्गलकाउ। सव्वं जलनिहिजलं च संमिलियं ॥ न हु नारयाण सक्कइ। खुहं पिवासं उवसमेउं ॥ ७६ ॥ व्याख्या—सर्वस्त्रैलोक्योदरविवरवर्ती घटपटभवनवनादिपरिणामेन परिणतोऽपरिणतो वा पुद्गलकायो मूर्तद्रव्यराशिः संमिलितः समुदितः, तथा सर्वमसंख्येयानां जलनिधीनां जलं च संमिलितं, नैव नारकाणां क्षुधां पिपासां चोपशमयितुं शक्नोति. अयं भावः—यदि कदाचिदसत्कल्पनया नारकाः सर्वं पुद्गलकायं, सर्वं च जलं युगपदभ्यवहरंति, तथापि तेषां क्षुत्तृष्णे न शाम्यतः. एवं नाम ते नित्यं क्षुधितास्तृषिताश्च वर्तंते, इति. उक्तं च जीवाभिगमे-इमीसेणं भंते रयणप्पभाए पुढवीए नेरइया केरिसं खुहं पिवासं पच्चुब्भवमाणा विहरंति? गोयमा! एगमेगस्सणं रयणप्पभापुढवी-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नेरइयस्स असप्भावपट्ठवणाए सव्वोदही वा सव्वपुग्गले वा आसगंसि पखिविज्जा, नो चेव णं से रयणप्पभाए पुढवीए नेरईए तित्तेवासिया वितह्वेवासिया परिसयणं गोयमा! रयणप्पभाए पुढवीए नेरइया खुहं पिवासं पच्चणुप्भवमाणा विहरंति. एवं जाव अहे सत्तमाएत्ति. ॥ ७६ ॥ अन्यच्च—

॥ मूलम् ॥-जे उह्णवेइया तत्थ। ते य इह लोहगारअगणिंमि ॥ खित्ता चंदणसित्ताव। तावमणिंति सव्वंपि ॥ ७७ ॥ व्याख्या—तत्र तेषु नरकेषु ये नैरयिका उष्णवेदकाः संति, तत्राद्ये नरकत्रये सर्वेषु नरकावासेषु, चतुर्थे च भूयस्सु नरकावासेषु, पंचमे च स्वल्पेषु तेषु नैरयिकाः शीतयोनावुत्पद्य मुहूर्तात्परत उष्णक्षेत्रं संक्रांता उष्णां वेदनां वेदयंति. ते उष्णवेदना नारका असत्कल्पनया तत उध्धृत्य इह मनुष्यलोके लोहकाराणां, उपलक्षणात् कांस्यकृतादीनां चाग्नौ क्षिप्यंते, क्षिप्ताः संतस्तत्क्षणाच्चंदनक्षिप्ता इव, उपलक्षणात् कदलीदलवीज्यमाना इव सर्वमपि प्राक्तनं तापमपनयंति, एवं नाम तत्र नैरुष्णवेदना अनुभूयंते, उक्तं च जीवाभिगमे—असप्भावपट्ठवणया उसिणवेयणिज्जेहिंतो नरएहिंतो नेरइए उवट्ठिए

For Private and Personal Use Only

समाणे जाइं इमाइं मणुस्सलोए नवंति अयागराणि वा, तंबागराणि वा जाव इट्टयागराणि वा कवेल्लागराणि वा जाव जंतवाडचुल्ली वा, तत्ताइं समजोईभूयाइं फुल्लकिंसुयसमाणाइं जालासहस्साइं पमुच्चमाणाइं अंतो हूहूयमाणाइं चिट्ठंति ताइं पासइ पासइ ताइं उग्गहइ उग्गहइ, सेणं तत्थ उण्हंपि पविणिज्जा, तण्हंपि खुहंपि जरंपि दाहंपि पविणिज्जा निद्दाइज्ज वा पयलाइज्ज वा सइं वा धिइं वा रइं वा मइं वा उवलभिज्जा सीए सीयभूए सायासुखबहुलेयावि विहरिज्जत्ति ॥ ७७ ॥ तथा—

॥ मूलम् ॥—जेसीयनारया ते । इह हिमकुंडम्मि माहरयणीए ॥ सुत्ता निवायगिहिव । सीयमवणिंति तक्कालं ॥ ७८ ॥ व्याख्या—इह चतुर्थ्यां नरकपृथ्व्यां स्वल्पेषु, पंचम्यां च प्रभृतेषु अधस्तन्योर्नरकपृथ्व्योः सर्वेष्वपि नरकावासेषु नारका उष्णयोनावुत्पद्य मुहूर्तात्परतः शीतक्षेत्रं संक्रांताः शीतवेदनां वेदयंति. ते शीतवेदका नारकास्तत उद्धृत्यासत्कल्पनया इह मनुष्यलोके माघमासस्य रजन्यां रात्रौ हिमकुंडे स्थाप्यंते, ततस्ते तत्र सन्निहितज्वलल्लोहशकटीके दत्तकपाटसंपुटे निर्वातगृह इव सुप्तास्तत्कालं शीतमपनयंति. उ-

क्तं च तत्रैव—गोयमा! असप्नावपठवणाए सीयवेयणेहिं तो नेरइएहिंतो नेरइए उवट्टिए समाणे जाइं इमाइं इह मणुस्सलोए नवंति, तं जहा–हिमाणि वा, हिमपुंजाणि वा, हिमपमलाणि वा; हिमकुंभानि वा, ताइं पासइ पासइ ताइं उग्गहइ उग्गहइ. से णं तत्थ सीअंपि पविणिज्जा, खुहंपि पविणिज्जा, जाव उसिणे उसिणभूए सायासुखबहुलेयावि विहरिज्जत्ति. ॥ ७८ ॥ अथोपसंहारमाह—

॥ मूलम् ॥—किं बहुणा अवरकयं । खित्तनवं नारयाण जं दुक्खं ॥ तं जाणंतोवि जिणो । न सक्कए कहिउमन्नस्स ॥ ७९ ॥ व्याख्या—किं बहुनोक्तेन? स्वल्पाक्षरैरेव तावदुच्मः. नारकाणामपरैः परमाधार्मिकैः प्राग्नववैरिभिर्देवनारकादिभिर्वा कृतं अपरकृतं, तथा क्षेत्रानुनावाद्भवतीति क्षेत्रभवं च यद्दुःखं, तत्रापरकृतं कुंनीपचननत्राष्ट्रनर्जनवैतरण्यवतरणासिपत्रवननयनसर्वलोहरथवाहगृध्रपक्षिनक्षणव्योमोल्लालनत्रिशूलवेधनोष्णवालुकालोलनकरचरणकर्त्तनपट्टिशविदारणविरूपनाषणादिकं, क्षेत्रनवं तु कुणपादपि दुर्गंधायां, कुहरान्तरपि तमोमय्यां, क्रकचादपि दारुणस्पर्शायां नूमाववस्थानं, परमकालकठिनदुर्गंधदेहत्वं,

नित्यक्षुधित्वं, अनिष्टाहारोच्छ्वासत्वं च. तत्र क्षेत्रजन्तं सतस्वपि नरकपृथ्वीष्वपरकृतं तु षष्टिमेव यावदत्र परस्परकृता वेदना, तत्त्वतः परकृतैवेति न पृथगभिहिता. तत्तेषां दुःखं जिनः केवली सर्वज्ञतया जानन्नप्यन्यस्य कथयितुं न शक्नोति. आयुषः परिमितत्वाद्वाचः क्रमवर्तित्वाच्च. ततो यदि जिनोऽपि वक्तुं न शक्तस्ततः कथमस्मादृशैस्तदुच्येतेति गाथार्थः ॥७९॥ अथ प्रकृतमाह—

॥ मूलम् ॥—इय चिंतंतो नारय–दुहाइं तक्कारणेसु विसएसु ॥ अणुरायमबंधंतो । जिइंदिओ नणु मुणि होइ ॥ ८० ॥ व्याख्या—उत्तानार्था. तदेवमुक्त इंद्रियजयरूपः संयमः, संप्रति गुप्तित्रयात्मकं तं विवक्षुराह—

॥ मूलम् ॥—मणवयणकायजोगा । सुसंवुडा तिन्नि हुंति गुत्तीओ ॥ दिंति किर दुप्पउत्ता । एए दुक्खोहमक्खोहं ॥ ८१ ॥ व्याख्या—युज्यंते इति योगा मनोवचनकायलक्षणाः, सुष्टु आगमोक्तविधिना संवृत्ता अकुशलकर्मभ्यो निवर्तिताः कुशलकर्मणि प्रवर्तिता इत्यर्थः, त्रयो गुप्तयो भवंति. तत्र मनसः सुसंवृतत्वं मनोगुप्तिः, वचनस्य सुसंवृतत्वं वचनगु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्तिः, कायस्य सुसंवृतत्वं कायगुप्तिरिति. असंवृतत्वे प्रत्यपायमाह—किलेत्यागमोक्तौ, एते योगा दुःप्रयुक्ताः संतोऽक्षोज्नं दुर्निरोधं दुःखौघं ददाति. ॥ ८४ ॥ तत्र पूर्वं मनोगुप्तिमन्नि-धित्सुर्मनसः प्राधान्यमाह—

॥ मूलम् ॥—कम्माण वंधमुक्को । जं अणुयत्तंति मणपरीणामं ॥ तम्हा मणजो-गुच्चिय । गुरुउ तिएहंपि जोगाणं ॥ ८१ ॥ व्याख्या—यद्यस्मात्कारणादष्टानामपि कर्म-णां वंधमोक्षौ अन्वयव्यतिरेकाभ्यां मनस एव परीणाममनुवर्तते. तथाहि–मायाविनो दु-ष्टेन मनसा परस्य विश्वासनार्थं वचसामृतमपि किरतः, कायेन विनयादिकमप्याचरतोऽस्त्ये-व मायाप्रत्ययः कर्मबंधः. इत्यस्य पुनः सुप्रणिहितमनसः सुनृतं वक्तुकामस्य सहसात्कारा-दिनाऽसत्यमपि वदतो दयापरिणतस्य च सहसात्कारादिना जीवमपि घ्नंतो नास्ति तत्प्र-त्ययः कर्मबंधः. यदार्षं–उच्चालियंमि पाए । इरियासमियस्स संकमट्ठाए ॥ वावज्जेज्ज कुलिं-गी । मरिज्जंतं जोगमासज्ज ॥ १ ॥ न उ तस्स तन्निमित्तो । वंधो सुहुमोवि देसिउ समए ॥ अणवज्जो य पउगेण । सव्वभावेण सो जम्हा ॥ २ ॥ तस्मान्मनोयोग एव त्रिष्वपि योगेषु

अ चिं- गुरुः प्रधानः. उक्तन्यायेन तस्यैव बंधमोक्षौ प्रत्यंगरंगत्वात्. वाक्कायययोगयोस्तु गौणत्वादत एव
ताम.४ सुस्थचित्तस्य विषयान् गृह्णतोऽपि नास्ति दोष इत्याह—॥ ८१ ॥
९४९ ॥ मूलम् ॥—गिह्णंतु इंदियाइं । नियनियविसये न कोइ वारेइ ॥ जइ रागदोसकलुसि-
य-मेयं चिय होइ नो चित्तं ॥ ८२ ॥ व्याख्या—स्पष्टा, अत्र श्लोकः—न शक्यं रूपमद्र-
ष्टुं । चक्षुर्गोचरमागतं ॥ रागद्वेषौ तु यौ तत्र । तौ बुधः परिवर्जयेत् ॥ १ ॥ ८२ ॥ एतदेवाह—

॥ मूलम् ॥—जो तिव्वो कम्माणं । बंधो सो रागदोसनिम्माउ ॥ मायालोभो रागो ।
मच्छरमाणा भवे दोसो ॥ ८३ ॥ व्याख्या—इह प्रकृतिप्रदेशस्थित्यनुभागभेदाच्चतुर्धा कर्मणां
बंधः, तत्र प्रकृतिबंधः कर्मणां ज्ञानावरणादिस्वभावापादनं (१). प्रदेशबंधः स्वात्मप्रदेशावगा-
ढकर्मवर्गणांतर्गताऽभव्यानंतगुणसिद्धानंतगुणहीनपरमाणुनिष्पन्नानंतकर्मस्कंधग्रहणं (२.)
स्थितिबंधः कर्मणामंतर्मुहूर्तादिसप्ततिसागरोपमकोटाकोटिपर्यंतस्थितिविधानं (३). अनुभाग-
बंधः कर्मपरमाणूनां ग्रहणक्षण एव सुखदुःखविपाकहेतुमधुरकटुतिक्तादिरसत्वापादनरूपः
(४). एषु यः कश्चित्तीव्रश्चिरस्थितिकतया कटुरसतया च दुःखविपाकहेतुर्दुरपोहश्च कर्मणां

बंधः, स रागद्वेषनिर्मितो रागद्वेषोपचये उपचीयते, तदपचये त्वपचीयते इत्यर्थः. यद्यपि मिथ्यात्वाविरतिकषाययोगाः सामान्येन बंधहेतवोऽभिहितास्तथापि स्थितिबंधेऽनुभागबंधे च मुख्यतया कषाया एव व्याप्रियंते, मिथ्यात्वादयस्तु तत्सहकारणानि भवंतीत्यवमुच्यंते. यदागमः—जोगा पयडिपएसं ठिइ अणुभागं कसायाउ कुणइत्ति. ननु यदि कषायाः कर्मणां स्थित्यनुभागबंधहेतवस्ततो रागद्वेषयोः किमायातमित्यत्रोच्यते. नैवं, रागद्वेषयोः कषायात्मकत्वात्, तथा चाह–मायेत्यादि, एषु कषायेषु यौ मायालोभौ तौ राग इति व्यपदिश्येते. यौ च मत्सरमानौ क्रोधाहंकारौ तौ द्वेष इति. अयं भावः—प्रीत्यप्रीती हि रागद्वेषयोर्लक्षणं, ततश्च लोभोऽभिष्वंगात्मकत्वात्प्रीतिरूपः, मायामपि किंचिदभिलषन् प्रयुक्ते, अभिलाषश्च प्रीतिरूप इति, सापि प्रीत्यात्मिका. ततो मायालोभौ प्रीत्यात्मकत्वाद्रागः, तथा क्रोधोऽप्रीत्यात्मकः प्रतीत एव. मानोऽपि परगुणासहनत्वादप्रीत्यात्मकः. ततोऽप्रीत्यात्मकत्वादेतौ द्वावपि द्वेषः. एतत्संग्रहनयमतेनोक्तं. शेषनयविचारस्त्वत्र प्रज्ञापनावृत्तेरवसेयः. ततो रागद्वेषयोः कषायेभ्योऽभिन्नत्वात् कषायकृतौ कर्मणां

स्थित्यनुभागौ रागद्वेषकृतावपि प्रतिपत्तव्यौ. उक्तं च प्रज्ञापनायां–जीवाणं भंते नाणावर-णिज्जं कम्मं कइहिं ठाणेहिं बंधंति? गोयमा! दोहिं ठाणेहिं, तं जहा–रागेण य दोसेण य. रागे दुविहे पन्नत्ते, तं जहा–माया य लोभे य. दोसे दुविहे पन्नत्ते, तं जहा–कोहे य माणे य, इच्चे एहिं चउहिं ठाणेहिं वीरियउवग्गहिएहिं एवं खलु जीवा नाणावरणिज्जं क-म्मं बंधंति. एवं दंसणावरणिज्जं जाव अंतरायं. ॥ ८३ ॥ अथ रागद्वेषाभिभूतस्य मनसश्च-पलाद्भुतमालोक्य विस्मित इव प्राह—

॥ मूलम् ॥—लंघइ तरुणो गिरिणो य । लंघए लंघए जलनिहीवि ॥ भमइ सुरासुर-ठाणे । एसो मणमक्कडो कोइ ॥ ८४ ॥ व्याख्या—एष मनोमर्कटः कोऽप्यपूर्वः, यतो मर्क-टस्तरूनेव लंघते, मनश्च न केवलं तरूनेव लंघते, गिरींश्च मेर्वादीन् लंघते जलनिधीन् स-मुद्रानपि लंघते, भ्राम्यति च सुरासुरस्थानयोः स्वर्गपातालयोः, ततोऽपूर्वमेवास्य किमपि का-पेयमितीह सर्वेष्वपि वस्तुषु प्रायो मर्कटश्चपलतरो भवतीति तद्ग्रहणं ॥ ८४ ॥ अत एवे-दं दुर्दममित्याह—

॥ मूलम् ॥-- जिप्पई सुहेण वयणं । जिप्पंति सुहेण कायचिट्ठाउ ॥ पण डुज्जेयं अवगय । सुयसारस्सावि मणमिणमो ॥ ७५ ॥ व्याख्या—जीयते सुखेनानायासेन वचनं उष्टपुटमीलनेन स्वाध्यायादिना वा. कायचेष्टा अपि सुखेन जीयंते, आसनबंधेन वैयावृत्त्यादिव्यापृततया वा. पुनरिद साक्षादनुभूयमानं मनोवगतश्रुतसारस्यापि परिशीलितप्रवचनंरहस्यस्यापि मुनेर्डुर्जेयं चपलत्वात्. ॥ ७५ ॥ ततस्तज्जयोपायमाह—

॥ मूलम् ॥---ता तस्स थिरीकरणठ्ठ-मायरो जावणासु कायव्वो ॥ ता असुहाउ अणेगा । सुहाउ एवं दुआलसहा ॥ ७६ ॥ व्याख्या—उत्तानार्था, ता एवमाह—

॥ मूलम् ॥—अधुवाऽसरणेगत्ता-वरत्तजव असुइ आसवोवाए ॥ संवरनिज्जारधम्मे । लोगं बोहिं च जावेइ ॥ ७७ ॥ व्याख्या—एषा द्वारगाथा व्यक्तार्था. ॥ ७७ ॥ तत्र पूर्वमध्रुमवत्वभावनामाह—

॥ मूलम् ॥---सामित्तणधणजुव्वण-रइरूववलाउइट्ठसंजोगा ॥ अइलोला घणपवणा-हयपायवपक्कपत्तव्व ॥ ७८ ॥ व्याख्या --सुगमा, एवं समस्तजावानामध्रौव्यं जावयन् ध्रुवेज्यो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञानादिगुणेभ्य उपबन्मनःसमाधिं प्राप्नुयात्. ॥ ७७ ॥ अथ अशरणत्वनावनामाह—

॥ मूलम् ॥—पिउमाउजयणिजज्ञा-जमाण पच्चक्खमिक्खमाणाणं ॥ जीवं हरेइ मच्चू । पुण कोइ न होइ से सरणं ॥ ७ए ॥ व्याख्या—स्पष्टा, न वरं मृत्युरिह परजवायुरुदयः, न तु लोकप्रसिद्धो यम इति. एवं मरणाद्यापदि स्वमशरणं नावयन्नजरामरस्थानलानाय यतते. ॥ ७ए ॥ अथैकत्वनावनामाह—

॥ मूलम् ॥—गमणं आगमणं जम्म-णं च इक्कस्स होइ जीवस्स ॥ इक्को सुही दुही वा । इक्को चिय जाइ परमपयं ॥ ए७ ॥ व्याख्या—उत्तानार्था, नवरं गमनं नवांतरंप्रति, आगमनं च पूर्वजवात्. एवं वस्तुवृत्त्या स्वस्य सर्वत्रैकत्वं ध्यायन् धर्ममेवात्मनः सहायं कुर्यात्. ॥ ए० ॥ अथान्यत्वनावनामाह—

॥ मूलम् ॥—चिरलालियंपि देहं । जइ जियमंतंमि नाणुवट्टेइ ॥ ता तंपि होइ अन्नं । धणकणयाईण का वत्ता ॥ ए१ ॥ व्याख्या—पाठसिद्धा, नवरं "नाणुववट्टेइत्ति" नानुवर्तते जीवं गच्छंतं नानुगच्छतीत्यर्थः. एवं तनुधनस्वजनादिष्वन्यत्वं ध्यायन्न तेषु तात्विकं स्नेहं

For Private and Personal Use Only

विजूयात्. ॥ ९१ ॥ अथ नवन्नावनामाह—

॥ मूलम् ॥—जाइमिगं मुंचंतो । अवरं जाइं तहेव गिह्णंतो ॥ नमइ चिरं अविरामे । नमरोव्व जिउ नवारामे ॥ ९२ ॥ व्याख्या—व्यक्तार्था, नवरं जीवपक्षे जातिरेकेंद्रियादिका, भ्रमरपक्षे जातिर्मालती, सा हि भ्रमरस्य प्रायः प्रियातस्तद्ग्रहणं. उक्तं च–कलियामिसेण उ नेउं । अंगुलिं मालईइमहमहियं ॥ वारेइ जा समत्था । मइइंतं महुअरजीवाणं ॥ ॥ १ ॥ एवं हि नवभ्रांतीर्नावयन् भ्रमणनीरुस्तासु विरज्येत ॥९२॥ अथाशुचित्वनावनामाह–

॥ मूलम् ॥—मेयवसरेयमलमुत्त–पूरियं चम्मत्तेढियं तत्तो ॥ जंगममिव वच्चहरं । कह एयं सुरूए देहं ॥ ९३ ॥ व्याख्या—सुबोधा, नवरं, मेदः शरीरस्थूलत्वापादकोऽस्थिकृद्धातुः. वसा नलिकांतर्वर्ती स्नेहः. रेतो वीर्यं. एवं शरीरस्य नित्यमशुचित्वं चिंतयन् तत्पावित्र्यं व्यवहारमात्रेण कुर्वाणस्तात्त्विक्यै विशुद्धये जंतुरुद्यच्छेत्. ॥९३॥ अथाश्रवनावनामाह–

॥ मूलम् ॥—मिच्छत्ताविरइकसाय–जोगहेऊहिं हेउं अणुरूवं ॥ जं कम्मपुग्गलाणं । गहणं सो आसवो होइ ॥ ९४ ॥ व्याख्या—इहाश्रवस्य सामान्यतो मिथ्यात्वाविरतिकषा-

यथोगलक्षणाश्चत्वारो हेतवः, विस्तरतस्तु सप्तपंचाशत्, तथाजिग्रहिकामाजिग्रहिकाजिनिवेशिकसांशयिकानाजोगिकनेदात्पंचधा मिथ्यात्वं. षट्कायारंजान्मनइंद्रियासंयमाच्च द्वादशधाऽविरतिः. अनंतानुबंधिक्रोधादयः षोडश प्रागुक्ताः पुंस्त्रीनपुंसकनेदाद्वेदास्त्रयः. हास्यरत्यरतिशोकजयजुगुप्साश्चेति पंचविंशतिः कषायाः. सत्यासत्यसत्यामृषाऽसत्यामृषामनोवचनौदारिकौदारिकमिश्रवैक्रियवैक्रियमिश्राहारकाहारकमिश्रकार्मणनेदात्पंचदश योगाः, सर्वेऽप्यमी सप्तपंचाशदाश्रवहेतवः. पंचेंद्रियचतुष्कषायपंचाव्रतत्रियोगपंचविंशतिक्रियानेदादमी द्विचत्वारिंशदप्युच्यंते. एतैर्मिथ्यात्वादिजिर्हेतुजिर्हेत्वनुरूपं, हेतुप्राबल्ये प्रबलं, तद्दौर्बल्ये स्वल्पं यत्कर्मपुजलानां ग्रहणमादानं क्रियते, स आश्रवो जवति. एवमाश्रवद्वाराणां कर्मबंधहेतुतां जावयंस्तत्पिधानाय यतेत. ॥ ए४ ॥ अथ संवरजावनामाह—

॥ मूलम् ॥ आसवहेउपिधानं । सम्मत्ताइहिं संवरो नेउ ॥ पिहियासवो हि जीवो । सुत्तरिव तरेइ जवजलहिं ॥ ए५ ॥ व्याख्या—सम्यक्त्वमादिर्येषां विरतिप्रशमगुप्तीनां, तैः सम्यक्त्वादिजिः प्रकारैर्यत्पूर्वोक्तानामाश्रवहेतूनां मिथ्यात्वादीनां पिधानं स्थगनं स संवरो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञेयः. संवरस्य फलं साक्षादाह–पिहिताश्रवो हि जीवः सुतरीव तरति जवजलधिं, यथा तरी स्थगितजलप्रवेशद्वारा सुखं जलधिं तरतीति योगः. ॥ ९५ ॥ अथ निर्जराजावनामाह–

॥ मूलम् ॥—कम्माण पुराणाणं । निकंतणं निज्जरा दुवालसहा ॥ विरयाण सा सकामा । तहा अकामा अविरयाणं ॥ ९६ ॥ व्याख्या—पुराणानां प्राग्बद्धानां कर्मणां तपसा निकर्त्तनं छेदनं निर्जरेत्युच्यते. बध्यमानकर्मविषयः संवरः प्राग्बद्धकर्मविषया च निर्जरेत्यनयोर्जेदः. इयं च द्वादशधा. बाह्यस्याज्यंतरस्य च तपसः षड्जेदत्वात्. तत्र बाह्यं तपः षोढा यथा–अणसणमुणोयरिया । वित्तीसंखेवणं रसच्चाउ ॥ कायकिलेसो संलीण–या य बज्झो तवो होइ ॥ १ ॥ तत्रानशनमाहारत्यागः, तद् द्विधा, इत्वरं यावत्कथितं च. तत्रेत्वरं चतुर्थादिषण्मासांतं, यावत्कथितं तु पादपोपगमनेंगितमरणजक्तपरिज्ञाजेदात् त्रिधा. तथा ऊनोदरता. बत्तीसं किर कवला । आहारो कुच्छिपूरिउ जणिउ ॥ पुरिसस्स महिलयाए । अट्ठावीसं जवे कवला ॥१॥ इत्येवंरूपस्य स्वाहारमानस्य संक्षेपात्पंचधा, तद्यथा–अप्पाहारदिवड्ढा । डुभागपत्ता तहेव किंचूणा ॥ अट्ठ दुवालस सोलस–चउवीसिगतीसकवलेहिं ॥२॥ तथा वृत्तेर्भिक्षाच-

र्याया: संक्षेपो द्रव्याद्यभिग्रहविशेषैः संकोचनं वृत्तिसंक्षेपः. तथा रसाः क्षीरादयस्तत्परिहारो रसत्यागः. तथा कायस्यासनबंधेन लोचादिना वा कष्टकरणं कायक्लेशः. स्त्रीपशुपंडकादिवर्जितस्थानेऽवस्थानं संलीनता एतत्तपः क्रियमाणं लोकेनापि ज्ञायते, कथंचित्कुतीर्थिकैरपि क्रियते, इति बाह्यमुच्यते.

अथाभ्यंतरं षोढा यथा—पायच्छित्तं विणओ । वेयावच्चं तहेव सज्झाओ ॥ झाणं उस्सग्गोवि य । अभ्भंतरओ तवो होइ ॥ १ ॥ तत्र प्रायश्चित्तं दशधा, आलोचनाभेदात्, यदाह—आलोयणपडिक्कमणे । मीसविवेगे तहावि उस्सग्गे ॥ तवछेयमूलअणव—ट्ठिया य पारंचिए चेव ॥ १ ॥ विनयो ज्ञानादिभेदात्सप्तधा, नाणे दंसणचरणे मणवइकाउवयारिउ विणउत्ति. वैयावृत्यं आचार्यादीनामन्नपानादिसंपादनविधौ व्यापृतत्वं. यदाहुः—आयरिय उवज्झाए । थेरतवस्सीगिलाणसेहाणं ॥ साहम्मियकुलगणसंघ—संगयं तमिह कायव्वं ॥ १ ॥ स्वाध्यायो वाचनादिर्वक्ष्यमाणः पंचधा, ध्यानं धर्मं शुक्लं च, तत्स्वरूपं यथा—सूत्रार्थसाधनमहाव्रतधारणेषु । बंधप्रमोक्षगमनागमहेतुचिंता ॥ पंचेंद्रियव्युपरमश्च दया च भूते । ध्यानं तु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्म्यमिति संप्रवदंति तदृज्ञाः ॥ १ ॥ यस्येंद्रियाणि विषयेषु पराङ्मुखानि । संकल्पकल्पनविकल्पविकारदोषैः ॥ योगैः सदा त्रिजिरहो निभृतांतरात्मा । ध्यानोत्तमं प्रवरशुक्लमिदं वदंति ॥ २ ॥ उत्सर्गो द्रव्यतो गणशरीरोपध्याहारत्यागात्, भावतः क्रोधादित्यागात्. एतत्तपो लोकैरनजिलक्ष्यत्वात्तन्त्रांतरीयैश्च सम्यगनासेव्यमानत्वान्मोक्षप्राप्त्यंतरंगत्वाच्चाज्यंतरमित्युच्यते. इयं द्वादशधापि निर्जरा विरतानां विरतिपरिणतानां सकामा, सह कामेनासेवनाजिलाषेण वर्तते इति व्युत्पत्तेः. तथाऽविरतानां विरतिपरिणामरहितानां दारिद्र्यादिहेतुजिः स्वयमेव जवति सा निर्जरा अकामा जवति. निर्जरां हि जावयन् सकामनिर्जराप्रवृत्त्या चिरबद्धान्यपि कर्माणि निर्जीर्येदिति. ॥ ८६ ॥ अथ धर्मजावनामाह—

॥ मूलम् ॥—धम्मो जिणेहिं निरुवहि-उवयारपरेहिं सुठु पन्नत्तो ॥ समणाणं समणो वा-सयाण दसहा डुवालसहा ॥ ८७ ॥ व्याख्या—स्पष्टा, नवरं श्रमणानां धर्मो दशधा क्षांत्यादिर्वक्ष्यमाणः. धर्मजावनां हि जावयन् शुजानुबंधि सत्कर्म संचिनुयात्. ॥ ८७ ॥ अथ लोकजावनामाह—

उप. चिं- ॥ मूलम् ॥—अहमुहगुरुमल्लयठिय-लहुमल्लयजुअलसंठियं लोगं ॥ धम्माइयं च द-
ताभा. ४ व्वेहिं । पूरियं मणसि चिंतिज्जा ॥ ८८ ॥ व्याख्या—अधोमुखमवाङ्मुखं गुरु बृहत्प्रमाणं
९५० मल्लकं शरावस्तस्योपरिस्थं लघु, अधस्तनमल्लकापेक्षयाऽल्पप्रमाणं मल्लकयुगलं शरावसंपुटं, तद्वत्संस्थितं संस्थानं यस्य तं. अधोमुखगुरुमल्लकस्थितलघुमल्लकयुगलसंस्थितं लोकं मनसि चिंतयेत् इदमुक्तं भवति—अधस्तनलोकतलात् सप्तरज्जुविस्ताराद्धूर्ध्वं शनैः शनैः संकुचन् लोकस्तिर्यग्लोके एकरज्ज्वायतो भवति. ततोऽप्यूर्ध्वं क्रमेण विस्तारं भजन् ब्रह्मलोकतृतीय-प्रस्तटे पंचरज्ज्वायतो भवति. ततश्च पुनः शनैः शनैः संक्षेपं भजन् सर्वोपरितने लोकाग्रप्र-देशप्रतरे रज्जुप्रमाणो भवति. ततो भवति यथोक्तसंस्थानो लोकः. कथंभूतं लोकं? धर्मादि-भिः पंचभिर्द्रव्यैः पूरितं. तत्र स्वभावतो गतिप्रवृत्तानां जीवपुद्गलानामुपष्टंभकारी. मत्स्यानां जलमिव धर्मास्तिकायः. एवं स्थितिरतानां तेषामुपष्टंभदायी पथिकानां छायेवाऽधर्मास्तिका-यः. एतौ च द्वावपि लोकालोकव्यवस्थाहेतू प्रदेशतः प्रमाणतश्च लोकाकाशतुल्यौ. तथा एतेषामेव स्थितिगतिप्रवृत्तानामवकाशदानादवगाहनधर्माकाशास्तिकायः. तथा चेतना ल-

For Private and Personal Use Only

हृणः कर्मणां कर्ता भोक्ता च जीवनधर्मा जीवास्तिकायः. तथा भूभूधराभ्रादिसमस्तवस्तूनां परिणामिकारणं पूरणगलनधर्मा पुद्गलास्तिकायः. एतेष्वाद्याश्चत्वारोऽमूर्ताः, अंत्यस्तु मूर्तः. जीववर्जाः सर्वेऽप्यचेतनाः. एतैः पंचभिर्द्रव्यैः पूरितोऽयं लोकः. न हि स कश्चिदेकोऽपि प्रदेशो लोके विद्यते यत्र धर्माधर्माकाशानामेकैकः प्रदेशो जीवपुद्गलानां चानंताः प्रदेशाः स्वस्वरूपेण नावतिष्टंत इति. अत्र च मनुष्यक्षेत्रे एव वर्तिष्णुत्वात् षष्टस्य कालद्रव्यस्य ग्रहणं न कृतं. एवं हि लोकस्वरूपं भावयन् धर्मध्याने स्थैर्यं लभते. यदार्षं—खिइवलयदीवसायर–नरयविमाणभवणाइसंठाणं ॥ वासाइपइठाणं । निययं लोगठिइविहाणं ॥ १ ॥ धर्मध्यानी ध्यायेदिति शेषः. ॥ ए७ ॥ अथ बोधिभावनामाह—

॥ मूलम् ॥—पंचिंदियत्तणाइय–सामग्गीसंभवेवि अइदुलहा ॥ तत्तावबोहरूवा । बोही सोहि जियस्स जउ ॥ एए ॥ व्याख्या—प्रकटार्था, नवरं यतो यस्माद्बोधेर्मिथ्यात्वपंककलुषस्य जीवस्य शोधिर्भवति. एवं बोधेर्दुर्लभतां भावयन् धनांगनादिव्यतिरेकेण बोधिलाभमेव प्रार्थयेत्. ॥ एए ॥ अथोपसंहरन्नाह—

॥ मूलम् ॥—भाविज्जंतं इह भा-वणाहिं कल्लाणसाहणं होइ ॥ चलरसचलंपि चित्तं । पसन्नचंदस्सव जईणं ॥ १०० ॥ व्याख्या— यतीनां मुनीनां प्रसन्नचंद्रस्य राजर्षेरिव चेतश्च-लरसवलमपि पारदवच्चपलमपि, इति पूर्वोक्ताभिर्भावनाभिर्भाव्यमानं सत् कल्याणसाधकं पुण्यानुबंधि भवति. चलरसोऽपि गुरुगम्याभिर्भावनाभिर्भाव्यमानः पीतधातोः साधको भव-तीति संटंकः. ॥ १०० ॥ प्रसन्नचंद्रदृष्टांतस्त्वयं—अथ प्रसन्नचंद्रराजर्षिकथा—

सत्कोटिपात्रमस्त्यत्र । पोतवत्पोतनं पुरं ॥ यत्क्रोडे परिचिक्रीडे । लक्ष्मीरंभोधिसंभवा ॥ १ ॥ भूपस्तत्र बभौ सोम-चंद्रो निस्तंद्रविक्रमः ॥ तस्य शीलद्रुमाराम-धरणी धारिणी प्रिया ॥ २ ॥ प्रसन्नचंद्र इत्यासी-त्तनयः सत्कृतिस्तयोः ॥ नालीकस्थोऽपि यः क्वापि । नापुष-त्कलंहंसतां ॥३॥ कदापि कुर्वती वेणी-बंधे भूधवमूर्द्धनि ॥ दृष्ट्वैकं पलितं राज्ञी । बभाषे दूतमागतं ॥४॥ इतस्ततस्ततः पश्य-न्नपश्यन् दूतमग्रतः ॥ धारिण्या भूपतिः प्रोचे । विस्मितः स्मितपूर्वकं ॥५॥ संदेह इव सिद्धांते । शुद्धांते तव किं नृप ॥ दूतो विशति तद्दूतं । पश्यामुं पलिताभिधं ॥६॥ सकर्णः कर्णपार्श्वस्थो । न्यग्भूतो वक्त्यसौ तव ॥ संप्राप्तैव जराधाटी । विरम क्ष्माप पापतः ॥ ७ ॥ वि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षष्ठोऽथ नृपोऽध्याय-दहो मोहादचेतसः ॥ पदं मूर्ध्नि ममाधत्त । पलितछलतो जरा ॥ ८ ॥ यन्मूर्ध्नि कृष्णचिकुरप्रकराब्दगम्या । प्रावृट् न बोधरविरेषु विज्ञाति युक्तं ॥ येषां पुनः पलितकाशविकाशसारा । श्रीः शारदी स्फुरति तेष्वधिकं न किं सः ॥ ९ ॥ वैरिणी दुर्निवारेयं । पुत्रमित्रजटैरपि ॥ रूपं विनाशयत्येव । पलितं करिणी जरा ॥ १० ॥ भुक्ता भोगाः कृतं राज्यं । जातश्च तनयो मम ॥ गततारुण्यपूरस्य । सांप्रतं सांप्रतं व्रतं ॥ ११ ॥ एवं चिंतातुरं भूपं । सहास्यं धारिणी जगौ ॥ हृतकोश इव स्वामिन् । किं जरां वीक्ष्य खिद्यसे ॥ ॥ १२ ॥ जरानिगूहनोपायं । वच्मि नाथ यथातथं ॥ पलितं भ्रमयित्वैत-त्पुरे घोषय सर्वतः ॥ १३ ॥ लोकाः शृणुत यः कश्चि-देवं धवलमूर्धजं ॥ वदत्यति क्षितिपं वृद्धं । स ध्रुवं दंडयिष्यते ॥ १४ ॥ राजदंडभयादेवं । कश्चिद्वक्ता न ते जरां ॥ वीतशंकस्ततो भोगान् । भुंजीथा भूप भूरिशः ॥ १५ ॥ भूपः प्रोचे प्रिये हास्यं । किमकांडे विधीयते ॥ जरां कालक्रमायातां । वीक्ष्य वैलक्ष्यमेति कः ॥ १६ ॥ अदृष्टपलिता एव । पूर्वजाः प्राग्जन्मम ॥ अहं तु पलिते दृष्टे । गृहेऽस्मीति त्रपाकरं ॥ १७ ॥ जगाद धारिणी स्वामि-न्नेषा खेदप्रथा वृथा ॥ स-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मयोऽस्ति समर्थस्या-द्यापि प्रव्रजितुं तव ॥ १८ ॥ अथ राज्ञ्याप्यनुज्ञातः । पुत्रं राज्येऽभि-
षिच्य सः ॥ आदाय तापसीं दीक्षां । प्राप भूपस्तपोवनं ॥ १९ ॥ मा च्योष्ट मे हृदीशेन ।
सह यानमनोरथः ॥ इत्यज्ञापितगर्भैव । राज्ञी तमनुजग्मुषी ॥ २० ॥ दधतोः सोदरस्नेहं ।
जन्मांतरितयोरिव ॥ जंपतीप्रेम तुत्रोट । तत्रोटजगयास्तयोः ॥ २१ ॥ तत्रासूत सुतं राज्ञी ।
धर्मबुद्धिरिवोज्ज्वलां ॥ प्रसूः प्रसूतिरोगार्त्या । व्यपद्यत तदैव सा ॥ २२ ॥ अवाप्य चंद्रदे-
वीत्वं । देवी प्रेमवशंवदा ॥ बालं तं सैरिभीभूया-रण्ये स्तन्यमपीप्यत ॥ २३ ॥ तस्य राज-
कुमारस्य । वने वल्कलवाससः ॥ नाम वल्कलचीरीति । रीतिज्ञैस्तापसैर्ददे ॥ २४ ॥ वर्द्धमा-
नः स्वकैः पुण्यै-स्तारं तारुण्यमाप सः ॥ शशी शैत्यमिव ग्रीष्मे । जहौ मौग्ध्यं तदापि न ॥
॥ २५ ॥ स प्रीतः स्वयमानीतै-र्दलैः पुष्पफलैर्जलैः ॥ पितरं तर्पयामास । जरसा जर्जरौजसं
॥ २६ ॥ वनं प्रसन्नचंद्रोऽथ । प्रणंतुं पितरं गतः ॥ अनुजं यौवनोद्भेद-सुभगं तमवैक्षत ॥
॥ २७ ॥ अचिंतयच्च बालोऽयं । सोमलः सहते हहा ॥ वनवासव्यथा ज्येष्ठ-बंधौ राज्यधरे-
मयि ॥ २८ ॥ भेजे पित्रोचितं कीर । दारुणातपसेवनं ॥ बाल्येऽप्यसौ किं कुरुते । दारुणा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तपसेवनं ॥ २९ ॥ पितुस्तपोनिधेः क्रोडे । पारींद्रस्येव संस्थितं ॥ न सूरोऽप्येनमाक्रुष्टु-मीष्टे कश्चित्करोमि किं ॥ ३० ॥ इत्यंतरुल्लसच्चिंता-धूमरीधूसराननः ॥ पुनः स्वजनं प्राप । नृपः कृपणनैपुणः ॥ ३१ ॥ अध्यासीनं सज्जामध्य-मध्यात्मव्यथयाकुलं ॥ पप्रच्छुर्वारवनिता । विनयावनता नृपं ॥ ३२ ॥ देवाद्य किं न ते वश्याः । संति शुद्धांतयोषितः ॥ किं वा कन्या सलावण्या । कापि क्वापि निरीक्षिता ॥ ३३ ॥ प्रोक्ते राज्ञा स्वदुःखेऽथ । ताः प्रोचुर्यौवनोन्मदाः ॥ तत्तद्बुद्धिमयीरस्मा-नेवात्रार्थे नृपादिश ॥ ३४ ॥ ग्रहीतुं तास्ततो राजा-ज्ञया वल्कलचीरिणं ॥ धूर्तविद्या इवांगिन्यो । रथारूढाः प्रतस्थिरे ॥ ३५ ॥ रथेषु शर्कराखंड-मत्संडीमोदकादि च ॥ पीयूषरसनिष्पंदे-नेव निष्पादितं न्यधुः ॥ ३६ ॥ जग्मुश्च तत्र यत्रास्ति । सोमचंद्रो महामनाः ॥ नाविशंश्च वनं राज-समाजं सरमा इव ॥ ३७ ॥ प्रतीक्षमाणाः परितो । वनं वल्कलचीरिणं ॥ तस्थुर्मूर्ध्नि तरोर्न्यस्य । चरं ताश्चौरचर्यया ॥ ३८ ॥ जस्मापहुत देहद्यु-जटावांस्तावदाययौ ॥ फलाभिलाषी बालर्षिः । स मुग्धमृगवद्भ्रमन् ॥ ३९ ॥ ऋषीमानी मनुष्येषु । स्त्रीपुंसव्यक्तिरिक्तधीः ॥ ताताभिवादयामीति । प्रत्येकं सोऽभ्यधत्त ताः

For Private and Personal Use Only

॥ ४० ॥ इत्यलौकिकमालोक्य । विनयं तस्य विस्मिताः ॥ मिथः प्रथितहास्यं ताः । स्वं स्वे-
नैव न्यवारयन् ॥ ४१ ॥ ताभ्यः फलानि वन्यानि । विनीतः सोऽदुढौकत ॥ वर्ण्यतेऽतिथि-
पूजातो । नान्यत्पुण्यं तपस्विभिः ॥ ४२ ॥ चर्वं चर्वं शठास्तास्ता-न्यरसानीति तत्यजुः ॥ नू-
रिखंमानखंमान-प्यदुस्तस्मै च मोदकान् ॥ ४३ ॥ तानास्वाद्य सुधास्वादून् । व्याचष्ट स
पुनः पुनः ॥ न ऋजुस्तस्य जिह्वा सा । रसज्ञेति श्रुता यतः ॥ ४४ ॥ रसगृद्धः स ताः प्रोचे ।
मुनींद्रा आश्रमः क्व वः ॥ मत्पितुर्जरिणो योग्या । क्व त्या चेयं फलावली ॥ ४५ ॥ अहो ज-
टा सुललिता । नवतां जाति मूर्द्धसु ॥ सौकुमार्यमकल्केषु । वल्केष्वप्यहहोल्वणं ॥ ४६ ॥
युष्माकमंगरागोऽयं । दिशः सुरभयत्यहो ॥ अहो बालदुसेकार्थौ । कलशौ वः स्थितौ हृदि
॥ ४७ ॥ कथं हृदीव मालिन्यं । मुखेऽपि श्मश्रुणा न च ॥ किं वायं वदने रागो । वैरी वै-
राग्यशालिनां ॥ ४८ ॥ पाणिपादश्रवोमूर्ध्नि । स्थितोऽपि न दहत्ययं ॥ यत्कृशानुः प्रदीप्तोऽपि
। तदेतद्धि तपोबलं ॥ ४९ ॥ अथ ता जगदुर्वीणा-क्वाणप्राणहरस्वराः ॥ वयमध्यास्महे
बाल-ऋषे श्रीपोतनाश्रमं ॥ ५० ॥ फलश्रेण्यानया तत्र । नित्यं कल्पितपारणाः ॥ कुर्मः क्र-

मागतं कर्म । कलाकेलिगुरोर्गिरा ॥ ५१ ॥ जटावल्कलरागाद्यं । तत्रेदृग्न च दुर्लभं ॥ वक्त्य-
त्व वदने रागो-ऽनुरागं त्वयि वीक्षिते ॥ ५२ ॥ आश्रमाः संति भूयांसो । न पुनः पोतनो-
पमाः ॥ ऋषयोऽस्मादृशा यत्र । सरागा अपि निर्वृताः ॥ ५३ ॥ तत्र पुत्र त्वमागच्छेः । का-
र्यमेभिः फलैर्यदि ॥ वेत्ति नानारसान् भूरि-भ्रमिर्भ्रमरवन्नरः ॥ ५४ ॥ स जगाद तदा गूढं
। द्रुमारूढचरश्च ताः ॥ रेरे श्रीसोमचंद्रर्षि-रेति नश्यत नश्यत ॥ ५५ ॥ ता अनेशन्नृपेर्जी-
ता । निहाका इव विद्युतः ॥ मुक्त्वा बालं रथेनाशु । ततो निर्व्याजवाजिना ॥ ५६ ॥ अ-
वाप्य स्वपुरं जात-जीविताशा नरेश्वरं ॥ ह्रिया भिया च नम्रास्या-स्तत्स्वरूपमजिज्ञपन्
॥ ५७ ॥ ततः शतगुणां पीडां । दधानो वसुधाधवः ॥ मग्नः शोकोदधौ कष्टं । गमयामास
वासरान् ॥ ५८ ॥ स चैकाकी जरी तातः । स च भ्रातोन्नयच्युतः ॥ खादच्चक्रे शल्यवत्तस्य ।
शश्वदेतद्द्वयं हृदि ॥ ५९ ॥ सोऽपि बालऋषिर्भावं-स्तत्प्राणिक्यमवाप्नुवन् ॥ बभ्राम कान-
ने यूथ-भ्रष्टभल्लूकवच्चिरं ॥ ६० ॥ पितुर्गृहान्नयन्नारीं । निजग्रामं नरः पुरः ॥ तेनादर्शि र-
थारूढः । कोऽपि निःकोपचेतसा ॥ ६१ ॥ तातान्विवादयामीति । ववंदे दंपती स तौ ॥ ज-

हास कामिनी तस्या-नुचितादुपचारतः ॥ ६२ ॥ ऋषिरेष ऋजुर्वन्यो । न परिहासमर्हति ॥ निषेध्येति नरः पत्नीं । क यासीति मुनिं जगौ ॥ ६३ ॥ पोतनाश्रमपांथोऽह-मित्युक्ते मुनिनोन्मनाः ॥ स जगाद तदेहीति । मयाप्यत्रैव गम्यते ॥ ६४ ॥ ऋषिः पथि रथे वीक्ष्य । वाहवाहनमभ्यधात् ॥ निस्तूंशेनेव वाह्येते । किमेतौ हरिणौ त्वया ॥ ६५ ॥ एषोऽस्मदाश्रमाचार । इत्युक्त्वा मोदकानसौ ॥ सुधासमधिकस्वादां-स्तस्यादाद् दृढसौहृदः ॥ ६६ ॥ तत्स्वादवर्धिताह्लादः । स प्रोचे वेद्म्यहं मुने ॥ फलान्येतानि तान्येव । यानि ते तापसा ददुः ॥ ६७ ॥ पथि प्रादुरभूत्तस्य । चौरः क्रूरतरः पुरः ॥ रथी विजित्य तं तस्या-दत्तार्जितचिरं धनं ॥ ६८ ॥ निरजैषमसज्जोऽपि । यदेनं स्तेननायकं ॥ महिमा सोऽयमस्यैव । ऋषेरित्युन्निनाय सः ॥६९॥ प्रीतस्तं स्वरथे न्यस्य । स ययावुपपोतनं ॥ गुणक्रीतमिवामुष्मै । स्वर्णखंडमदत्त च ॥ ७० ॥ स्वर्णादग्निधिया त्रस्य-न्मुनिस्तेनाभ्यधीयत ॥ मा भैस्तपोभिरास्माकैः । प्रज्वलत्येष नानलः ॥ ७१ ॥ अमी त्वामाह्वयंतीव । पोतनाश्रमपादपाः ॥ चलद्दलकरैः संध्या-मिलद्भृंगजकूजितैः ॥ ७२ ॥ अत्रामुना विना प्रायो । वासस्थानं न लभ्यते ॥ इत्यस्मै

कांचनं दत्वा । स्वग्रामंप्रति सोऽचलत् ॥ ७३ ॥ परिखाविशिखावप्र-सन्नाशोभां निन्नालयन् ॥ विवेशांतःपुरं सायं । नूपाल इव भूपनूः ॥ ७४ ॥ चलध्ध्वजपटव्याजा-न्नृत्यंतीव तदागमे ॥ वेश्यावेश्मानि नगर-प्रवेशे प्रददर्श सः ॥ ७५ ॥ जीवन्नेव तपोन्निः किं।लंन्नितोऽस्मि त्रिविष्टपं ॥ प्रविशंस्तेषु वेश्मैकं । स मुनिर्दध्यिवानिति ॥ ७६ ॥ गौरांगीर्गणिकास्तत्र । वीक्ष्याऽन्नरणन्नासुराः॥ ऋषींस्ताणोंटजावास-दग्धदेहान्निनिंद सः ॥ ७७ ॥ कांचिद्भद्रासनासीनां । सोऽन्निवादनपूर्वकं ॥ दत्वा तत्कांचनं वेश्यां । वासस्थानमयाचत ॥ ७८ ॥ गणिका गणकोक्ताय । तस्मै दित्सुर्निजांगजां ॥ विवाहस्याथ सामग्रीं । स्वचेटीन्निरकारयत् ॥ ७९ ॥ निषिध्यतोऽपि तस्य स्वं । वेणीदंम् प्रदर्श्य सा ॥ मस्तके विन्नूणोतिस्म । वटपादोपमां जटां ॥ ८० ॥ स्नानांगरागन्नूषाद्यं । विश्वं वारवधूकृतं ॥ अस्याश्रमस्य कल्पोऽय-मित्यसौ बहुमन्यत ॥ ८१ ॥ अरुचिर्विषयज्ञाता-नन्निज्ञोऽपि व्यवाह्यत ॥ शमी शमीमिवाश्वत्थः । स तान्निर्निजकन्यकां ॥ ८२ ॥ विवाहे तत्र यस्तान्नि-र्वाद्यो लूलुध्वनिः कृतः ॥ जाग्रता बंधुवैधुर्या-न्निशि सोऽश्रावि नूनुजा ॥ ८३ ॥ दध्यौ नृपतिरप्येवं । सपौरे मयि दुःखिनि ॥ कस्यायं श्रीमतः प्री-

ति–संगी संगीतकध्वनिः ॥ ८४ ॥ राज्ञानुज्ञातुमादिष्टो । नृत्यः शब्दानुसारतः ॥ ययौ तदेव वेश्यौकः । शब्दवेधीव सायकः ॥ ८५ ॥ गणिकां सोऽन्यधान्मुग्धे । शुचा दग्धेऽद्य नृपतौ ॥ ज्वलति ज्वलने शैत्य–मिव कोऽयं तवोत्सवः ॥ ८६ ॥ सापि वाचां विशेषज्ञो–वाच तं रचितांजलिः ॥ प्राग् जामातृचिंतार्ता । कोऽपि कार्तांतिको जगौ ॥ ८७ ॥ अत्रैपैति शिशुः सायं । यः कश्चिन्मुग्धतापसः ॥ स्वर्णरेखां कषस्येव । तस्य दद्याः स्वनंदिनीं ॥ ८८ ॥ सोऽद्य सायं समायासी–दाहूतो मन्मनोरथैः ॥ क्रियमाणोऽस्ति वीवाहे । तस्यास्तदयमुत्सवः ॥८९॥ जानेऽहं भूपतेर्दुःखं । जाने रोषं च भूपतेः ॥ अंतरात्मा तु नापत्य–स्नेहार्त्तो गणयत्यदः ॥ ॥ ९० ॥ एतत्सर्वं नरेंद्राय । नत्वा नृत्योऽन्यधत्त सः ॥ स एवायं कदापि स्या–दिति नृपोऽप्यमोदत ॥ ९१ ॥ सूर्ये तदाशयोदस्त । इव प्रातः समुन्नते ॥ यैः कुमारो वने दृष्ट–स्तैरेत्यावादि नृपतेः ॥ ९२ ॥ नृप रूपवतीसीमां । वेश्याभिः प्राभृतीकृतां ॥ परिणीय कनीमत्र । बंधुर्विजयते तव ॥ ९३ ॥ आनानयद्वधूयुक्तं । नृपः संसदि सोदरं ॥ जिष्णुर्विष्णुमिव प्रीत्या । तमायातं स सस्वजे ॥ ९४ ॥ अशिक्ष्यत विलासौघं । निपुणैः स नृपाज्ञया ॥ अवि-

रारकलिकोन्नेदं । चूतश्चैत्रदिनैरिव ॥ ९५ ॥ उद्गूढानेकनूपाल-बालाश्वटुलचेतसः ॥ तस्या-
तिचक्रमुर्यामा । इव द्वादश वत्सराः ॥ ९६ ॥ निशाशेषेऽन्यदा दध्यौ । कुमारो धिग्मया व-
ने ॥ एकाकी जोगगृह्धेन । मुक्तस्ताततोऽपि वैरिवत् ॥ ९७ ॥ शिष्यो गुरोरिवामुष्य । कः फ-
लान्युपनेष्यते ॥ को जलैः सेव्यते वाला-रामं तत्वमिव श्रुतैः ॥ ९८ ॥ अर्नकानिव विश्व-
स्ता-न्निवारांजलिदानतः ॥ प्रीणयिष्यति को बाल-मृगानुटजचारिणः ॥ ९९ ॥ क तन्मे कुं-
जरस्येव । सुखं वनविहारजं ॥ केदं राजगृहस्थस्य । नारीजंजीरबंधनं ॥ १०० ॥ अथ जा-
स्वति तच्चिंता-तमो जेत्तुमिवोदिते ॥ तातपादाब्जसेवायै । स नरेंद्रं व्यजिज्ञपत् ॥ १ ॥
राजा प्रसन्नचंद्रोऽपि । पितुर्मिलनमुत्सुकः ॥ चचालाल्पपरीवारः । सह वल्कलचीरिणा ॥२॥
इतश्च सोमचंद्रर्षि—स्तदारण्ये भ्रमन् भ्रमन् ॥ अपश्यन्नेत्रपीयूष-सत्रं पुत्रं न्यवर्त्तत ॥ ३ ॥
रोदं रोदं चिरं डुःखा-दंधीनूतेक्षणः क्षणं ॥ वर्षवत्क्रमयन्निन्ये । सोऽपि द्वादशवत्सरीं ॥४॥
ततः प्रसन्नचंद्रेण । निस्तंद्रेण सबंधुनां ॥ संस्थाप्य परितः सैन्यं । मध्येऽरण्यमगम्यत ॥ ५ ॥
कच्चिन्नारंग रंगस्ते । कृशोऽसि त्वमशोक किं ॥ किं माद्यसि माकंद । स कोदुंबर रुंबर ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ६ ॥ आलाप्यैवं कुमारेंद्रो । नागरानिव पार्थिवः ॥ हर्षाश्रुधारयासिक्त । पुरापरिचयांस्त-
रून् ॥ ७ ॥ पुरस्तौ दृक्क्रियाशून्यं । सेव्यमानं जरन्मृगैः ॥ हस्तन्यस्ताक्षमालाकं । वृद्धं तात-
मपश्यतां ॥ ८ ॥ समादाय निजं नाम । प्रणामपरयोस्तयोः ॥ संस्पृश्य पाणिना पृष्टं । ददौ
राजर्षिराशिषं ॥ ९ ॥ युवापि बालवत्तातो-त्संगविन्यस्तमस्तकः ॥ स्वमागः क्षमयामास ।
रुदन् वल्कलचीर्यपि ॥ १० ॥ द्वैधीभावमिवछेत्तु-मालिंगत्सोऽपि तं मुदा ॥ हर्षाश्रुधौत का-
लुष्यं । चक्षुषोः प्राप पाटवं ॥ ११ ॥ प्रविश्योटजमेकांते । पूर्वाभ्यासवशंवदः ॥ त्वङ्मयान्यु-
त्तरीयाणि । कुमारः प्रममार्ज सः ॥ १२ ॥ एवं प्रमार्जनं क्वापि । कृतपूर्वीति चिंतया ॥ जा-
तिस्मरः स सस्मार । श्रामण्यं प्राग्भवार्जितं ॥ १३ ॥ घटी यामो दिनं पक्षः । स कदा भवि-
ता यदा ॥ सा मे संगस्यते दीक्षा । वियुक्तस्येव वल्लभा ॥ १४ ॥ इति साक्षिणि तद्ध्या-
ना-नले धर्मः पुरोहितः । व्यवाहयत्कुमारेंद्रं । समं केवलसंपदा ॥ १५ ॥ तदा स भगवा-
न् दिव्य—स्वर्णांभोजकृतस्थितिः ॥ सुरासुरसमज्यायां । निर्ममे धर्मदेशनां ॥ १६ ॥ निश-
म्य तद्वचःश्रेणीं । निःश्रेणीमिव निर्वृतेः ॥ सोमचंद्रोऽभजद्दीक्षां । छिन्नमिथ्यात्वबंधनः ॥१७॥

For Private and Personal Use Only

प्रसन्नचंद्रे निस्तंद्रे । प्राप्ते श्रावकधूर्यतां ॥ श्रीवीरः शिश्रिये पित्रा । सत्रा वल्कलचीरिणा ॥ १८ ॥ प्रसन्नचंद्रभूपाले । पाति तात इव प्रजाः ॥ कदाचित्पोतनपुरे । श्रीवीरः समवासरत् ॥ १९ ॥ आकर्ण्य कर्णपीयूष-पारणं प्रभुदेशनां ॥ सुतं शिशुमपि न्यस्य । साम्राज्ये प्राव्रजन्नृपः ॥ २० ॥ समं भगवता कुर्वन् । विहारं वसुधातले ॥ प्रसन्नचंद्रराजर्षि-र्ययौ राजगृहं पुरं ॥ २१ ॥ व्याख्यावप्रत्रयाग्रेऽसौ । तस्थौ प्रतिमया मुनिः ॥ अंतरंगद्विषद्भंग-कीर्तिस्तंभ इवार्हतः ॥ २२ ॥ यस्य योगत्रयी जैन-ध्यानमंत्रपवित्रिता ॥ स तदा वंदितुं वीरं । चचाल श्रेणिको नृपः ॥ २३ ॥ अभूतां तस्य नासीरे । सुनासीरेद्धतेजसः ॥ सुमुखो दुर्मुखश्चेति । यथार्थौ पुरुषावुभौ ॥ २४ ॥ पिंडस्थमिव सद्ज्ञानं । पदस्थमिव संवरं ॥ रूपस्थमिव चारित्रं । रूपातीतं मनोभुवः ॥ २५ ॥ पथि तं सुमुखो वीक्ष्य । महर्षिं हर्षतो जगौ ॥ त्वमेव मुख्यो धुर्याणां । यस्येयं ध्यानसाधना ॥ २६ ॥ युग्मं ॥ पूर्वं बाह्यास्ततः पिंड-वर्तिनोऽपि विजिग्यिरे ॥ द्विषो येन समं तेन । त्वया कः स्पर्धतां भटः ॥ २७ ॥ अथ तं दुर्मुखः प्रोचे । न त्वं सुमुख बुध्यसे ॥ अस्येक्षुयष्टिवन्नूनं । निःफला संयमक्रिया ॥ २८ ॥ राज्ये न्यवे-

शि योऽनेन । बालः स किल वैरिभिः ॥ वारिभिर्दुर्बलः सेतु-रिवाप्लाव्यत संप्रति ॥ २९ ॥
हास्तिकं जगृहेऽश्वीयं । जह्रे संजह्रिरे भटाः ॥ अधारि धेनुकं तत्किं । यन्न चक्रेऽस्य वैरि-
भिः ॥ ३० ॥ नास्य कूर्चं मुखे किंतु । पुच्छं तैरश्वलक्षणं ॥ यो जज्ञे नैतदपि य-द्वाह्ये रा-
ज्यं न दीयते ॥ ३१ ॥ दुर्निवारं लगत्येव । व्रतिनोऽप्यस्य तद्रजः ॥ इत्युक्त्वा सोऽग्रतोऽचा-
ली-दहो दोषदृशः खलाः ॥ ३२ ॥ त्यक्त्वा चंदनपंकमत्र रमते श्लेष्मद्रवे मक्षिका । मु-
क्त्वा पल्वलमध्यवारि महिषः पंके लुठत्यन्वहं ॥ हित्वा सुंदरतिग्मरश्मिदिवसं क्रीडत्युलू-
को निशि ॥ प्रायो दिव्यति दूषणे गुणगणत्यागात्खलानां मतिः ॥ ३३ ॥ एभिस्तद्वचनैः क-
ल्पा-वसानपवनैरिव ॥ स्थिरः क्ष्माधरः सारा-कारः साधुरचाल्यत ॥ ३४ ॥ ताम्यतिस्म त-
पस्तस्य । गलितं गुणगौरवं ॥ च्युता चारित्रचिंतापि । विशीर्णं श्रुतपाटवं ॥ ३५ ॥ दध्यौ
स किमहं दृष्टो । जीवन्नपि मृतोऽरिभिः ॥ यज्जिघृक्षति मज्जाता-दहो ते राज्यसंपदं ॥३६॥
मय्युदस्तायुधे योधे । युधि भूरिस्फुरन्मुदे ॥ उच्चुंरू इव मातंगे । केऽपरे पशवः परे ॥३७॥
मुनिर्ध्यात्वेति मनसा । जयढक्कामवीवदत् ॥ आजूहवन्महायोधा-नायुधानप्यचिन्तयत् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥३८॥ समनीनहद्श्वेन-सुजटान् वीर्यशालिनः ॥ प्राचीचलद्बलं सत्रा । शत्रुव्रातैरयूयुधत्
॥ ३९ ॥ युग्मं ॥ ततः पतन्नरासार-रुद्धवैवस्वतद्युतिः ॥ जिन्नेजकुंजाजिव्यक्त-रक्तपूरतरद्र-
थः ॥ ४० ॥ मिथः संघर्षदुर्द्धर्ष-खङ्गखाट्कारजीषणः ॥ निशितोल्लसितानंत-कुंतप्रोतजटव्र-
जः ॥ ४१ कृतकेतुस्थितछत्र-दंडदंतुरितक्षितिः ॥ उजयोः सैन्ययोरासी-द्धीरुह्रदारणो रणः
॥ ४२ ॥ त्रिजिर्विशेषकं ॥ अत्रांतरे ववंदे तं । मुनींद्रं श्रेणिको नृपः ॥ न स वीररसव्यग्रो ।
धर्मलाजयतिस्म तं ॥ ४३ ॥ अहो महोज्ज्वलं ध्यान-महो निस्संगता मुनेः ॥ वंदमानेऽपि
भूपाले । यन्मय्येष तृणीयति ॥ ४४ ॥ न मुक्तिरपि मन्येऽस्य । ध्यानादस्माद्दवीयसी ॥ एवं
विजावयन् जूपः । श्रीवीरस्यांतिकं ययौ ॥ ४५ ॥ नत्वा स प्रजुमप्राक्षी-द्यदावंदि मया त-
दा ॥ कालं प्रसन्नचंद्रश्चे-त्करोत्युत्पद्यते क्व तत् ॥ ४६ ॥ सप्तमं नरकं याति । राजर्षिः स त-
दा मृतः ॥ इत्युक्ते प्रजुणा दध्या-वध्यात्मं मगधाधिपः ॥ ४७ ॥ क्व तद्ध्यानं मुनेस्तस्य ।
पतनं नरके क्व च ॥ क्व राजकेलीकलना । क्व च वर्चोगृहे स्थितिः ॥ ४८ ॥ जाने जैनेश्वरी
वाणी । शुश्रुवे व्यत्ययान्मया ॥ यद्वालं चिंतया नार्हन् । पुनः पृछति कुप्यति ॥ ४९ ॥

कणाद्राज्ञा पुनः पृष्टो । गतिं तस्यावदत्प्रभुः ॥ विमानं याति सर्वार्थ-सिद्धं चेन्म्रियतेऽधु-
ना ॥ ५० ॥ युक्तैवासौ प्रजोरुक्ति-रिति क्षितिभुजा पुनः ॥ पृष्टो जिनो जगौ जातः । सां-
प्रतं स च केवली ॥ ५१ ॥ पश्यामी समवसृते-रुत्तिष्ठंति प्रमोदिनः ॥ देवा देव्यश्च तस्यैव
। विधातुं केवलोत्सवं ॥ ५२ ॥ राजोवाचैकरूपा हि । देव गंगेव गीस्तव ॥ त्रिपथीभूय सं-
देह-मलं किं मय्यवीवृधत् ॥ ५३ ॥ जिनो जगाद भूपाल । यदावंदि च स त्वया ॥ तदा
डुर्मुखडुर्वाक्य-श्रवणोत्पन्नमत्सरः ॥ ५४ ॥ मनसा निजसाम्राज्य-लंपटोऽरिभटैः समं ॥ यु-
ध्यमानोऽभवत्तेन । तस्योचेऽधोगतिर्मया ॥ ५५ ॥ युग्मं ॥ तीर्णकल्पे रणांभोधौ । क्षीणास्त्रः
स निरैक्षत ॥ आयांतं मकरक्रूर-मेकं तुरगिणं पुरः ॥ ५६ ॥ सर्वं हि दोष्मतां शस्त्र-मिति
नीतिं स्मरन्नसौ ॥ करं व्यापारयामास । शिरस्काय तमर्दितुं ॥ ५७ ॥ इव जंगलभूखंड-म-
केशं हरितांकुरं ॥ शिरः स्पृष्टवतस्तस्य । चारित्रं स्मृतिमाययौ ॥ ५८ ॥ स दध्यौ ही प्रमा-
दो मे । यदादीयत डुर्धरैः ॥ कषायतस्करैर्ध्यान-धनं हृदि निधीकृतं ॥ ५९ ॥ आसन्ने वी-
रमार्तंडे । चेतःस्थश्रुतदीपके ॥ अपत्यप्रेमतमसा । जनोऽयं हंत बाध्यते ॥ ६० ॥ निम्नन्नेकें-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ड्रियमपि । तपोन्निः शुध्यति व्रती ॥ हतहस्तिहयव्रातः । शोत्स्यत्येष जनः कथं ॥ ६१ ॥ नावारिन्निर्विजिन्नोऽस्मि । जयन् बाह्यानरीनहं ॥ हहा दग्धं गृहं शैला–नलं शमयतो मम ॥ ६२ ॥ ध्यायत्येवं मुनौ झाप । त्वया प्रश्नः पुनः कृतः ॥ तदा मृतः स सर्वार्थ–विमानसुखन्नाग्नवेत् ॥ ६३ ॥ चटत्प्रकर्षवैराग्य–वीचीनिर्धूतकल्मषः ॥ स प्राप केवलज्ञानं । तत्र प्रश्ने तृतीयके ॥ ६४ ॥ इत्याकर्ण्य प्रन्नोर्वाचं । दधानो विस्मयं परं ॥ श्रेणिकस्तमवंदिष्ट । मुनिमुन्निद्रन्नावनः ॥ ६५ ॥ न चापव्यापारः शरविसरसंघट्टविषमो । न ढक्कानिर्घातः समिति न च कश्चिद्विनिहतः ॥ प्रसन्नेंडुः साधुर्नरकगतियोग्योऽजनि पुनः । यतश्चैतच्चेतः प्रशमरुचि कुर्वंतु यतयः ॥ ६६ ॥ इत्युपदेशचिंतामणिवृत्तौ प्रसन्नचंद्रकथा ॥

॥ मूलम् ॥—वयगुत्तीए साधू । पायं मोणेण वट्टए अहवा ॥ सच्चंपि य मणवज्जं । कज्जंमि पजंजए वयणं ॥ १ ॥ व्याख्या—वचसो वचनस्य गुप्तौ चिंत्यमानायां साधुः प्रायो मौनेन न्नूहस्तादिसंज्ञामपि परिहृत्य तूष्णीन्नावेन वर्तते. प्रायोग्रहणं स्वाध्यायकरणे योगस्यानुज्ञातत्वात्. ननु एतावता यावज्जीवं यतिना मौनमेव कार्यं. न्नाषणेऽगुप्तत्वापत्तेरित्याह–

For Private and Personal Use Only

'अहवेत्यादि'. अथवेति वाग्गुप्तेः प्रकारांतरसूचकं साधुर्वचनं प्रयुंक्ते नाषते इत्यर्थः. किं विशिष्टं वचनं? सत्यं, एकलक्षणत्वात्. असत्यामृषमपि इदं यद्वस्तुप्रतिष्ठाशयोच्यते तत्सत्यं, अस्ति जीवः कर्ता नोक्तेत्यादि. यच्च प्रतिष्ठाशां विनोच्यते तदसत्यामृषं. आमंत्रणाज्ञापनादिसत्यमपि प्रियं श्रोतुरिष्टं, अप्रियस्यासत्यप्रायत्वात्तदप्यनवद्यं, स पुनर्हे सखे! त्वं कृषिं कुर्वित्यादि उक्तिवत् सावद्यं. इदं हि सत्यप्रियमप्यसत्यप्रायं जीवघाताद्यारंजरूपत्वात्. अनवद्यमपि कार्ये प्रयोजने, न तु वातूलवद्यथा तथा. एवं च नाषमाणस्याप्यस्य वाग्गुप्तिरेव. यदाहुः—समिउ नियमागुत्तो । गुत्तो समियत्तणंमि नइयव्वो ॥ कुसलवयमुदीरंतो । जं चिय गुत्तोवि समिउविति ॥ १ ॥ अथ यदुक्तं सत्यमपि प्रियमेव ब्रूयात्तत्समर्थयन्नाह—

॥ मूलम् ॥—निवमंतिइप्रमाई । तहेव सद्देइ न पुण काणाई ॥ न य संदिद्धं कज्जो । नासं उहारिणिं वेइ ॥ २ ॥ व्याख्या—नृपो राजा, मंत्री सचिवः, इभ्यः श्रीमान्, ते आद्यो येषां सामंतश्रेष्ठिसार्थवाहादीनां, तथैवेति यथा नृपत्वादि नावेन ते संति, तथैव शब्दयति आह्वयति. अयमर्थः—नृपतिं नृपतिमिति, मंत्रिणं मंत्रिणमिति, इभ्यं इभ्यमिति

ब्रूयात्. तथा चाचारांगे–जेयावन्ने तहप्पगारा तहप्पगारेहिं नासाहिं बूआ। नो कुप्पंति मा· णवा तेयावि तहप्पगारा तहप्पगाराहिं नासाहिं अनिकंख नासिज्जत्ति. न च काणादिष्व· प्ययं न्यायोऽनुसर्तव्य इत्याह–न पुनः काणादीन् तथैव काणादिनाम्ना शब्दयति, तथा चागमः–तहेव काणं काणत्ति । पंडगं पंडगंति वा ॥ वाहियं वावि रोगित्ति । तेणं चोरेत्ति न वएत्ति ॥ १ ॥ आदिशब्दात्कुष्टिखंजादिपरिग्रहः. तथा न च संदिग्धे संदेहास्पदे च का· र्येऽवधारिणीं एवमेवैतदित्येवंरूपां नाषां ब्रूते. ॥ २ ॥ तर्हि किं ब्रूते? इत्याह—

॥ मूलम् ॥—आउस्स न वीसासो । कज्जस्स बहूणि अंतरायाणि ॥ तम्हा साहूणं वट्ट–माणजोगेण ववहारो ॥ ३ ॥ व्याख्या—स्पष्टा, नवरं संदिग्धे कार्ये वर्तमानयोगमेव ब्रूयादित्यर्थः. ॥ ३ ॥ किं च—

॥ मूलम् ॥—दम्मे वसहे खज्जे । फले य थंनाइसमुचिए रुक्खे ॥ गिज्झे अन्ने जण· या–इयत्ति सयणेवि न लवेइ ॥ ४ ॥ व्याख्या—वृषनान् कल्होडकान् दम्यान् धुर्यत्वयो· ग्यान्, फलानि आम्रफलादीनि खाद्यानि नक्षणार्हाणि, वृक्षान् स्तंनादेः समुचितान्, आ·

दिशब्दाङ्गारपट्टकपाटपीठतोरणशय्यासनयंत्रादिपरिग्रहः. तथाऽन्नानि शाल्यादीनि ग्राह्याणि लवनयोग्यानीति न लपतीति क्रिया सर्वत्र योज्या. साधुवचसः प्रतीतिपात्रत्वादमी वृषन्नादयो दमनादिक्रियायाः प्राप्तकाला इति निश्चित्य श्रोतॄणां तत्र तत्र दमनादौ प्रवर्तनेन महारंजसंजवात्. तथा स्वजनान् पितृमातृभ्रातृजगिन्यादीन् हे जनकादय इति न लपति. आदिशब्दात् हे मातर्हे भ्रातर्हे जगिनीत्यादि. साधूनामलौकिकत्वेन लौकिकसंबंधोक्तावनधिकृतत्वात्. ॥ ४ ॥ पुनर्विशेषमाह—

॥ मूलम् ॥-- राइसराईहिं कयाइ धीमं । पुट्ठो मुणी कूवतलायकज्जे ॥ अत्थिति नत्थिति न बेइ पुण्णं । भवंति जं भूयवहंतराया ॥ ५ ॥ व्याख्या—राजानो मांडलिकाः, ईश्वरा युवराजानः, आदिशब्दाद्ग्रामाध्यक्षादयः, एभिः कदापि कूपतडागयोः, उपलक्षणत्वात्प्रपायागसत्रादीनां च कार्ये, मम कूपादीन् कारयतः पुण्यमस्ति न वेति पृष्टो धीमान् सम्यगागमज्ञो मुनिः कारयेदं कूपादिकमस्त्यत्र महत्पुण्यं; माचीकरस्त्वमेतन्नास्त्यत्र मनागपि पुण्यमित्युजयथापि न ब्रूयात्. अत्रोपपत्तिमाह—यद्यस्मात्कारणादस्ति पुण्यमिति वदतो भूतवधः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यात्, शोषसमये जलाश्रितशेवालाद्यनंतकायिकानां पूतरशंबूकजलूकामत्स्यमंडूकादीनां त्र-
सानां च प्रत्यक्षं विपत्तिवीक्षणात्, मत्स्यादीनामप्यन्यान्यं जीवनक्षणाच्च. तथा नास्ति पु-
ण्यमिति च वदतोंतरायदोषः स्यात्. बहूनां पशुपक्षिमनुष्याणां तृषार्त्तानां जलपानव्यवछे-
दात्. तस्मान्मौनमेवालंबेत. नेदृशेषु लौकिककार्येष्वस्माकं जाषणाधिकार इति वा वदेत्. य-
त्सूत्रकृदंगसूत्रं–तहा गिरं समारप्न । अत्थि पुण्णंति नो वए ॥ अहवा नत्थि पुण्णंति । ए-
वमेयं महब्भयं ॥ १ ॥ दाणठ्याइं जे पाणा । हम्मंति तसथावरा ॥ तेसिं सा रक्कणठाए ।
तम्हा अत्थित्ति नो वए ॥ २ ॥ जेसिं तं उवकप्पेई । अन्नं पाणं तहाविहं ॥ तेसिं लाजंत-
रायंति । तम्हा नत्थित्ति नो वए ॥ ३ ॥ जे य दाणं पसंसंति । वहमिच्छंति पाणिणो ॥ जे-
य णं पडिसेहंति । विचिठेयं करंति ते ॥ ४ ॥ डुहउ व न जासंति । अत्थि वा नत्थि वा
पुणो ॥ आयंरयस्स हिच्चा । निव्वाणं पाउणंति ते ॥ ५ ॥ अथोपसंहारमाह—

॥ मूलम् ॥––सावज्जाणवज्जाणं । वयणाणं जो वियाणइ विसेसं ॥ पावरयेणं न लिप्प-
इ । कयावि सो कालियज्जोव ॥ ६ ॥ व्याख्या––यः परिशीलितप्रवचनसारः सावद्यानवद्या-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नां वचनानां विशेषं विभागं जानाति, ज्ञात्वा च सावद्यपरिहारेणानवद्यमेव वचनं वक्ति, स कदापि कालिकार्य इव पापरजसा न लिप्यते. ॥ ६ ॥ अथ कालिकाचार्यकथा--

पुरी तुरमिणीत्यस्ति । मणीव त्रासवर्जिता ॥ जितशत्रुनृपस्तत्र । सर्वत्र जगति प्रियः ॥ १ ॥ तत्र द्विजप्रिया भद्रा । व्याघ्रवत्क्रूरतास्पदं ॥ प्रसूता तनयं दत्तं । द्यूतमद्यादिसेवितं ॥ २ ॥ सेवमानः स राजान-मवाप्तप्रसरः शनैः ॥ सामंतान् भेदयामास । सरित्पूर इव द्रुमान् ॥ ३ ॥ राज्यं दत्तः समादत्त । बध्ध्वा राजानमन्यदा ॥ प्रायः स्वाश्रयनाशाय । भवेद्धवणवत्खलः ॥ ४ ॥ प्रजापीडनजातेन । स्वजाते नार्चयन् द्विजान् ॥ चक्रे क्रतूनसौ शूरा-श्छागेष्वेव हि तादृशाः ॥ ५ ॥ भद्रायाः सोदरोऽन्येद्यु-स्तत्रोद्यानं समागतः ॥ श्रीकालिकगुरुः श्राद्धै-र्भेजे भृत्यैरिव प्रभुः ॥ ६ ॥ भद्रयानुदिनं प्रेर्य-माणः शमदमातुलं ॥ मातुलं तमुपतस्थौ । दत्तोऽप्याह्लादवर्जितः ॥ ७ ॥ सर्वसाधारणं व्याख्या--वचो मेघांबुवद्गुरोः ॥ पीत्वा दत्तोऽवदत्क्रुद्धो । यागानां ब्रूहि किं फलं ॥ ८ ॥ विरोधभीरुणाभाणि । गुरुणागमशालिना वत्स पृच्छसि धर्मं चे-द्धर्मः स्याज्जीवरक्षया ॥ ९ ॥ ब्रूहि यज्ञफलं ताव-दिति तेनोदिते

पुनः ॥ सूरिरूचे न हिंसा स्यात् । कदाप्यायतिसुंदरा ॥ १० ॥ दत्तोऽथ स्माह साक्षेप-मा-
चार्य बधिरोऽसि किं ॥ यत्पृष्टः सैंधवं वर्त्म । वक्ति मालवपद्धतिं ॥ ११ ॥ फलं पृच्छामि या-
गानां । ब्रूषे हिंसामसुंदरां ॥ जानासि तद् द्रुतं ब्रूहि । नो चेत्पार्श्वममुत्सृज ॥ १२ ॥ निज-
प्राणान् पणीकृत्य । धैर्यमालंब्य सूरिणा ॥ अवादि सत्यमेवेति । यज्ञानां नरकाः फलं ॥१३॥
अथ दत्तोऽवदत्कोऽत्र । प्रत्ययः सूरिरालपत् ॥ त्वं श्वभिर्भक्षितः कुंभ्यां । पक्ष्यसे सप्तमेऽह-
नि ॥ १४ ॥ कोऽत्रापि प्रत्ययो दत्ते-नेति पृष्टो गुरुर्जगौ ॥ दिने तत्रैव तेऽकस्मा-न्मुखे विष्टा
पतिष्यति ॥ १५ ॥ अथ स्विद्यल्ललाटेन । रोषारुणदृशा भृशं ॥ दत्तेनावादि सूरींद्रः । कथं
त्वं तु विपत्स्यसे ॥ १६ ॥ समाधिनैव मर्तास्मि । गंतास्मि द्यां मृतोऽप्यहं ॥ इत्युक्ते गुरुणा
दत्तः । समुत्तस्थौ सहुंकृतिः ॥ १७ ॥ रुध्ध्वा निजभटैः सूरिं । दत्तः स्वगृहमागतः ॥ पावयन्न-
गरीरथ्या । निलीयास्थात् समाधिना ॥१८॥ मतिमोहेन मन्वानः । सप्तमं षष्ठमप्यहः ॥ कु-
र्वे शांतिकमाचार्या-सुभिरद्येति निर्ययौ ॥ १९ ॥ दत्तदुर्वृत्तनिर्विण्णै-स्तदानीं मूलमंत्रिभिः ॥
आकृष्य पंजराद्राज्ये । जितशत्रुर्न्यवेश्यत ॥ २० ॥ तदैको मालिकः पुर्यां । विशन् वेगातुरो

व्यधात् ॥ मार्ग एव मलोत्सर्गं । नीतः पुष्पैः व्यधत्त च ॥ २१ ॥ सैव वाजिक्षुरोत्क्षिप्ता । दत्तस्य पथि गच्छतः ॥ विषच्छटा पयःकुंभ—इव विष्टा मुखेऽविशत् ॥ २२ ॥ चमत्कृतस्तदास्वा-दा—द्विषादकलुषाननः ॥ विज्ञाय तद्दिनं षष्ठं । दत्तः पश्चान्न्यवर्तत ॥ २३ ॥ असमन्मंत्रोऽमु-नाप्यापि । नाज्ञायीति स मंत्रिभिः ॥ गृहमप्रविशन्नेव । बध्ध्वा भूमिभुजेऽर्पितः ॥ २४ ॥ भू-पः प्राप्तोदयः सूर्य । इव पापक्षपात्यये ॥ दत्तनामतमः कुंभ्यां । गिरिदर्यामिवाक्षिपत् ॥२५॥ अधोऽग्नौ ज्वालिते कुंभ्यां । मुक्ताः श्वानः क्षुधातुराः ॥ दत्तं कदर्थयामासुः । क स्वामिद्रो-हिणः सुखं ॥ २६ ॥ अथ श्रीकालिकाचार्यो । जितशत्रुमहीभुजा ॥ पूज्यतेस्म प्रतिदिनं । न ह्यसौ गुणमत्सरी ॥ २७ ॥ कालिकार्यगुरुणा यथा वचः । सत्यमेव जगदे विपद्यपि ॥ तद्व-देव सुकृतार्थिभिः परैः । सुनृतं वचनमुच्यतां सदा ॥ २८ ॥ इत्युपदेशचिंतामणिवृत्तौ का-लिकाचार्यकथा ॥ एवं वाग्गुप्तिमुक्त्वाथ कायगुप्तिमाह—

॥ मूलम् ॥—कायं तु निरुंभिज्जा । उस्सग्गेणासणंतरेणं वा ॥ कज्जे व पयट्टंतो । प-ए पए चिंतए जयणं ॥ ७ ॥ व्याख्या—साधुरुत्सर्गेण कायोत्सर्गेण, आसनांतरेण वा पद्मा-

दिना कायं शरीरं रुंध्यान्निश्चेष्टं कुर्यात्. न हि सर्वकालं निश्चेष्टत्वे निर्वाह इति कायगुप्तेर्वि-ध्यंतरमाह—कार्ये गमनशयनादिके प्रयोजने जाते प्रवर्तयन् शरीरं, पदे पदे मा मम श-रीरेण कोऽपि जीवोऽवधीदित्येवंरूपां यतनां चिंतयेत् ॥ ७ ॥ यतनारहितस्य दोषमाह—

॥ मूलम् ॥—गमणट्ठाणनिसीयण–तुयट्टणगहण निसिरणाइसु ॥ कायं असंवरंतो । छक्कंपि विराहओ होइ ॥ ८ ॥ व्याख्या——गमनं प्रतीतं, स्थानं ऊर्ध्वस्थानेन, निषीदनमु-पवेशनं, त्वग्वर्त्तनं स्वपनं, ग्रहणं दंडकादेरादानं, सृजनं तस्यैव निक्षेपणं, आदिशब्दाद्भोज-नभाषणादिपरिग्रहः. एषु स्थानेषु कायमसंवृण्वन् अयतनया चालयन् षणामपि प्रस्तावा-ज्जीवनिकायानां विराधको भवति. तत्रायतनया गमनादिकं कुर्वतः सचित्ततृणादिमर्दनात्पृ-थ्वीकायस्य, जलभाजनलोठनादप्कायस्य, साग्निकमलातं स्पृशतोऽग्निकायस्य 'तेउवाउसह-गओ' इति वचनाद्वायुकायस्य, हरिदादिसंघट्टाद्वनस्य, संसक्तस्थानाद्यवर्जनात्त्रसकायस्यापि विराधनाऽनुपयुक्तस्य भावनीया. ॥ ८ ॥ अथ कायगुप्तौ दृष्टांतमाह——

॥ मूलम् ॥—भरिसं सिरिसंतिजिओ । मइमं वज्जाउहो ठिओ पडिमं ॥ गिरिथंभे थि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रदेहो । जइज्ज तेणाणुमाणेण ॥ ९ ॥ व्याख्या—गाथार्थः स्पष्टः, नावार्थस्त्वयं—स वज्रायुधस्तीर्थंकरजीवत्वाद्विशिष्टबलयुक्तो वर्षं कायोत्सर्गेण तस्थिवान्, न च तथा परे हीनसंहननाः स्थातुं शक्ताः, तथापि तदनुसारेण यतितव्यं. सत्यां शक्तौ प्रत्यहं घटिकां मुहूर्तं वा कायोत्सर्गादिना स्थिरदेहेन नाव्यमित्यर्थः. ॥ ९ ॥ वज्रायुधकथा तु लेशतो नाव्यते ॥ अथ वज्रायुधकथा—

जंबूद्वीपे प्राग्विदेह—मंमने श्रीसमुच्चये ॥ विजये मंगलावत्या—मस्ति पू रत्नसंचया ॥ ॥ १ ॥ जगत्क्षेमंकरस्तत्र । राजा क्षेमंकरोऽजनि ॥ जिनस्य जनिता यस्य । नमस्या नाकिभिर्न कैः ॥ २ ॥ तस्याभूद्रत्नमालायां । पत्न्यां वज्रायुधाभिधः ॥ सुतश्चतुर्दशस्वप्न—सूचिताद्भुतवैभवः ॥ ३ ॥ श्रीशांतिनाथजीवत्वा—दत्यद्भुतगुणाकरः ॥ सोऽध्यापितकलः काले । जनकेन व्यवाह्यत ॥ ४ ॥ पुत्रे यूनि क्षमाभारं । न्यस्य राज्योचितं नृपः ॥ स्वयं दधौ क्षमाभारं । सर्वज्ञसंयमोचितं ॥ ५ ॥ अचिरात्प्राप्तकैवल्यः । समासाद्यार्हतीं श्रियं ॥ विहरन् बोधयामास । क्षेमंकरजिनो जनान् ॥ ६ ॥ साधिताशेषविजयो । विजयोर्जितदोर्युगः ॥

For Private and Personal Use Only

वज्रायुध इव स्वर्गे । चक्री वज्रायुधोऽभवत् ॥ ७ ॥ अन्यदोद्यानमायांतं । चक्री तं धर्मच-
क्रिणं ॥ ववंदेऽत्रस्थितं देव-निर्मिते देशनालये ॥ ८ ॥ चक्री चिक्रीषुर्मुक्ति-लब्ध्वा श्रुत-
जिनोदितः ॥ राज्यं न्यवेशयत्पुत्रे । सहस्रायुधनामनि ॥ ९ ॥ चतुःसहस्र्या भूपानां । सप्त-
शत्या तनूरुहां ॥ सहितः स्वहितार्थ्येष । प्रभुपार्श्वेऽग्रहीद्व्रतं ॥ १० ॥ अधीतसूत्रो वसुधा-
वलये विहरन्नसौ ॥ विशिष्टध्यानसंधान-मनाः सिद्धगिरिं ययौ ॥ ११ ॥ तत्र सर्वांगिषु त्य-
क्त-वैरो वैरोचनान्निधे ॥ स्तंभे प्रतिमया तस्थौ । महर्षिर्वर्षमानया ॥ १२ ॥ इतश्चास्य भग-
वतो-ऽवतारेऽमिततेजसः ॥ त्रिपृष्टश्यालकस्यासी-दश्वग्रीवो महारिपुः ॥ १३ ॥ तस्याभूतां
मणिकुंभ-मणिकेतू तनूरुहौ ॥ तौ भवान् भूरिशो भ्रांत्वा । तपोऽज्ञानं वितेनतुः ॥ १४ ॥
प्राप्तौ तेनासुरीं योनिं । पर्वते तत्र तं मुनिं ॥ प्रतिमास्थितमालोक्य । प्राग्वैरोल्लासमापतुः ॥
॥ १५ ॥ ततस्तावस्तकारुण्यौ । परमाधार्मिकाविव ॥ सिंहेभफणिनां रूपै-रुपदुद्रुवतुर्मुनिं ॥१६॥
अक्षोभं वीक्ष्य तं रक्षो-रूपं कृत्वाट्टहासिनौ ॥ निर्यज्ज्वालाकरालास्य-क्रोधौ भापयतःस्म तौ
॥ १७ ॥ तथाप्यव्यथिते तस्मि-न्नृषौ निष्कारणद्विषौ ॥ उपसर्गांतरं कर्तुं । यावत्प्रावर्तता-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिमौ ॥ १८ ॥ तावत्त्रिदशराजस्य । वध्वः क्षेमंकरं जिनं ॥ वंदित्वा वलितास्तेन । पथालो- कंत तं मुनिं ॥ १९ ॥ निजनैश्चल्यतः शैल-स्तंजं स प्रतिपक्षयन् ॥ जवच्छिदे जवत्येव । मु- निरेष नमस्कृतः ॥ २० ॥ एवं विजावयंत्यस्ता । दिव्याजरणजासुराः ॥ मुनिमानंतुमानंदा- न्निरेमौलावववातरन् ॥ २१ ॥ वीक्ष्य ता अकृतालोका । आयांतीर्दीपिका इव ॥ नेशतुर्ध्वां- तनाशंतौ । दैत्यौ सम्यग्दृगप्रियौ ॥ २२ ॥ प्रीत्या प्रणम्य लुठित-देहाश्चापलता इव ॥ क्ष- षेः पुरः पुरुहूत-प्रिया नाट्यं वितेनिरे ॥ २३ ॥ योजितांजलयः सर्वाः । स्तुत्वा सत्वाधिकं मुनिं ॥ पुण्याढ्यं मन्यमानाः स्वं । ताः स्वस्थानं प्रपेदिरे ॥ २४ ॥ वज्रायुधोऽपि जगवान् । न- गमूर्द्धनि वत्सरं ॥ स्थित्वा पूर्णप्रतिज्ञोऽथ । विजह्रे वसुधातले ॥ २५ ॥ यदि मृदुलशरीरो वत्सरं वज्रसाधुः । शिखरिशिरसि कायोत्सर्गमेवं व्यधत्त ॥ तदिह बहुलसत्वाः साधवोऽन्ये- ऽपि दूरी-कृतदुरितसमूहे तत्र तन्वंतु यत्नं ॥ २६ ॥ इत्युपदेशचिंतामणिवृत्तौ वज्रायुधक- था ॥ तदेवमुक्ता कायगुप्तिः, तदुक्तौ चोक्तास्तिस्रोऽपि गुप्तयः, तद्भणने च जणिताः सप्तद- शापि संयमजेदाः ॥ अथ प्राप्तसर्वविरतिर्येषामाश्रयणीयो जवति, तान् गुणानाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ मूलम् ॥—चिठंति गुरुकुले गुरु–जणंमि न हु चोइयावि कुप्पंति ॥ उस्सासाइं मु-
त्तुं । करंति गुरुसक्खियं सव्वं ॥ १० ॥ व्याख्या—इह साधव इति कर्तृपदं सर्वत्राप्रयुक्तमपि
गम्यते. बहुवचनं च गछवासित्वेन आचार्योपाध्यायादिवैचित्र्यज्ञापनार्थं. तेनैते गुणाः प्रा-
यः स्थविरकल्पापेक्षा इति प्रतिपत्तव्यं. साधवो गुरूणां कुलं साधुसंतानरूपं तत्र तिष्टंति.
ज्ञानादिलाभहेतुत्वात्, उक्तं च विशेषावश्यके–नाणस्स होइ भागी । थिरयरउ दंसणे च-
रित्ते य ॥ धन्ना आवकहाए । गुरुकुलवासं न मुंचंति ॥ १ ॥ तीक्ष्णवचनादिना नोदिता
अपि गुरुजने न कुप्यंति. यदाह–गुरवस्ताडयन्तोऽपि । भवंति हितहेतवः ॥ घर्षयन्नपि र-
त्नस्य । तेजसे मणिकारकः ॥ १ ॥ तथोछ्वासादिकं मुक्त्वा सर्वं कर्तव्यं गुरुसाक्षिकं
कुर्वंति. आदिग्रहणादन्याप्युछ्वासतुल्यं मेषोन्मेषादिकमल्पकार्यं गुर्वादेशं विनापि कुर्वं-
तीति भावः. ननु ये साधवो गुरुभ्यो दूरदेशस्थास्ते कथं सर्वं गुरुसाक्षिकं कुर्वंतीत्यु-
च्यते. तेऽपि गुरुं स्थापयित्वा तत्पुरः सामाचारीं प्रयुंजते. उक्तं चौघनियुक्तौ–संविग्गसन्नि-
भदग–अहप्पहाणेसु भोइयघरेसु ॥ ठवणा आयरियस्सउ । सामायारीपउंजणया ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुनयो हि दंमिकादिकमप्याचार्यं कल्पयंति, निराबाधप्रदेशोऽयं ममाचार्य इति, तस्य चाग्रतः सकलां चक्रवालसामाचारीं प्रयुक्त इति. तथा—

॥ मूलम् ॥—पासत्थपरिचयं परि–चयंति वज्जंति तह अणाययणं ॥ न चयंति य अहिगरणं । अजियलाभं न भुंजंति ॥ ११ ॥ व्याख्या—ज्ञानादिगुणेभ्यः पार्श्वे पृथक् तिष्ठंतीति पार्श्वस्थाः, एकग्रहणे तज्जातीयस्यापि ग्रहणमिति न्यायादवसन्नादयोऽप्यत्र ग्राह्याः. तत्रावसीदंतिस्म क्रियाशैथिल्यान्मोक्षमार्गश्रांता इवावसन्नाः. तथा कुत्सितं ज्ञानादित्रयविराधकं शीलं स्वजावो येषां ते कुशीलाः. तथा संविग्नासंविग्नसंसर्गाद्गुणैर्दोषैश्च तद्भावे संसजंतिस्मेति संसक्ताः. तथा यथा यथाकथंचिदागमनिरपेक्षः सर्वकार्येषु छंदोऽभिप्रायो येषां ते यथाछंदाः. एतैः सह परिचयमालापादिकं संस्तवं परित्यजंति. उक्तं च–आलावो संवासो । विसंतो संथवो पसंगोय ॥ हीणायारेहिं समं । सव्वजिणिंदेहिं पमिकुठो ॥ १ ॥ अपवादस्तु पर्यायादिभिः कारणैः पार्श्वस्थादिभिरपि सहालापादिकं कुर्वतामपि न दोषः, यदागमः–वायाइनमुक्कारो । हत्थुस्सेहो य सीसनमणं च ॥ संपुच्छणत्थणं थोज वंदणं वंदणं वा-

For Private and Personal Use Only

वि ॥ १ ॥ परियाय पसिपुरिसं । खित्तं कालं च आगमं नाउं ॥ कारणजाए जाए । जहा-
रिहं जस्स जं जोग्गं ॥ २ ॥ तथा नञः कुत्सार्थत्वात् कुत्सितमायतनं पार्श्वस्थादिप्रतिबद्धं
स्त्रीपश्वादियुक्तं वा स्थानं परतीर्थं वा, यत्र स्थितानां ज्ञानादयो गुणा हीयंते तद्वर्जयंति.
अपवादतस्तु अन्यस्थानकालाभे तत्रापि यतनया तिष्ठतीति. तथाधिकः क्रियते संसारोऽने-
नेत्यधिकरणं, उपशमितकलहवर्धनं वचो न वदंति, चकाराच्च वादयंत्यपि. उक्तं च-"जेणं
परं पज्जोसवणाउ अहिगरणं वयइ, से णं निज्जूहियव्वे सिया". तथार्यिकाणां साध्वीनां
लाभं तदानीतमशनादीत्यर्थः, न भुंजते, तासु दानस्यैवानुज्ञातत्वात्. अनेन चतुर्भंगी सू-
चिता. यत्पंचकल्पभाष्यं-संविग्गसंजयाणं । दिज्जइ घीप्पइय पढमभंगो य ॥ संजइवग्गे दि-
ज्जइ । नवि घिप्पइ कारणे बीउ ॥ १ ॥ गिहिअन्नतित्थियाणं । नवि दिज्जइ घिप्पइ य नव-
रं च ॥ नवि दिज्जइ नवि घिप्पइ । पासत्थाईण सव्वेवि ॥ २ ॥ अपवादस्तु ग्लानत्वादौ का-
र्ये साधुपरिकराभावे आर्यिका लाभमपि भुंजतेऽन्निकापुत्रवत् ॥ ११ ॥ तथा—

॥ मूलम् ॥—सीयंति नावयासु । अवयासं दिंति न हु पमायस्स ॥ विग्घाविंति न

अन्नं । कुक्कुयकंदप्पहासेहिं ॥ १२ ॥ व्याख्या—आपत्सु रोगातंकदुर्भिक्षादिषु, हा अथ कथं निर्वहिष्याम इति न सीदंति न ग्लायंति. तथा प्रमादस्यानुपयुक्ततारूपस्यावकाशं न ददति. तथा कौकुच्यं भांडचेष्टा, कंदर्पानुविद्धाः कथा अपि कंदर्पः, हास्यव्यंजिकाश्च कथा अपि हास्यं, एतैरन्यं श्रोतारं न विस्मापयंति, यथा श्रुतया श्रोतॄणां कंदर्पः प्रसर्पति, हास्यं च समुन्मीलति, तां कथां न कथयंतीत्यर्थः. उक्तं च–कंदप्पकुक्कुयाहिं । तह सीलसहाबहसणविगहाहिं ॥ विम्हावंतो य परं । कंदप्पभावणं कुणइ ॥ १ ॥ १२ ॥ किंच—

॥ मूलम् ॥—पावसूयाणि न सिक्खंति । जाणमाणावि नो पउंजंति ॥ तेइत्थजोइजोइस–रसअंजणमंततंताइं ॥ १३ ॥ व्याख्या—पापश्रुतान्येकोनत्रिंशद्भेदानि, उक्तं च–अट्ठनिमित्तंगाइं । दिव्वुपायंतलिक्खभोमं च ॥ अंगं सरलक्खणवंज–णं च तिविहं पुणेक्किक्कं ॥१॥ सुत्तं वित्ती तह वित्तियं च । पावसुयमिउणतीसविहं ॥ गंधव्वनट्टवत्थु । आउंभणवेयसंजुत्तं ॥ २ ॥ एतानि न शिक्षंते नाभ्यस्यंते. अपवादतस्तु संघकार्ये शिक्षंते. तथा जानंतोऽपि न प्रयुंजंते चैकित्स्यादिकं. तत्र चिकित्साद्याः कर्म चैकित्स्यं वैद्यकं. योगाः पादलेपाद्याः,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्योतिषं निमित्तं, रसः पीतादिधातुः, अंजनं अदृश्यीकरणादि, मंत्रा गारुडाद्याः, तंत्राणि कार्मणादीनि, आदिशब्दात्कौतुकभूतिकर्मादयः. उक्तं च—जोइसनिमित्तअक्खर—कोउ य आएसभूइकम्मेहिं ॥ करणाणुमोयणेहिं य । साहुस्स तवक्खओ होइ ॥ १ ॥ अपवादतस्तु तीर्थप्रभावनार्थं प्रयुंजाना अपि प्रभावका एव श्रीकालिकार्यवत्. ॥ १३ ॥ अन्यच्च—

॥ मूलम् ॥—सोहंति वत्थसिज्जाइ । दूसणे न य विही विरुज्झंति ॥ निच्चं संविग्गमणा । व-ज्जंति अकालसज्झायं ॥१४॥ व्याख्या—वस्त्रशय्यादिदूषणानि शोधयंति टालयंतीत्यर्थः. इह वस्त्रं त्रिधा, एकेंद्रियविकलेंद्रियपंचेंद्रियावयवत्वात्. तत्राद्यं कार्पासिकादि, द्वितीयं कौशेयकादि, तृतीय तूर्णादिमयं. एतेषु कौशेयकादिकं कारण एव ग्राह्यं. एतदपि जघन्यमध्यमोत्कृष्टभेदात्प्रत्येकं त्रिधा. तत्र जघन्यं मुखपोतिकाद्यं, मध्यमं चोलपट्टाद्यं, उत्कृष्टं प्रच्छदादि. एतदपि पुनः प्रत्येकं यथाकृताल्पबहुपरिकर्मभेदात्त्रिधा. एषु आद्याद्याभावेऽग्रेतनमग्रेतनं ग्राह्यं. वस्त्रस्य च दूषणा-नि प्राय आहारदूषणतुल्यानि, आहारदोषाश्च पुरतो वक्ष्यंते, ततस्तद्दोषा अपि ततोऽवसेयाः. सामान्यतस्तु—जं न तयट्ठा कीयं । नेव बुअं नेव गहियमन्नेहिं ॥ आहडपामिच्चं व-ज्जिऊण जं

For Private and Personal Use Only

कप्पए वत्थं ॥ १ ॥ किंच-वर्षाकाले वस्त्रं न ग्राह्यं, वर्षानंतरं च तत्र क्षेत्रे मासद्वयं यावत्, यत्पंचकल्पभाष्यं-वत्थाईणं गहणं । नाणुन्नायं तु होइ वासासु ॥ वासाईण परेणं । दुमासे अन्नेसु गिह्णंति ॥ १ ॥ शय्या वसतिः, सापि दोषरहितैव ग्राह्या, यदाह-मूलुत्तरगुणसुद्धं । थीपसुपंडगविवज्जियं वसहिं ॥ सेविज्ज सव्वकालं । विवज्जिउ हुंति दोसाउ ॥ १ ॥ तत्रामी मूलगुणाः-पिट्ठीवंसं दो धा-रणाउ चत्तारि मूलवेलीउ ॥ मूलगुणे हुववेया । एसाउ अहा-गडा वसही ॥ १ ॥ व्याख्या--पृष्टवंशो मध्यवलकः, द्वे धारिण्यौ बृहद्वल्यौ, यत्प्रतिष्टोऽसा-वेव, चतस्रो मूलवल्यौ, याश्चतुर्षु गृहपार्श्वेषु ध्रियते. एते सप्तापि मूलगुणाः, शेषाः स्तंभ-भित्त्यादय उत्तरगुणाः, एतैः शुद्धा वसतिर्ग्राह्या. अन्ये चामी वसतिदोषाः-कालाइकं तु व-ट्ठाणा-अभिकंत अणभिकंता य॥ वज्जाय महावज्जा। सावज्ज महप्प किरिया य ॥१॥ (कालाति-क्रांता, उपस्थापना, अभिक्रांता, अनभिक्रांता, वर्ज्या, महावर्ज्या, सावद्या, महासावद्या, अल्पक्रिया चेति नव वसतिदोषाः.) ऋतुबद्धे वर्षासु वा यत्र वसतौ स्थितास्तत्रैव मासे चातुर्मासिके वा पूर्णेऽपि तिष्टतां कालातिक्रांता १. ऋतुबद्धे यत्र मासकल्पः कृतस्तत्रैव द्वौ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मासौ वर्षासु यत्र चातुर्मासीं स्थितास्तत्र चाष्टौ मासानपरिहृत्य पुनः समागछतामुपस्थाना २. यावदर्थिकार्थं कृता शय्या, सा यद्यन्यैश्चरकादिपाखंडिभिर्गृहस्थैर्वा भुक्ता भवति, तदनंतरं च संयता आयांति तदाभिक्रांता ३. सैवान्यैरपरिभुक्ता सती साधुभिः सेव्यमानाऽनभिक्रांता ४. तथा आत्मार्थं कृता साधुभ्यो दत्वा स्वार्थमन्यां कुर्वतो गृहस्थस्य वर्ज्येति ५. तथा पाखंडिनामर्थाय कृता महावर्ज्या ६. पंचानां श्रमणानामर्थाय कृता सावद्या ७. साधूनामेवार्थाय कृता महासावद्या ८. या पुनरेतद्दोषाष्टकवर्जिता साल्पक्रिया शुद्धेत्यर्थः ९. आदिशब्दात्पात्रकादिपरिग्रहः. पात्रमप्येकेंद्रियविकलेंद्रियपंचेंद्रियभेदात् त्रिधा. तत्रैकेंद्रियावयवजं तुंबकादि, विकलेंद्रियदेहजं शंखशुक्त्यादि. पंचेंद्रियदेहजं कुतुपदंतशृंगपात्रादि. अत्रौघतः प्रथममेव ग्राह्यं. तदपि तुंबकदारु मृत्तिकारूपत्वात् त्रिधा. तदपि प्रत्येकं जघन्यादिभेदात् त्रिधा. तत्र जघन्यमुदंचकादि, मध्यमं मात्रकं, उत्कृष्टं पतद्ग्रहः. पुनरप्येकैकं त्रिधा, यथाकृताल्पबहुपरिकर्मभेदात्. पूर्वपूर्वभावे चेहोत्तरं ग्राह्यं. द्वितीयपदे शुद्धाऽलाभेऽशुद्धमपि पंचकपरिहान्या गृह्णंति. उक्तं च– "सोहंतो य इमे तह जइज्ज सव्वत्थ पणगहाणीए त्ति" तथा न च मिथः परस्परं विरुध्यं-

For Private and Personal Use Only

ते कलहायंते प्रीत्या निर्वहतीत्यर्थः. यदागमः—जइ इक्कभाणजिमिया । गिहिणोवि सदीह मित्तिया हुंति ॥ जिणवयणबहिप्भुया । धम्मं पुण्णं अयाणंता ॥ १ ॥ किं पुण जगजीवसुहा—वहेण संभुंजिऊण समणेणं ॥ सक्काह इक्कुमिक्को । बीउ विवरक्खिउ देहो ॥ २ ॥ तथा नित्यं संविग्नमनसो मोक्षाभिलाषिणो विरक्तत्वात् यो यस्य श्रुतस्य पठनपरावर्त्तनादियोग्यः कालः. यथा कालिकस्योत्तराध्ययनादेरस्वाध्यायिकवर्जं दिवसनिशाप्रथमचरमपौरुष्यौ, उत्कालिकस्य तु दशवैकालिकादेः "संजमघाउ १ प्पाए २ । सादिव्वे ३ वग्गुहे य ४ सारीरे ५" इति पंचविधास्वाध्यायिकवर्जं कालवेलावर्जं च सर्वमप्यहोरात्रं पठितुं कालः, तद्व्यतिरिक्तस्त्वकालः, तस्मिन्नकाले स्वाध्यायं वर्जयंति. ॥ १४ ॥ तथा—

॥ मूलम् ॥—वज्जंति निच्चवासं । सिज्जायरराय नियय पिंडे उ ॥ उसग्गाववायविऊ । अणले दिक्खंतिन कयावि ॥ १५ ॥ व्याख्या—एकक्षेत्रे नित्यवासं वर्जयंति, उक्तं च—पडिबंधो लहुअत्तं । न जणुवयारो न देसविन्नाण ॥ नाणाईण अवुड्ढी । दोसा अविहारपक्खंमि ॥ १ ॥ जो गाउयं समत्थो । सूरादारब्भ निक्खवेलं जा ॥ विहरउ एसो सपर—क्कमो य नो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विहरइ तेण परं ॥ २ ॥ अपवादतस्तु यतनया चिरमप्येकक्षेत्रे वसतां न दोषः, यदाह–पंचसमिया तिगुत्ता । उज्जुत्ता संयमे तवे चरणे ॥ वाससयंपि वसंता । मुणिणो आराहगा भणिया ॥ १ ॥ तथा पिंडशब्दस्य सर्वत्र संबंधात् शय्यातरपिंडं, राजपिंडं, नियतपिंडं च वर्जयंति. तत्र शय्याया आश्रयदानेन तरति संसाराब्धिमिति शय्यातर उपाश्रयदाता गृहस्थः, तस्य पिंडः शय्यातरपिंडः. तत्रेयं सामाचारी–यस्मिन्नाश्रये स्थिताः साधवस्तस्य यद्येकः प्रभुस्तदा तमेव, बहवश्च चेत्प्रभवस्तदा सति निर्वाहे सर्वानपि, अनिर्वाहे तु परिपाट्या एकैकं वर्जयंति, तद्दत्तमशनादिद्वादशकं न गृह्णंतीत्यर्थः. यदाह–असणाइया चउरो । पाउंछणवत्थपत्तकंबलयं ॥ सूइच्छुरं कन्नसोहण–नहरणिया सागरियपिंडो ॥ १ ॥ तृणादिकं तु गृह्णंत्येव. यदाह–तणडगलछारमल्लग–सिज्जासंथारपीढलेवाई ॥ सिज्जायरस्स पिंडो । न होइ सेहो य सोवहिउ ॥ १ ॥ यदा चालयसंकीर्णतया भिन्नोपाश्रयेषु वसंति, तदापि सर्वान् वर्जयितुमक्षमा आचार्याः शय्यातरं वर्जयंत्येव. स च शय्यातरो लिंगमात्रधारिणोऽपि वर्ज्यः. अर्हन्निषिद्धतादिदोषदुष्टत्वात्. यदाह–लिंगत्थस्स उ वज्जो । तं परिहरउव भुंजउ वावि ॥

For Private and Personal Use Only

जुत्तस्स अजुत्तस्स व । रत्तासणो तत्थ दिठंतो ॥ १ ॥ अयं च प्रातरावश्यके कृते स्वापे वा विहिते नवति, नान्यथा. उक्तं च–जइ जग्गंति सुविहिया । करंति आवस्सयं च अन्नत्थ ॥ सिज्जायरो न होई । सुत्ते व कए व सो होइ ॥ १ ॥ निर्गमनकालादेकदिनातिक्रमे शय्यातरो नवति, "चुत्थे वज्जंतहोरत्तं" इति वचनात्. विशेषश्चात्र–सूरत्थमणे दिण नि–ग्गयाण सूरोदये अ सागरिउ ॥ अत्थमियनिग्गयाणं । वारसजामाउ सागरिउ ॥ १ ॥ द्वितीयपदे तु ग्लानाद्यालंबनैः शय्यातरपिंममपि यतनया गह्णतां न दोषः. उक्तं च–डुविहे गिलाणंमि । निमंतणे दव्वदुल्लहे असिवे ॥ उमोअरिय पउसे । नये अ गहणं अणुन्नायं ॥ १ ॥ यतना चेयं–तिक्खुत्तो अ सखित्ते । चउद्दिसिं मग्गिऊण गीयत्थो ॥ दव्वंमि दुल्लनंमि । सिज्जायरसंतिए गहणं ॥ १ ॥ तथा राज्ञो मूर्द्धाभिषिक्तस्य पिंमो राजपिंमः, स चाष्टधा–असणाइया चउरो । वत्थं पायं च कंबलं चेव ॥ पाउंछणगं च तहा । अठविहो रायपिंमो उ ॥१॥ अयं च पूर्वपश्चिमजिनसाधूनां निषिद्धो व्याघातादिदोषसंनवत्वात्. ॥१६॥ तथाहि—

॥ मूलम् ॥—ईसरपजिईहिं तहिं । वाघाउ खद्धलो हु दाराणं ॥ दंसणसंगो गरहा ।

इयरेसिं न अप्पमायाउ ॥ १७ ॥ व्याख्या—ईश्वरादिभिः प्रविशद्भिर्निर्यद्भिश्च तत्र राजभवने साधोर्व्याघातः स्खलना स्यात्, अमंगलबुद्ध्या हननं वा स्यात्. संमर्दात्पात्रभंगश्च. 'लद्धत्ति' प्रचुरान्नादिलाभे लोभश्च स्यात्. उदाराणां पुंस्त्र्यादीनां दर्शने संगोऽभिष्वंगः स्यात्. तथाहो राजप्रतिग्रहमप्येते न त्यजंतीति गर्हा स्यात्. इतरेषां मध्यमजिनसाधूनां नैते दोषाः, कुतः? अप्रमादात्. तथा इदमेतावन्मात्रमहं तुभ्यं दास्यामीत्युक्तवतो गृहस्थस्याग्रेऽशनादिलाभः स नित्यपिंडः, वर्ज्यश्चायमाधाकर्मादिदोषसंभवात्. यद्दशवैकालिकचूर्णिः–" नियागं नाम नियर्यंति वुत्तं भवइ, तं तु यदा आयरेण आमंतिउ भवइ, जहा भयवं तुब्भेहिं मम दिणे दिणे अणुग्गहो कायव्वो, तदा तस्स अब्भुवगच्छंतस्स नियागं भवइ, न तु जत्थ अहाभावेणं दिणे दिणे भिक्खा लब्भइत्ति ". तथोत्सर्गापवादविदः, तत्र सामान्येनोक्तो विधिरुत्सर्गः, यथा–" वासावासं पज्जोसवियस्स निच्चभत्तस्स भिक्खुयस्स कप्पइएगं गोयरकालं गाहावइकुलं भत्ताए वा पाणाए वा निक्कमित्तए वा पविसित्तए वा. " तद्बाधनाय कारणापेक्षो विशेषोक्तो विधिरपवादः. यथा–" आयरियवेयावच्चेण वा, उवज्झायवेयावच्चेण वा, तवस्सिगिलाणवे-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यावच्चेण वा, खुड्डुएण वा, खुड्डियाए वा अवंजण जायएणंति ". एतद् द्वयं सम्यग् ज्ञात्वा उत्सर्गे उत्सर्गं, अपवादे च प्राप्तेऽपवादं, एवं उत्सर्गं वापवादं सेवमानो गीतार्थ आराधकश्च. यदाहुः—उस्सग्गे अववायं । आयरमाणो विराहउ होइ ॥ अववाए पुण पत्ते । उस्सग्गनिसेवउ हवइ ॥ १ ॥ अनेकांतवादस्वरूपं हि जिनप्रवचनं. उत्सर्गेणापवादेन वा यथाधिको लाभस्तथैव प्रवर्तंति. उक्तं च—तम्हा सव्वाणुन्ना । सव्वनिसेहो य पवयणे नत्थि ॥ आयं वयं तुलिज्जा । लाहाकंखिव्व वाणिउ ॥ १ ॥ उत्सर्गापवादविधिश्च साधुगुणेषु यथास्थानं भावित एव. तथाऽनलानयोग्यान्न कदाचिद्दीक्षयंति. यदाह—अट्ठारस पुरिसेसु । वीसं इत्थिसु दस नपुंसेसु ॥ पव्वावणा अणरिहा । इय अणला आहिया सुत्ते ॥ १ ॥ तत्र दीक्षानर्हाः पुरुषा अष्टादश, तद्यथा—बाले वुड्ढे नपुंसे य । जडे कीवे य वाहिए ॥ तेणे रायावगारी य । उम्मत्ते य अदंसणे ॥ १ ॥ दासे दुट्ठे य मूढे य । अणत्ते जुंगिएइ य ॥ उव्वद्धए य भयए । सेहनिप्फेडिएइ य ॥ २ ॥ तत्र सप्ताष्टौ वर्षाणि यावद्बालः, षष्टेः सप्ततेर्वा वर्षेभ्य उपरि वृद्धः. न स्त्री वा पुमान्नपुंसकः. यः स्त्रीभिर्निमंत्रितोऽसंवृत्तां वा स्त्रियं दृष्ट्वा सं-

उप चिं· ताभा.४ १०००

जातकामाभिलाषो वेदोदयमधिसोढुं न शक्नोति स क्लीबः. जडस्तु त्रिधा, भाषया शरीरेण क्रियया च. भाषाजडोऽपि त्रिधा, जलमूकः, मन्मनमूकः, एलकमूकश्च. यो जलमग्न इव बुडबुडायमानो वक्ति स जलमूकः. यस्य तु वदतः खच्यमानमिव वचः स्खलति स मन्मनमूकः. य स्त्वेलक इवाव्यक्तं मूकतया शब्दमात्रमिव करोति, स एलकमूकः. पथि भिक्षाटने वंदनादिषु चातिस्थूलतयाऽशक्तः शरीरजडः. क्रियां प्रतिक्रमणप्रत्युपेक्षणादिकां पुनः पुनरुपदिश्यमानामपि जडतया यो ग्रहीतुं न शक्तः स क्रियाजडः. कुष्टजगंदरादिरोगैर्ग्रस्तो व्याधितः. क्षात्रखननमार्गपातनादिचौर्यनिरतः स्तेनः. श्रीगृहांतःपुरनृपदेहतत्पुत्रादिद्रोहकृद्राजापकारी. यक्षादिना महामोहेन वा वैकल्यं नीत उन्मत्तः. अंधस्त्यानर्धिनिद्रोदयवांश्चादर्शनः. दासेत्ति. गृहदास्या जातोऽर्थादिना वा क्रीतः, ऋणाद्यर्थं वा धृतो दासः. दुष्टो द्विधा, कषायदुष्टो विषयदुष्टश्च. तत्र सर्षपभर्जिकाभिनिविष्टसाध्वादिवदुत्कटकषायः कषायदुष्टः. अतीवयोषिदादिषु गृद्धो विषयदुष्टः. अज्ञानादहृदयशून्यो मूढः. ऋणार्त्तः प्रतीतः. जातिकर्मशरीरादिभिर्दूषितो जुंगितः. तत्र मातंगकोलिकसूचिकादयोऽस्पृश्या जातिजुंगिताः,

नखक्षालनशौकरिकवागुरिकत्वादिनिंद्यकर्मकारिणः कर्मजुंगिताः. करचरणकर्णादिवर्जिताः शरीरजुंगिताः. अर्थार्थं विद्यार्थं वा इयंति दिनानि त्वदीयोऽहमित्येवं येनात्मनः परायत्तता कृता स्यात् सोऽवबद्धः. रूपकादिमात्रया भृत्यो धनिनामादेशकरणाय प्रवृत्तो भृतकः. शिष्यस्य दीक्षितुमिष्टस्य निस्फेटिकाऽपहरणं शिष्यनिस्फेटिका. उपलक्षणमिदं, मातृपित्रादिभिरप्यननुज्ञातस्य. इत्यष्टादशपुरुषेषु दीक्षाऽनर्हाः. एतान् दीक्षयतः शासनोड्डाहसंयमात्मविराधनादयो दोषाः. कारणे तु केषांचिदेषु दीक्षानुज्ञातैव वैरस्वाम्यादिवत्. एत एव दोषाः स्त्रीणामपि वाच्याः. गुर्विणी बालवत्सा चेति द्वौ पुनरधिकौ, तेन तासां विंशतिर्दोषाः, उक्तं च—इय अट्ठारस भेया । पुरिसस्स तहित्थियाए तह चेव ॥ गुव्विणी बालवच्छा । दुन्नि इमे हुंति अन्नेवि ॥ १ ॥ नपुंसकस्य तु षोडश भेदा आगमेऽभिहिताः, तेषु दश सर्वथा दीक्षाऽनर्हा अतिसंक्लिष्टत्वात्. ते चामी—पंडए वाइए कीवे । कुंभी ईसालुयत्तिय ॥ सोणी तक्कम्मसेवी य । पक्खिया पक्खिएइया ॥ १ ॥ सोगंधिए य आसत्तो । दस एए नपुंसया ॥ संकिलिट्ठत्ति साहूणं । पव्वावेउं अकप्पिया ॥ २ ॥ एषां स्वरूपं निशीथभाष्यादवसेयं. षट्

पुनः प्रव्राज्याः, तद्यथा–विद्धिए चिप्पिए चेव। मंतउंसहिउवहूए॥ इसिसत्ते देवसत्ते। पव्वावि- ज्ज नपुंसए ॥ १ ॥ आयत्यां राजांतःपुररक्षार्थं बाल्येऽपि छेदं दत्त्वा यस्य मुष्कौ गाल्येते स वर्धितकः १. यस्य तु जातमात्रस्यांगुष्टांगुलीभिर्मृदित्वा मुष्कौ ड्राव्येते स चिप्पितः २. एवं च कृते एतौ नपुंसकवेदोदयं प्राप्नुतः. कोऽपि मंत्रेण, कोऽप्यौषध्या, अन्यस्तु ऋषेः शापा- द्देवशापाच्च तदुदयं लभते, इत्येते षडपि प्राव्राज्याः. ॥ १५ ॥ तथा—

॥ मूलम् ॥—होउ विकारो मा वा। पुण नारीणं न वीससंति जउ॥ संते अवसंते वा। विसंमि को विससइ अहिणो॥ १६ ॥ व्याख्या—स्पष्टा, अन्यच्च—

॥ मूलम् ॥—अठमछट्ठचउत्थं । करंति वरिसचउमासपक्खेसु ॥ संजमजत्ताहेउं । भुंजंति न रूवबलहेउं ॥ १७ ॥ व्याख्या—वर्षसमापको दिवसोऽपि वर्षं ज्येष्टपर्व, तत्राष्टम- मुपवासत्रयं. चतुर्मासससमापको दिवसोऽपि चतुर्मासकं चातुर्मासिकं पर्व. तत्र षष्ठमुपवासद्वयं. पक्षसमापको दिवसोऽपि पक्षः पाक्षिकं, तत्र चतुर्थमेकमुपवासं कुर्वंति. एतत्प्रायिकीं वृत्तिमा- श्रित्योक्तं. अन्यथा सत्यां शक्तौ अधिकमपि तपः सेवंते, अशक्तौ तु हीनमपि. यदपरेषु दिवसे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षु चुंजंते, तदपि संयमयात्राहेतुं. ईर्याशुद्धिस्वाध्यायवैयावृत्यादिक्रिया न ग्रासमात्रं विना निर्वहतीति बुद्ध्या, न पुना रूपबलहेतुं, यात्राशब्दोऽत्र निर्वाहार्थः. ॥ १७ ॥ तथा—

॥ मूलम् ॥—वसहिं सया विवित्तं। संयमजुग्गं अट्टूसियं खित्तं ॥ गीयत्थं च सहायं। इछंतुवहिं अबहुमुल्लं ॥१८॥ व्याख्या—इछंतीति क्रियायाः सर्वत्र संबंधात्, वसतिं शय्यां सदा विविक्तां स्त्रीपशुपंमकादिरहितां इछंति. क्षेत्रं नगरग्रामाद्यं संयमयोग्यं अदूषितं च पार्श्वस्थादिभिरिछंति. संयमयोग्यता च क्षेमादिगुणयुक्तस्यैव क्षेत्रस्य नवति. यदाह—खेमो सिवो सुजिरको। अप्पप्पाणो उवस्सयमणुन्नो ॥ एसो उ खित्तकप्पो। गामनगरपट्टणाइन्नो ॥१॥ खेमो मरविरहिउं। रोगासिवविरहिउं सिवो होइ ॥ पउरन्नपाणदेसो। होइ सुजिरको मुणेअव्वो ॥२॥ जलुगासंखगसूइग। पिसुगमसगाईविरहिउं जो उ ॥ सो होइ अप्पपाणो। अप्पअजावंमि थोवे वा ॥ ३ ॥ समभूमिरेणुवज्जिय—रिउरकमावस्सयामणुन्नायु ॥ गामनगराविय बहू—पाउगा मासकप्पस्स ॥ ४ ॥ सज्जनजणो उ जद्दो। जहियं च मणुन्न साहुजोणीउं। तारिसउं खित्तंमि। समणुन्नाउं विहारो उ ॥ ५ ॥ तथा सहायं गीतार्थमागमज्ञमिछंति. उक्तं च-गीयं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुत्तं भणइ । अत्थो पुण होइ तस्स वक्खाणं ॥ गीएण य अत्थेण य । गीयत्थो होइ नायव्वो ॥ १ ॥ इदमत्र तत्वं—यदि सर्वेऽपि विहारिणो गीतार्था भवंति तदा सम्यगपक्षः, तदभावेऽपि यं पुरस्कृत्य विहारः क्रियते स गीतार्थ एव विलोक्यः, मुग्धमृगकुले कृष्णसारवत्. यदार्षं—गीयत्थो य विहारो । बीओ गीअत्थमिस्सओ भणिओ ॥ इत्तो तइय विहारो । नाणुन्नाओ जिणवरेहिं ॥ १ ॥ तथोपधिं भोग्यवस्त्रपात्ररूपं अबहुमूल्यं अमहदर्घ्यं इच्छंति, अन्यथा उपघातसंभवात्. ॥ १० ॥ किंच—

॥ मूलम् ॥—पाएण लूहवित्ती । नवकप्पविहारिणोवि पाएण ॥ पाएण अणेगचारी । निप्पडिकम्मावि पाएण ॥ १७ ॥ व्याख्या—प्रायेण भूम्ना रूक्षेण निःस्नेहाशनेन वृत्तिः प्राणधारणा येषां ते रूक्षवृत्तयः, "अभिक्खणं निव्विगइं गया य त्ति" वचनात्. गुरुग्लानक्षपकबालासहादीनां स्निग्धाहारेऽपि न दोष इति प्रायोग्रहणं. तथा प्रायेण नवभिः कल्पैर्विहरंतीत्येवंशीला नवकल्पविहारिणः. तत्र ऋतुबद्धकाले मासातिक्रमे, वर्षासु च चातुर्मासातिक्रमे विहरंतीति नवविहारकल्पाः. साधूनां प्रायोग्रहणादपूर्वज्ञानाद्यर्थं क्षीणजंघाबल-

त्वेन वा चिरमपि स्थातुं कल्पते. परं तदापि स्वाश्रितं क्षेत्रं नवभिर्भागैर्विभज्य प्रतिप्रति-
मासमेकैकभागे विहरंतो वर्षावासं नवमे भागे कुर्वंतीति रीतिः. तथा प्रायेणानेके समुदि-
ताः संतश्चरंतीत्यनेकचारिणः. यदुक्तं—एगाणियस्स दोसा । इत्थीसाणे तहेव पडिणीए ॥
भिक्खविसोहि महव्वय । तम्हा स बि इज्जए गमणं ॥१॥ पंचकल्पेऽप्युक्तं– सब्बंदट्ठाणनिवेसणस्स
। सब्बंदगहियभिक्खस्स ॥ सब्बंदजंपिरस्स य । मा मे सत्तूवि एगागी ॥२॥ प्रायोग्रहणान्निर्विका-
रस्य गुर्वादेशादेकाकिनोऽपि कल्पते विहर्तुं. यत्स्थानांगं–अट्ठहिं ठाणेहिं संपन्ने अणगारे अरि-
हइ एगल्लविहारपडिमं उवसंपज्जित्ताणं विहरित्तए. तं जहा–सड्ढीपुरिसजाए १, सच्चेपुरिसजाए
२, मेहावीपुरिसजाए ३, बहुस्सुए पुरिसजाए४, सत्तिमं५, अप्पाहिगरणे६, धिइमं७, वीरियसंप-
न्ने ८. इति. तथा प्रायेण निःप्रतिकर्माणः स्नानादिशुश्रूषारहिताः, प्रायोग्रहणं गुरुबालग्ला-
नादीनां यतनया करचरणादिधावनस्यानुज्ञातत्वात्. ॥ १९ ॥ तथा—

॥ मूलम् ॥––निच्चमचंचलनयणा । पसंतवयणा पसिद्धगुणरयणा ॥ जियमयणा मिउवय-
णा । सव्वत्थवि सन्निहियजयणा ॥२०॥ व्याख्या––नित्यमचंचलनयना जितेंद्रियत्वात्. शेषाणि

विशेषणानि पठितसिद्धानि. ॥२०॥ तथानेकगुणधारत्वेन साधूनामनेकोपमानयोग्यतामाह——

॥ मूलम् ॥——विरया सुइरयणजुत्ता । महियमया तारवत्त सुबहुदया ॥ ससिमेहनयरहा इव । रेहंते सायरसहाया ॥ २१ ॥ व्याख्या——इह प्रथमद्वितीयतुरीयपदैरधिकारायाताः साधव उपमेयाः. तृतीयपदेन तेषामुपमानानि चंद्रादीनि ज्ञेयानि. 'रेहंतेत्ति' शोभंते. कीदृशा इत्याह–विरमंतिस्म सावद्ययोगेभ्य इति विरताः, शुचीनि पवित्राणि, 'तत्थ यतिरयणविणिउगमइयमिति' स्वमतालंबनात्, "न्यवेशि रत्नत्रितये जिनेन यः" इति परमताभिप्रायाच्च, रत्नानि ज्ञानदर्शनचारित्राणि तैर्युता युक्ताः. तथा मथितो विलोडितोऽष्टरूपोऽपि मदो यैस्ते मथितमदाः. तथा तारं निर्मलं वृत्तं चारित्रं येषां ते तारवृत्ताः. रत्नत्रयांतःसंगृहीतमपि यत्पुनश्चारित्रमुपात्तं, तद्रत्नत्रयेऽपि चारित्रप्राधान्यख्यापनार्थं. ज्ञानदर्शनवतामपि चारित्रमंतरेण मोक्षानभ्युपगमात्. तथा सुबहुर्दया सर्वजीवेषु हितचिंतनरूपा येषां ते सुबहुदयाः, ततः कर्मधारयः. इह अहिंसाप्रमुखमहाव्रतरूपे चारित्रे गृहीतेऽपि यत्पुनर्दयाग्रहणं तच्चारित्रेऽपि दयासारत्वज्ञापनार्थं. तथा सादरः सोपक्रमो महत्यपि संकटे यथोचि-

तानुष्ठानकारी स्वजावो येषां ते सादरस्वजावाः. न तु माताशब्दजापकपुरुषवद्दास्योपहृताः, इत्येकोऽर्थः. ॥ १ ॥

के इव? शशिन इव, बहुवचनमत्र सर्वज्ञतत्त्वज्ञहृदयानंदकं, कथंभूताः? उः हरः, इः स्मरः, उश्च इश्च विः, तत्र रता विरताः, हरशिरःस्थानात् स्मरसहचरत्वात्. तथा सुदेः स्वेतपक्षस्य रचनं, तेन युताः सुदिरचनयुताः, शशिप्रजयैव शुक्लपक्षप्रतिष्ठानात्. तथा मकारोऽलाक्षणिकः, आभकाः कामुकास्तेषां मता इष्टा अजिमताः, चंद्रकरस्पर्शेन तेषां शृंगाररसस्योद्दीपनात्. तथा तारास्वश्विन्यादिनक्षत्रेषु व्यक्तः सुबहुरुदयो येषां ते. तथा सागरः सहायो येषां ते सागरसहायाः, समुद्र एव हि विधोर्वृद्धिं त्रुटिं वानुसरतीति द्वितीयोऽर्थः. ॥ २ ॥

पुनः साधुपक्षः प्रस्तूयते-किं विशिष्टाः साधवः? विगतं रतं ग्राम्यधर्मो येन्यस्ते विरता ब्रह्मचारिण इत्यर्थः. तथा जातौ जातौ यदुत्कृष्टं तद्रत्नमजिधीयते इति वृद्धवादात्. श्रुतिरत्नं प्रधानशास्त्रं अंगप्रविष्टाद्यं तेन युताः श्रुतिरत्नयुताः. तथा महितं पूजितं मतं शासनमेषां ते महितमताः. तारमतिशयेन व्यक्तेषु विद्वत्सु सुबहुरुदयो येषां ते तारव्यक्तसुब-

हृदयाः. तथा सातं सुखं रांति ददतीति सातराः सहायाः संयमिनामिति गम्यते. अन्ये सहाया हितचिंतका अपि परमार्थतो दुःखदा एव, न तथा साधवः. यदार्ष—"असयाए सहायत्तं । करंतिमे संयमे चरंतस्स" इति तृतीयोऽर्थः ॥ ३ ॥

के इव? मेघा इव, कीदृशा मेघाः? इत्याह—विशिष्टो रयो जलप्रवाहो येभ्यस्ते. तथा "सुइरत्ति" स्वपनशीलानि अनांसि शकटानि यत्र, एवंविधो युगः कालविशेषो येषु ते. तथा पंकाकुलत्वेन तदा तेषां निर्व्यापारत्वात्. महामहिषास्तैरितः प्राप्तो मदो येषु ते महेतमदाः, वर्षासु माहिषं माद्यतीति प्रत्यक्षगम्यं. तारं वृत्तः सुवहानां प्रधाननदीनां उदयो येभ्यस्ते. तथा सादं खेदं रांति ददतीति सादराः शफाः खुरा यासां ताः सादरशफा अजाश्छाग्यो येभ्यस्ते सादरशफाजाः. वर्षति हि वारिदे वारिणा शटत्सु शफेषु छागीनां खेदो जायते. इति चतुर्थोऽर्थः. ॥ ४ ॥

पुनः साधुपक्षे विरजसो बध्यमानकर्मरहिताः. तथा "यथा वाचा निशा गिरा" इति वचनदर्शनात् सुगिरा मधुरवचना ये जना ऋषयस्तैर्युताः सुगिराजनयुताः, न तूबृंखला-

जनव्यासंगकलुषिता इत्यर्थः. मकारस्यालाक्षणिकत्वात्. अधिको विशिष्टज्ञानादिलाभेन मदो हर्षो येषां ते. तथा तारां निर्मलां वृत्तां वृत्ताकारां सुष्टु प्राधान्यं, नित्यत्वाकृतकत्वादिनान्यवनितादिभ्यो विलक्षणां वधूं सिद्धिलक्षणां दयंते ददति ये ते तारवृत्तसुवधूदयाः. "दीर्घह्रस्वौ मिथोवृत्तौ" इति पदेन वधूशब्दस्य ह्रस्वः. एवं सर्वत्र दीर्घस्य ह्रस्वीकरणे ह्रस्वस्य च दीर्घीकरणेऽयमेव न्यायोऽनुसर्तव्यः. हायनं हायः परित्यागः, शाकरसस्य हाया येषु ते शाकरसहायाः सर्वेष्वपि रसेषु प्रायः शाकरसो दुस्त्यजोऽतस्तद्ग्रहणं, उपलक्षणं वा शेषरसाणां. इति पंचमोऽर्थः. ॥ ५ ॥

अथ नगः पर्वतस्तत्पक्षः—विशिष्टा रदा दंतका गिरेर्बहिर्निर्गतास्तिर्यक्प्रदेशा येषु ते विरदाः. तथा सुकिरणानि महासूकरणानि वनानि वृक्षसमूहास्तैर्युताः सुकिरवनयुताः. तथा महमुत्सवं इताः प्राप्ता महेता निरुपद्रवत्वात्, मृगा अरण्यकाः पशवो गजविशेषा वा येषु ते महेतमृगाः. तारं रौप्यं, शेषधातूनामुपलक्षणं, वृत्तं निष्पन्नं येषु ते तारवृत्ताः. सुष्टुवहानां नदीनामुदयो येभ्यस्ते सुवहोदयाः. पर्वतजा हि नद्य इति रूढिः, ततः कर्मधार-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यः· तथा रः कामस्तस्येहा रेहा तदंतकरत्वात् रेहांता ऋषयस्तेषामेष इष्टा येषु ते रेहांतैषाः, मुक्तकामा हि मुनयो महीध्रमध्य मध्यासते. तथाऽतरसां दुर्बलानां सखायो 'राजन् सखीति' अट्प्रत्ययेऽतरःसखा अगा वृक्षा येषु तेऽतरःसखागाः, रणतुमुलत्रस्तानां हितकातराणां गिरिद्रुमा एव शरणं. यद्वा न विद्यते करो राजदेयो भागो येषां तेऽकरा भिल्लादयस्तत्सखा अगा द्रुमा येषां ते, तथा कर्मधारयः. इति षष्ठोऽर्थः. ॥ ६ ॥

पुनः साधुपक्षः—विशिष्टो रवो व्याख्यानध्वनिर्येषां ते विरवाः. श्रुतिं आगमश्रवणं राति ददातीति श्रुतिरो यो गणो गच्छस्तेन युताः, आगमावगमाय गच्छवासमाश्रिता इत्यर्थः. मखिनां याज्ञिकानां यज्ञनिषेधकत्वेन अमता अनिष्टा मख्यमताः. ता लक्ष्मीः, रः कामस्तत्र वृत्तिर्व्यापारो येषां ते तारवृत्तयो लक्ष्मीलुब्धाः कामगृद्धाश्च, तैरसुवह उदयः शीलांगरूपो येषां ते तारवृत्त्यसुवहोदयाः. तथा सादं खेदं रांतीति सादराः प्रत्यनीकास्तान् प्रति सहः क्षम आत्मा येषां ते सादरसहात्मानः, प्रत्यनीककृतव्यलीकानां सोढार इत्यर्थः. इति सप्तमोऽर्थः ७.

अथ नगशब्दस्य द्व्यर्थत्वान्नगस्तरुस्तत्पक्षे—विरतासोर्गतप्राणस्य एः कामस्य रवणं श-

For Private and Personal Use Only

ब्दनं तेन युता विरताश्चिरवणयुताः. वृक्षा हि स्निग्धछायतया त्रिनयननयनानलझलकितमपि मदनमुज्जीवयंति. भूम्यंतर्गतमूलत्वेन महिं पृथ्वीं भ्रमंति गछंति मह्यमकाः. तथा ताराणि कीटाद्यैरदूषितानि पत्राणि दलानि येषां ते तारपत्राः. सुबहुरतिमहत्त्वमापन्नो दवो दहनं येन्यस्ते सुबहुदवाः, ततः कर्मधारयः. तथा स्वापरसस्य नावो नवनं येभ्यस्ते स्वापरसन्नावाः, पांथा हि वृक्षतलमासाद्य सद्यः शेरत इति. इत्यष्टमोऽर्थः. ॥ ८ ॥

पुनः साधुपक्षः, विरता निवृत्ता आशा धनांगनादिस्पृहा येषां ते विरताशाः. उः ईश्वरस्तद्वत् एः कामस्य विलेखनं, तेन युतास्ततः कर्मधारयः. महः सर्वज्ञावाविर्भावकं ज्योतिस्तेन इतं प्राप्तं मतं मननं ज्ञापनमेषां ते महइतमताः. तथा तारो निर्मलो व्यक्तः प्रकटः सुपक्षो ज्ञानदर्शनचारित्रात्मको मार्गस्तेन उत् ऊर्ध्वं मोक्षाभिमुखमयंते गछंतीति तारव्यक्तसुपथोदयाः. तथा रे इत्यामंत्रणं अघस्य पापस्य अंताय ईशते ते अघांतेशाः. अरसेषु निःस्वादेषु प्रस्तावाद्भक्तपानेषु नावो येषां तेऽरसन्नावाः, न तु सरसरसवत्यास्वादसादरा इत्यर्थः. इति नवमोऽर्थः. ॥ ९ ॥

नगशब्देन मात्राच्युतगत्या नागोऽपि सूच्यते, ततस्तत्पक्षः—विशिष्टा रदा मुखांतर्गता दंता येषां ते विरदाः विशिष्टत्वं वान्यसत्त्वापेक्षया काष्टादिकमपि जक्षितुं क्षमत्वात्. तथा शुचि श्वेतं रदनयुगं मुखाद्बहिर्निर्गतं दंतद्वयं येषां ते शुचिरदनयुगाः. तथा मृधार्थं युद्धार्थं इतः प्राप्तो मदो दानजलं यैस्ते मृधेतमदाः. ताराणि मौक्तिकानि तैर्वृत्ता वृत्तलक्षणया आदृतास्तारवृत्ताः. यन्नामकोषः—"वृत्ते तु वृतवान् वृत्तौ". कुंजिकुंभेषु हि संभवंति मुक्ताः. सुबहुर्द्रवो गमनं येषां ते सुबहुद्रवाः, शीघ्रगतयः, ततः कर्मधारयः. तथा 'रेहंतत्ति' रेजमाणा गर्जिशब्दं कुर्वाणाः, ईशानां राज्ञां अदरां निर्भयां सभां यांतीति ईशादरसभायास्ततः समासः. इति दशमोऽर्थः. ॥ १० ॥.

पुनः साधुपक्षः—विशिष्टा रतिश्चारित्रे विद्यते एषामभ्रादित्वात् अप्रत्यये विरताः. शुचिः सूर्यस्तद्वत् रयणं गमनं तेन युताः. यथा एकत्र राशौ वासरेशस्तथा यतयोऽप्येकत्र ग्रामादौ मासमेव तिष्ठंति. आमेषु प्रस्तावादारोग्येषु हितं पथ्यं मतं शासनमेषां आमाहितमतास्ततः पूर्वपदेन कर्मधारयः. तथा तारा निर्मलाः अकारविश्लेषात् अवृत्तोजानोऽसूनां

प्राणिप्राणानां वधाय उदयो येषां तेऽनूत्तासुवधोदयास्ततः कर्मधारयः. इहासुमतो वधायो-
गादसुग्रहणं. तथा रः पादपूरणे, ईहाया अंतकरत्वात् ईहांता निर्ममास्तेषु ईशाः स्वामिन
ईहांतेशाः. अरसो मुक्तकामत्वेन निरास्वादो हावः स्त्रीणां द्वितीयोंगजालंकारो येषु तेऽरस-
हावाः, तुलायष्टिवन्मध्यग्रहणे आद्यंतयोरपि ग्रहणं, जवतीजावहले अप्यत्र ग्राह्ये. इत्येका-
दशार्थः. ॥ ११ ॥

न य शब्देन प्राकृतशैल्या नदा उच्यंते, ते चेह अल्पजला नदा अगाधजला ह्रदा
इत्यवांतरजेदानश्रयणात् पद्महदादयस्ततस्तत्पक्षः—'उइरत्ति' उदयनशीला विशिष्टा रता-
शा रमणाजिलाषो येषु तानि उदित्वरविरताशानि वनानि जलानि तैर्युताः. तत्र हि शीत-
ला जललहरीर्निरीक्ष्य संजातरमणरणकाः सुराः खेचराश्च परितः क्रीडंति. अत्र प्राकृतत्वा-
द्विशेष्यं पूर्वनिपतितं. यन्नाममाला–पात्रं तदंतरमिति. तथा सुबहुर्द्रवो नीरस्पंदो येन्यस्ते
सुबहुद्रवाः. गंगासिंधुमुख्याः सिंधवो हि तेषां स्पंदः. तथा स्वादप्रधानो रसः स्वादरसः सु-
स्वादुजलं, तस्य जावः स्वयमेवोत्पत्तिर्येन्यस्ते स्वादरसजावाः. न हि तेषु पर्जन्यजन्यं जलं,

किंतु विश्रसापरिणामेन ते ते पुद्गला जलरूपतया स्वयमेव परिणमंतीति भावः. इति द्वादशार्थः. ॥ १२ ॥

पुनः साधुपक्षः—विगतो रः कामो येभ्यस्ते विराः, स्वार्थे को विरकाः. श्रुतेः शास्त्रस्य रेण शब्देन विताः श्रुतिरणास्तैर्युक्ताः, शास्त्रज्ञसंगतिकृत इति भावः. तथा मथितो निवारितो मदो मद्यपानजन्मा समग्रप्रमादानामादिभूतो यैस्ते मथितमदाः. तथा ताराणां वार्तानां पूर्वपुरुषकथानां सुबहुश उदयो येभ्यस्ते तारवार्तासुबहूदयाः. तथा शातास्तक्षिता रसानां नाट्यप्रसिद्धानां अष्टानां शृंगारादीनां भावाः स्थायिनो रत्यादयो व्यभिचारिणश्च धृत्यादयो यैस्ते शातरसभावाः. इति त्रयोदशार्थः. ॥ १३ ॥

अथ रथपक्षः—विशिष्टो रयो वेगो येषां ते विरयाः. तथा शुचिरचनं यथास्थाननिवेशनात् पवित्रघटनं युगं कुबरं येषां ते शुचिरचनयुगाः. मथितं गमनं तत्र मता अभीष्टाः. तारमतिशयेन वर्त्मनि मार्गे सुष्टु प्रधानेन वहेन वृषभस्कंधेन उदयो येषां ते तारवर्त्मसुवहोदयाः. तथा 'रेहंतत्ति, राजमाने ईषे इव ईषे उभयपार्श्ववर्तिनी काष्ठे येषां ते राजभा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नेषाः. अरेषु सहं समर्थं अयो लोहं येषु तेऽरसहायसः. लोहबद्धारको हि रथः स्थपुटेऽपि पथि संचरन्न भज्यते. इति चतुर्दशार्थः. ॥ १४ ॥

पुनः साधुपक्षः—-विगतो रजो द्वितीयगुणः, उपलक्षणत्वात्तमोऽपि येषां ते विरजसः सात्विका इत्यर्थः. आसुतिर्मद्यसंधानं, रः कामः, "अणत्ति" ऋणं, अकारप्रश्लेषात्तैरयुता रहिताः आसुतिऋणायुताः, मद्यव्यसनिनः कामिनः ऋणिनश्चारित्रनिषेधात्. तथा प्रेत्यं बोधिप्राप्त्या महितमिव महितं मृतं मरणं येषां ते महीतमृता उत्सवप्रायमरणा इत्यर्थः. यतः—संचिततपोधनानां । नित्यं व्रतनियमसंयमरतानां ॥ उत्सवभूतं मन्ये । मरणमनपराधवृत्तीनां ॥ १ ॥ तथा तारं उच्चैरुच्यत इति तारवाक्, तस्य भावस्तारवाक्त्वं, तत्र सुवहद्वन्महापूरवदुदयो येषां ते तारवाक्त्व सुवहोदयाः. यथा हि प्रथमप्रावृषि पूर्वं प्रेरणवा प्रसर्पन् पानीयपूरो न केनापि रोद्धुं शक्यस्तथा व्याख्याक्षणे मुमुक्षवोऽपि तथा स्व आत्मीयः, अपरश्च तद्व्यतिरिक्तस्तत्र समानो विशेषरहितो भावोऽभिप्रायो येषां ते स्वापरस्वभावाः सम मित्रशत्रव इत्यर्थः. ॥ इति पंचदशोऽर्थः. ॥ १५ ॥

For Private and Personal Use Only

अथ "नयरहत्ती" इत्युपमानपदं प्राकृतबलाद्भंक्त्वाऽन्यथा व्याख्यायते—नगरं पुरं, खश्च सूर्यः, खो रवौ इत्यमरवचनात्. तत्र पूर्वं नगरपक्षः—विशिष्टो रवः कलकलो येषु तानि विरवाणि, घरट्टघोषजनरववाद्यध्वनिभिः शब्दमयत्वात्. "सुइरत्ति" शुकवंति यानि वनानि, तैर्युतानि शुकवद्वनयुतानि. वनखंडैरेव नगरगोचरं सश्रीकं. महितानि, तारकादिभ्य इत् इति इत्प्रत्यये उत्सवयुक्तानि. अत एव मतान्यभिष्टानि. तथा तारा उज्ज्वला वार्ता आजीविका व्यवसायरूपा यत्र तानि तारवार्तानि. सुबहवो द्रवा द्यूतादिकाः केलयो येषु तानि सुबहुद्रवाणि, ततः कर्मधारयः. तथा रे इति संभाषणे, खांतेन आकाशप्रांतेन ईर्ष्यां स्पर्धां कुर्वंतीति खांतेर्ष्याकराः, सत्त्रा आवासास्तासां श्रया इव श्रया इष्टदेवा इत्यर्थः. खांतेर्ष्याकरसत्त्राश्रया निरुपद्रवत्वेन नगरेष्वावासानामजंगुरत्वात्. अत्र सर्वत्र प्राकृतत्वाल्लिंगव्यत्ययः. ॥ इति षोडशोऽर्थः. ॥ १६ ॥

पुनः साधुपक्षः—द्वयोः स्वपरकार्ययो रता द्विरताः, बुद्धत्वाद्बोधकत्वाच्च. तथा एकाकिभिर्न विहर्तव्यं, द्विइस्तांतरितैर्निशि प्रस्वप्तव्यं, न नित्यवासैर्जाठ्यमित्येवं शुचिरवदाता

रचना येषां ते शुचिरचना युवानस्तरुणश्रमणा येषु ते शुचिरचनयुवानः. तथा मही नामनदी, शेषमहानदीनामुपलक्षणं, अमताऽवगाह्यत्वेनानिष्टा येषां ते मह्यमताः, यत्स्थानांगं– "नो कप्पइ निग्गंथाण वा निग्गंथीण वा इमाओ उद्दिट्ठाओ गणियाओ वंजियाओ पंचमहण्णवाओ महानइओ अंतोमासस्स दुक्खुत्तो वा तिक्खुत्तो वा उत्तरित्तए वा संतरित्तए वा, तं जहा–गंगा, जउणा, सरउ, एरवइ, मही". तथा ताराणि परतीर्थिकापेक्षया निर्मलानि पात्राणि ज्ञानादिगुणानां, अत एव सुबहुभिर्वृता आवृताः सुबहुवृताः. तथा रेखा आयुःकर्मदलिका पद्धतिः. तथा च लोकेऽपि वक्तारो भवंति, यथास्य कर्मरेखा दुर्बला सबला वेति तस्या रेखाया अंते आयुःसमाप्तावित्यर्थः. स परोक्षे इति वचनात् सांपरोक्ष्यं अजराणां नित्यतरुणत्वेन देवानां वयोविभागव्यतीतत्वेन सिद्धानां वा सभां स्थानं गच्छतीति साजरसभागाः. उपरता हि मुनयः स्वर्गं मुक्तिं वा यांतीति निश्चयः. यदार्षं—निव्वाणसुहं पावइ साहू सव्वसिद्धिं वा. इति सप्तदशोऽर्थः. ॥ १७ ॥

अथ सूर्यपक्षः—वौ पक्षिणि चक्रवाके रता विरतास्तद्बंधुत्वात्. शुचौ आषाढमासे रा

इव अग्नय इव तापकत्वात् शुचिरा गणा अष्टादश माठराद्यास्तैर्युताः, ततः कर्मधारयः. मथितं शोषितं अमृतं जलं यैस्ते मथितामृताः. तारं प्रधानं वार्त्तमारोग्यं येभ्यस्ते तारवार्त्ताः. आरोग्यं जास्करादिति वचनात्. सुबहुः शेषग्रहापेक्षया उदयो येषां ते सुबहूदयाः. यदुक्तं—रवेरेवोदयः श्लाघ्यः । कोऽन्येषामुदयग्रहः ॥ न तमांसि न तेजांसि । यस्मिन्नन्युदिते सति ॥ १ ॥ यद्वा तारावर्त्म आकाशं, तदेव समत्वाद्विशालत्वाच्च सुपथस्तत्रोदयो येषां ते तारवर्त्मसुबहूदयाः. रे इत्यालापे, जानामुकूनां अंते प्रजाजंगे सातरसा तीक्ष्णरसा या जा प्रभा तां यांति प्राप्नुवंति शातरसजायाः, बहुवचनं जिनमतापेक्षं. इत्यष्टादशार्थः. १८.

पुनः साधुपक्षः—सलीलगत्या गंजीरप्रकृत्या च द्विरदाः. न चैतदुपमानमनुपपन्नं, तीर्थंकृतामपि पुरुषवरगंधहस्तित्वेन पठितत्वात्. तथा श्रुती कर्णौ राति ददाति श्रुतिरं, अयनं दक्षिणोत्तरायनरूपं, युगं च पंचवर्षात्मकं येषां ते श्रुतिरायनयुगाः. मुनींद्रमुखात् अशीत्यधिके मंडलशते दिनकरसंचरणरूपं अयनं, तथा श्रावणासितप्रतिपत् प्रथमारंजं चंद्र, चंद्र, अभिवर्द्धित, चंद्र, अभिवर्द्धितवर्षनिष्पन्नं युगं च सम्यग् निशम्य अकर्णा अपि सकर्ण-

त्वं भजंते इति भावः. मृधं संग्रामं कुर्वंति तत्करोतीति ततः क्लीबे क्त इति क्तप्रत्यये मृधितं संग्रामकरणं, तत्र स्वभावभीरुत्वेन मृगा इव मृगाः, तारं अत्यर्थं वार्तानां फल्गूनां पाखंडिनामित्यर्थः, सुबहुर्द्रवः पलायनं येभ्यस्ते तारवार्तासुबहुद्रवाः, प्रवचनज्ञान्निरीक्ष्य पाखंडिनः पलायंते इति स्फुटमेव. तथा स्वात्मन्येव रसभावो येषां ते स्वात्मरसभावाः. बाह्यव्यापारपरित्यागेन परमात्मस्वरूपेण रसिका हि परममुनयः. इत्येकोनविंशतमोऽर्थः. ॥ १९ ॥

अथ गाथांतरनुक्तान्यपि परमऋषीणां गांभीर्याद्धर्मैस्तथाधिकृतत्वान्निरुपलेपत्वात्पुरुषोत्तमत्वाच्च वारिधिचक्रकमलवासुदेवानामप्युपमानानि संगच्छंते. ततस्तत्पक्षा अपि प्रपञ्च्यंते—तत्र पूर्वं समुद्रपक्षः—विरजसो रेणुरहिताः सर्वतो जलमयत्वात्, शुचीनां रत्नानां कर्केतनादीनां अयुतानि दशसहस्रा येषु ते, तथा अयुतमिति बहुत्वख्यापनार्थं, न तु नियमार्थं, यथा शतायुर्वै पुरुष इति. मथितेषु अमृतं जातमेषु मथितामृताः. ता लक्ष्मीस्तस्या रवेण शब्देन आर्त्तानां धनलुब्धानामित्यर्थः, सुबहु दयंते इति तारवार्तासुबहुदयाः. व्यवसायिनो हि समुद्रं श्रिताः शतगुणं लाभं लभंते. तथा सुष्ठु प्रधाना आकरा मणिमुक्ताप्रवालानां ये-

षु ते स्वाकराः. सह ह्रादेन घोषेण वर्तते इति सह्रादाः, ततः समासः. इति विंशत्तमोऽर्थः २०.

अथ चक्रपक्षः—विशिष्टो रवश्चीत्कार एषां तानि विरवाणि, शुचिरचनया प्रधानघट· नया युतानि. महिताः पूजिताश्चक्रादयस्तेषां मतानि इष्टानि महितमतानि. तारं वृत्तानि परिमंडलाकारत्वात्. सुबहुद्रवानि शीघ्रगतीनि काप्यस्खलितत्वात्. तथा सादं खेदं रांतीति सादरा वनादयस्तानपस्यति अंतयति घातः प्रहारो येषां तानि सादरलघानि. इत्येकविंशत्तमोऽर्थः. ॥ २१ ॥

अथ कमलपक्षः—विशिष्टं रजः परागो येषु तानि विरजांसि. शुचिना सूर्येण रचनं व्याकोशतायाः करणं, तेन युतानि शुचिरचनयुतानि. महनं महितं देवानां पूजनं तत्र म· तानि इष्टानि. तार उच्चैर्ध्वनिर्वक्त्रेषु येषां ते तारवक्त्राः. प्रस्तावाद्भ्रमरमरालादयस्तेषां सुबहुर्द्रवः केलिरेषु तानि तारवक्त्रसुबहुद्रवाणि. तथा सादः पंको रसश्च जलं ताभ्यां जा· तानि शोभितानि सादरसजातानि, पंकजातत्वाज्जलसंवर्धितत्वाच्च. इति द्वाविंशत्तमोऽर्थः. २२.

अथ वासुदेवपक्षः—विना गरुडेन रयो वेगो येषां ते विरयाः, गरुडवाहनत्वात्. वि·

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिष्टं रज एषां विरजसो वा रजोगुणे हि स्थितो विष्णुर्विश्वं पालयतीति लौकिकाः. शुचि-रत्नैश्चक्रादिभिर्युताः शुचिरत्नयुताः. यत्संग्रहणिः—चक्कं खग्गं च धणू । मणी य माला तहा गया संखो ॥ एए उ सत्तरयणा । सव्वेसिं वासुदेवाणं ॥ १ ॥ मथितो मयो नाम दैत्यः, सर्वदैत्यानामुपलक्षणं, यैस्ते मथितमयाः. तारवक्त्रा उज्ज्वलमुखाः सुवध्वः सत्यभामारुक्मिण्यादयस्ताभिः सह द्रवः केलिर्येषां ते तारवक्त्रसुवधुद्रवाः. तथा सादराः सोपक्रमाः सहाया बलदेवादयो येषां ते सादरसहायाः. ॥ इति त्रयोविंशत्तमोऽर्थः. ॥ २३ ॥ एवमस्या बह्वर्थाया गाथायाः कियंतोऽर्था लिखितुं पार्यंते? ते च धीमता स्वयमुन्नेया इति. ॥ २१ ॥ अथ साधुगुणानेव एकोत्तरवृद्धिविशिष्टानाह—

॥ मूलम् ॥—-नाणे दंसणचरणे । सामण्णेणगहा न हायंति ॥ दुविहं वहंति सिक्खं । वज्जंति न गारवेहिं तेहिं ॥ २२ ॥ व्याख्या—अंतर्गर्भितनिःशेषविशेषेण सामान्येन एकविधे ज्ञाने तत्वावबोधरूपे, दर्शने तत्वार्थश्रद्धानात्मके, चरणे जिनोक्तानुष्ठानलक्षणे, न हीयंते, न हीना भवंति, अप्रमत्तत्वात्. तथा द्विविधां ग्रहणासेवनाभेदात् शिक्षामनुशास्तिं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुरोरिति गम्यते, वहंति. तत्र साधूनाश्रित्य योगोद्वहनपूर्वा पूर्वादिसिद्धांताधीतिर्ग्रहणशिक्षा. साध्वीराश्रित्य पुनरेकादशांगाध्ययनं ग्रहणशिक्षा. यद्भाष्यं—तुच्छा गारवबहुला । चलिंदिया दुब्बला धिईए य ॥ इय अइसेसज्झयणा । भूयावाउ य नो थीणं ॥ १ ॥ आसेवनाशिक्षा तु द्वयेषामपि दशविधसामाचारीरूपा. उपलक्षणत्वाद्भेषापि गमनभोजनप्रत्युपेक्षणादि साधुव्यवहारप्रवृत्तिः. यदाह—सा पुण दुविहा सिक्खा । गहणे आसेवणे य नायव्वा ॥ गहणे सुत्ताहिज्जण । आसवणा तप्पकप्पाइ ॥ १ ॥ तथा त्रिभिर्गौरवैः ऋद्धिरससातलक्षणैर्न बध्यंते न स्ववशीक्रियंते. तत्र वस्त्रपात्रशयनाशनश्रावकादिऋद्ध्या चित्तोत्कर्ष ऋद्धिगौरवं, दायकबाहुल्येनान्वहं नवनवरसवतीलाभाडुन्मादो रसगौरवं. शरीरसौख्यार्थं सुकोमलशय्यादिकरणं सातगौरवमिति. ॥ २२ ॥

॥ मूलम् ॥—चउहाभिग्गहधारी । सज्झायं पंचहा विभावंति ॥ छज्जीवनिकायहिया । मुणंति सत्तविहमागाढं ॥ २३ ॥ व्याख्या—चतुर्धा द्रव्यक्षेत्रकालभावभेदात् अभिग्रहान् धरंतीत्येवंशीला अभिग्रहधारिणः. तत्र लेपकृदलेपकृदेतं वा द्रव्यं मया ग्राह्यमिति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रव्याभिग्रहः, द्रव्यप्रमाणकरणं वा. (१). क्षेत्रत एकद्वित्र्यादिष्वेव गृहेषु. (२). कालतः पूर्वाह्णमध्याह्नादावेव मया पर्यटनीयमिति क्षेत्राभिग्रहः कालाभिग्रहश्च. (३) हसतो रुदतो गायतो वा निषण्णादेर्वा हस्तेन भिक्षाग्रहणं भावाभिग्रहः (४). एवमभिग्रहचातुर्विध्यं सर्वत्र भावनीयं. तथा पंचधा वाचनापृछनापरावर्तनानुप्रेक्षाधर्मकथाभेदात् स्वाध्यायं विशेषेण भावयंति. विशेषश्च स्वाध्यायस्य प्राधान्यख्यापनार्थः, तन्मूलत्वात्सर्वाचरणानां. उक्तं च— बारसविहंमि तवे । अप्भिंतरबाहिरे कुसलदिठ्ठे ॥ नवि अत्थि नवि होही । सज्झायसमं तवोकम्मं ॥ १ ॥ तत्रानधीतस्य सूत्रस्य ग्रहणं वाचना (१). ततः संदेहे सति पृछना पृछा. (२). निश्चितस्य सूत्रस्य अविस्मरणार्थं गुणनं परिवर्त्तना (३). सूत्रवदर्थस्यापि चिंतनमनुप्रेक्षा. (४). अभ्यस्तसूत्रार्थस्य परंप्रत्युपदेशदानं धर्मकथेति. (५). तथा षण्णां जीवनिकायानां पृथ्व्यप्तेजोवायुवनस्पतित्रसानां हिताः संरंभसमारंभारंभविवर्जनात्. तत्र—संकप्पो संरंभो । परितावकरो भवे समारंभो ॥ आरंभो उद्दवउ । सुद्धनयाणं च सव्वेसिं ॥ १ ॥ तथा अपवादालंबनाय आ सामस्त्येन गाढं बलीयः कारणं आगाढमित्युच्यते. द्रव्यक्षेत्रका-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लज्ञावपुरुषचिकित्सासहायभेदात्सप्तविधं जानंति. तत्राध्वकालादौ द्रव्यदुर्लभतां विमृश्य विधिना खर्जूरादिद्रव्यं संगृह्णतो द्रव्यागाढं. तथाविधक्षेत्रांतराभावे एकत्रापि क्षेत्रे तिष्ठतः क्षेत्रागाढं. विहारायोग्ये काले सुचिरमप्यवतिष्ठमानस्य कालागाढं. अत्युत्कटे संकटे निषिद्धमप्याददानस्य भावागाढं. यस्मिन्विनष्टे गच्छस्य विनाशस्तस्य पुरुषस्य कृतेऽशुद्धमपि गृह्णतः पुरुषागाढं. प्रासुकौषधोपदेशविदुषो वैद्यस्यालाभे सावद्यामपि चिकित्सां कारयतश्चिकित्सागाढं. सहायाभावे विहारादिकमकुर्वतः सहायागाढं. उक्तं च पंचकल्पे—दव्वे खित्ते काले। भावे पुरिसे तिगिछ असहाए ॥ एएहिं कारणेहिं । सत्तविहं होइ आगाढं ॥ १ ॥ जावंति पवयणंमि । पडिसेवा मूलउत्तरगुणेसु ॥ ता सत्तसु सुद्धेसु । सुद्धमसुद्धा असुद्धेसु ॥२॥२३॥ तथा—

॥ मूलम् ॥—पेहंति अठसुहुमे । अनवनियाणा नायदसधम्मा ॥ तिगुणिक्कारसआया—सणुज्झिया बारसतवस्सी ॥ २४ ॥ व्याख्या—अष्टौ सूक्ष्माणि सूक्ष्मत्वाद्दुर्लक्ष्याणि प्रेक्षंते प्रयत्नेन पश्यंति, प्रेक्ष्य च परिहरंतीत्यर्थः. यदार्षं—सिणेहं पुप्फसुहुमं च । पणुत्तिगं तहेव य ॥ पणगं बीयं हरियं च । अंडसुहुमं च अठमं ॥ १ ॥ तत्र स्नेहसूक्ष्मं अ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वश्यायादि १. पुष्पसूक्ष्मं वटपुष्पादि २. प्राणसूक्ष्मं कुंथ्वादि ३. उत्तिंगसूक्ष्मं कीटिकानग-रादि ४. पनकसूक्ष्मं पंचवर्णफुल्ली ५. बीजसूक्ष्मं शाल्यादि ६. बीजस्य मुखे यल्लोके तुषक-णिकेत्युच्यते. हरितसूक्ष्मं किशलयादि ७. अंडसूक्ष्मं कीटिकांडादि ८. तथा "अनवनि-याणत्ति" न विद्यंते नवसंख्यानि निदानानि राज्यादिप्रार्थनारूपाणि येषां तेऽनवनिदानाः, तत्र देवानामदृश्यत्वाद्राज्यस्यैव प्रार्थनं प्रथमं, राज्ञोऽपि चिंताचांतत्वेन दुःखित्वादुग्रादित्व-प्रार्थनं द्वितीयं, पुरुषाणां बहुव्यापारवत्वात्संग्रामादिदुःखकारित्वाच्च स्त्रीत्वप्रार्थनं तृतीयं, स्त्रीणां नीरुत्वाछंकनीयत्वाच्च पुरुषप्रार्थनं चतुर्थं, मनुष्याणामशुचयो नोगा इति सुरते देव-त्वप्रार्थनं पंचमं, अत्यंतकामलौल्याद्बहुरतदेवत्वप्रार्थनं षष्ठं. एतेषु षट्सु तपसा तत्तन्नावत्वं प्राप्तस्य न नवति बोधिलानः. भोगनिर्विण्णत्वादरतदेवत्वप्रार्थनं सप्तमं, अस्मिंश्च देवनवानंत-रं प्राप्तमानुष्यस्य सम्यक्त्वलानः स्यात्, न पुनर्देशविरतिः. तथा धर्मश्रद्धालुत्वाद्भोगानिर्वि-ण्णत्वात् श्रावकत्वप्रार्थनं अष्टमं, अस्मिंश्च देशविरतिर्नवति, न पुनर्यतिधर्मः. तथा कामनो-गनिर्विण्णस्य दारिद्र्ये सति गृहवासः सुत्यजः स्यादिति दारिद्र्यप्रार्थनं नवमं. अयं हि प्राप्त-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दारिद्र्यश्च चारित्रमपि लजते, न पुनः सिद्ध्यति. तथा ज्ञातो दशविधः क्षांत्यादिधर्मो यैस्ते ज्ञातदशधर्माः. तद्यथा—खंती अज्जव मद्दव । मुत्ती तव संयमे य बोधव्वे ॥ सच्चं सोयं अकिं—चणं च बंभं च जइधम्मो ॥ १ ॥ तत्र क्षांतिमार्दवार्जवमुक्तयः क्रोधमानमायालोभपरिहाररूपाः, तपोऽनशनादिः, संयम आश्रवविरतिः, सत्यं मृषावादविरतिः, शौचं संयमंप्रति निरुपलेपता निरतिचारतेत्यर्थः, आकिंचन्यं निःपरिग्रहत्वं, ब्रह्मचर्यं चेति. तथा त्रिगुणैकादशसंख्यास्त्रयस्त्रिंशदित्यर्थः, आशातनाः पुरोगमाद्यास्ताभिरुज्झिताः, तद्यथा—गुरोः पुरतः पार्श्वतः पृष्टतोऽप्यासन्नं गमने स्थाने निषीदने च प्रत्येकं तिस्रस्तिस्रः ए. बहिर्भूमौ शिष्यस्य गुरोः पूर्वमाचमने १०. गुरोः पूर्वं शिष्यस्य श्राद्धाद्यालपने ११. गुरोः पूर्वं शिष्यस्य गमनागमनालोचने १२. भिक्षामन्यस्यालोच्य गुरोरनालोचने १३. भिक्षामन्यस्योपदर्श्य गुरूणां दर्शने १४. भिक्षायामन्यं प्राग् निमंत्र्य गुरोर्निमंत्रणे १५. गुरुमनापृच्छ्ययान्यस्मै भैक्ष्यदाने १६. गुरोर्यत्किंचिद्दत्वा स्वयं स्निग्धमधुरभक्षणे १७. रात्रौ कः शेते जागर्ति वेति गुरुणोक्ते जाग्रतोऽपि शिष्यस्य तूष्णीभावे १७. शेषकालेऽपि गुरोर्व्याहरतः प्रतिवचनादाने १ए.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुर्वाहूतस्य स्थानस्थस्यैवोत्तरकरणे २०. गुर्वाभाषितस्य किमिति भणने, भणितव्यं च मस्तकेन वंदे इति २१. गुरुंप्रति शिष्यस्य त्वंकारे २२. गुरुणा वैयावृत्त्यं कुर्वित्युक्तस्य त्वं किं न करोषीति भणने २३. गुरुणां पुरो बहोः कर्कशस्य भणने २४. गुरोर्व्याख्याने शिष्यस्य दुर्मनस्त्वे २५. भंग्यंतरेण गुरावर्थं वदति न स्मरसीति भणने २६. गुरौ कथयत्यहं कथयिष्यामीति कथाछेदे २७. गुरौ कथयतीयं भिक्षावेलेत्यादिना पर्षद्भेदे २८. गुरुव्याख्यानानंतरं अनुत्थितायामेव पर्षदि स्वपाटवज्ञापनाय शिष्यस्य विशेषधर्मकथने २९. गुरुशय्यासंस्तारकादेः पादेन घट्टने ३०. गुरुशय्यासंस्तारकादौ स्थानासनशयनेषु ३१ गुरोरुच्चासननिषदने ३२. समासननिषदने वेति ३३ त्रयस्त्रिंशदाशातनाः ॥ तथा द्वादशसंख्यं तपोऽनशनादि विद्यते येषां ते द्वादशतपस्विनः, तपोभेदाश्च प्राग् निर्जराधिकारे व्याख्याताः ॥ २४ ॥

॥ मूलम् ॥—तेरस किरियाठाणे । चयइ चउद्दस मुणंति जियभेए ॥ पनरस थुणंति सिद्धे । दिक्खं जंपंति सोलसहा ॥ २५ ॥ व्याख्या—त्रयोदश क्रियाणां कर्मणां स्थानानि त्यजंति, तद्यथा–सति कार्ये त्रसादिकं घ्नतोऽर्थक्रिया १, तदभावे तद्घातोऽनर्थक्रिया २,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

असौ हतवान् हंति हनिष्यतीति द्विट्सर्पादेर्हिंसनं हिंसाक्रिया ३, लक्ष्यार्थं बाणं मुंचतोंतरागतस्य पक्ष्यादेर्हननमकस्मात्क्रिया ४, निरपराधस्याप्यपराधभ्रमात्ताडनं दृष्टिविपर्यासक्रिया ५, असत्यवचनं मृषाक्रिया ६, अदत्तादानक्रिया प्रतीता ७, मनसा दुःकर्मचिंतनमध्यात्मक्रिया ८, जात्यादिमत्तस्यापरहीलनं मानक्रिया ९, स्तोकेऽप्यपराधे प्रचंडदंडकरणं मित्रद्वेषक्रिया १०, मायाक्रिया ११, लोभक्रिया च प्रतीता १२, यथाख्यातचारित्रिणः सूक्ष्ममेषोन्मेषादिचेष्टाहेतुका सामायिकसातावेदनीयबंधरूपा ऐर्यापथिकीक्रिया चेति १३, ॥ तथा चतुर्दशजीवभेदान् जानंति तन्मूलत्वात्संयमस्य, तद्यथा—एकेंद्रिया द्विधा, सूक्ष्मा बादराश्च. तत्र सर्वलोकव्यापिनोऽसंक्रांतशस्त्रा अंतर्मुहूर्तायुश्चर्मचक्षुरविषयाः सूक्ष्माः. नियतस्थानस्थाः शस्त्रोपहता जघन्यतोंतर्मुहूर्तमुत्कृष्टतो द्वाविंशतिवर्षसहस्रान् यावज्जीवनशीलाश्चक्षुर्ग्राह्यपरिणामा बादराः. तथा द्वींद्रियास्त्रींद्रियाश्चतुरिंद्रियाश्च प्रतीताः. पंचेंद्रियास्तु द्विधा, संज्ञिनोऽसंज्ञिनश्च. तत्र गर्भजास्त्रिवेदा मनोलब्धिमंतः संज्ञिनः. संमूर्छिमाः केवलक्लीबवेदा अमनस्काश्चासंज्ञिनः. एते सप्तापि जीवभेदाः पर्याप्तापर्याप्तत्वेन द्विधा भवंतीति चतुर्दश.

For Private and Personal Use Only

पर्याप्तयश्चाहारशरीरेंद्रियानपानभाषामनोभेदात् षोढा. एतासु एकेंद्रियाणामाद्याश्चतस्रः, द्वित्रिचतुरिंद्रिया संज्ञिनां पंच, संज्ञिनां च षट्. तत्र ये स्वोचिताः पर्याप्तीः समर्थ्य म्रियंते, ते पर्याप्ताः, ये पुनर्यथोक्ताः पर्याप्तीरसमाप्य म्रियंते तेऽपर्याप्ताः. यद्यप्यपर्याप्ता अप्याद्येन पर्याप्तित्रयेण पर्याप्ता एव म्रियंते, तथापि स्वोचितपर्याप्त्यसंपूरणात्तेऽपर्याप्ता एव व्यपदिश्यंते.

तथा पंचदशभेदान् सिद्धान् स्तुवंति- धन्या अमी ये सकलक्लेशकारणं कर्मजालमुध्धृत्य नित्यनिरुपमसुखमपवर्गं गता न विक्षिप्यंते संसारसागरवीचिभिरिति. सिद्धभेदाश्चामी– गिहि परलिंगसिद्धा । थी नर कीवा य एगणेगाय ॥ तित्थंकर तित्थेयर । सय पच्च य बुद्धबोहीअ ॥ १ ॥ तत्र ग्रहिलिंगसिद्धा मरुदेवीप्रभृतयः १, परलिंगसिद्धाश्चरकपरिव्राजकादिलिंगसिद्धाः २, यदान्यलिंगिनोऽपि भावसम्यक्त्वोत्पन्नकेवलज्ञानास्तत्कालं सिद्ध्यंति तदामी दृष्टव्याः, नो चेद्यदि दीर्घायुष्कं स्वं जानंति, तदा तेऽपि साधुलिंगमेव भजंतीति. स्वलिंगेन रजोहरणादिना सिद्धाः स्वलिंगसिद्धाः ३, स्त्रीलिंगेन योषिदाकारेण सिद्धाः स्त्रीलिंगसिद्धाः ४, एवं पुरुषलिंगसिद्धाः ५, नपुंसकलिंगसिद्धाश्च ६, एकाकिनः संतो ये सिद्धास्ते एकसि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्धाः ७, द्व्यादिना अष्टशतांतेन समुदयेन सिद्धास्तेऽनेकसिद्धाः ८, तत्स्वरूपप्ररूपकं चेदं गाथाद्वयं—बत्तीसा अडयाला । सट्ठी बावत्तरी य बोधव्वा ॥ चुलसीइ छन्नुवइ । दुरहियमट्ठुत्तरसयं च ॥ १ ॥ अट्ठ य सत्त य छ पंच । चेव चत्तारि तिन्नि दो इक्को ॥ बत्तीसाइसु समया । निरंतरं अंतरं उवरिं ॥ २ ॥ एकादयो द्वात्रिंशदंता एकसमयेन सिध्यंतो निरंतरमष्टावेव समयान् यावत् सिध्यंति, तत ऊर्ध्वमवश्यमंतरं भवतीति. त्रयस्त्रिंशदादयोऽष्टचत्वारिंशदंता एकसमयेन सिध्यंतो निरंतरं सप्तैव समयान् यावत्सिध्यंति, ततोंतरं भवत्येव. एकोनपंचाशदादयः षष्ट्यंता एकसमयेन सिध्यंतः षट्समयान् यावत् सिध्यंति. ततः परमंतरं भवत्येव. एवं तावद्यावदष्टशतमेकसमयेन सिध्यंतः समयाद्ध्वमवश्यमंतरं कुर्वंत्येव. तीर्थंकराः संतो ये सिद्धास्ते तीर्थंकरसिद्धाः ९, अतीर्थंकरसिद्धाः सामान्यकेवलिनः १०, तीर्थे सति ये सिद्धास्ते तीर्थसिद्धा जंबूस्वाम्यादिवत् ११, तीर्थोच्छेदे तीर्थाभावे ये सिद्धास्तेऽतीर्थसिद्धाः, श्रूयते य सुविध्यादिजिनानां सप्तस्वंतरेषु तीर्थोच्छेदे केचिज्जातिस्मरणादिना प्राप्तरत्नत्रयाः सिध्यंतिस्म, तीर्थाभावे च सिद्धा मरुदेव्यादयः १२, तथा स्व-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यं गुरुनिरपेक्षतया बुद्धाः संतो ये सिद्धास्ते स्वयंबुद्धसिद्धाः १३, प्रतीत्यैकं कंचिद्वृषभा-दिकं बोधकारणं ये बुद्धास्ते प्रत्येकबुद्धाः, तथा च ये सिध्धास्ते प्रत्येकबुद्धसिद्धाः १४. स्व-यंबुद्धानां प्रत्येकबुद्धानां च बोधयुपधिश्रुतलिंगकृतो भेदः, तथाहि—स्वयंबुद्धानां बाह्यनि-मित्तं विनापि बोधिर्भवति, प्रत्येकबुद्धानां तु तदपेक्ष एव. उपधिः स्वयंबुद्धानां मात्रकचो-लपट्टवर्जः पात्रादिर्द्वादशविधः. प्रत्येकबुद्धानां जघन्येन रजोहरणमुखपोतिकारूपो द्विविधः, उत्कृष्टतस्तु चोलपट्टमात्रककल्पत्रिकवर्जो नवविध इति. स्वयंबुद्धानां पूर्वाधीतं श्रुतं स्याद्वा न वा, प्रत्येकबुद्धानां पुनस्तन्नियमाद्भवत्येव, जघन्येनैकादशांगानि, उत्कृष्टतो द्वादशपूर्वा-णीति. स्वयंबुद्धानां यदि पूर्वाधीतं श्रुतं नास्ति, तदा नियमाद्गुरुसमीपे लिंगं प्रपद्यंते, ग-च्छे च विहरंति. अथ श्रुतं भवति तदा देवता लिंगं ददाति गुरुर्वा. यदिवा एकाकिविहार-योग्यता इच्छा चास्ति, तत एकाकिनो विहरंति, अन्यथा गच्छे एव आसते इति, प्रत्येकबु-द्धानां तु लिंगं देवता एव दत्ते, लिंगवर्जिता वा भवंति. यदाह—"रुप्पं पत्तेहबुद्दत्ति", त-था बुध्धैराचार्यादिभिर्बोधिताः संतो ये सिद्धास्ते बुद्धबोधितसिद्धाः १५.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा दीक्षां षोमशधा षोमशप्रकारां जल्पंति, तद्यथा—छंदा रोसा परिजुष्सा । सुवि- णा य पमिस्सुया ॥ सारणिया रोगिणिया । अणाढिया देवसन्नत्ति ॥ १ ॥ वत्थाणुबंधिया जणिय–कसिया वहुजणस्स समुइआ ॥ अरकाया संगारा । वेयाकरणी सयंबुद्धा ॥ २ ॥ तत्र छंदात् स्वकीयादभिप्रायाद्गोविंदवाचकस्येव परकीयाद्वा भ्रातृवशजवदत्तस्येव या दीक्षा सा छंदा १. मात्रादितिरस्कारजाताद्रोषाच्छिवनूतेरिव या सा रोषा २. परिद्यूनाद्दारिद्र्यात् काष्ट- हारकस्येव या सा परिद्यूना ३. स्वप्नात्पुष्पचूलाया इव या सा स्वप्ना ४. प्रतिश्रुतात्प्रति- ज्ञाताद्या सा प्रतिश्रुता, शालिभद्रभगिनींप्रति कृतप्रतिज्ञस्येव ५. स्मरणाद्या सा स्मारणि- का, श्रीमल्लिस्मारितजन्मांतराणां प्रतिबुद्ध्यादिनृपानामिव ६. रोगं आलंबनं विद्यते यस्यां सा रोगिणी सनत्कुमारस्येव ७. स्वजनाद्यैरनादृतस्य या सा अनादृता, नंदिषेणस्येव ८. दे- वसंज्ञप्तेर्देवप्रतिबोधनाद्या सा देवसंज्ञप्तिर्मेतार्यस्येव ९. वत्सः पुत्रोऽनुबंधो यस्यां सा वत्सा- नुबंधिका वज्रस्वामिमातुरिव, उपलक्षणत्वात् पित्राद्यनुबंधिकापि मनकादेरिव १०. कन्यया जनितस्य या सा जनितकन्यका केशिकुमारस्येव, उपलक्षणमिदं अन्येषामपि गर्हितजन्मनां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दीक्षायाः ११. बहुजनस्य संमुदिता प्रमोदहेतुर्या सा जंबूस्वामिन इव १२. परेणाख्यातं धर्मं श्रुत्वा या सा आख्याता प्रभवस्येव १३. प्राग्भवकृतेन. संगरेण संकेतेन या गृह्यते सा संगरा, इषुकाराध्ययनोक्तपुरोहितपुत्रयोरिव १४. संदिग्धेऽर्थे जिनादिना व्याकृते या सा वैयाकरणी गौतमस्येव १५. स्वयंबुद्धा प्रतीता तीर्थकृतामिव १६. ॥ २५ ॥ ननु एवं अनेकगुणरत्नरत्नाकराणां परममुनीनां कियंतो गुणाः संख्यायंते? तत उपसंहरन्नाह—

॥ मूलम् ॥—एवं गुणवुड्डीए । एगुत्तरियाइ ताव नेयव्वा ॥ अट्ठारसहस्ससिलांग—संगया जा मुणी हुंति ॥ २६ ॥ व्याख्या—उत्तानार्था, तदेवं व्याख्यातं श्रवणगुणद्वारं, अथाहोरात्रकृतं बिभणिषुराह ॥ २६ ॥

॥ मूलम् ॥—साहू निसाइचरिमे । जामे वेरत्तियं गहियकालं ॥ सज्झायं कुणइ तहा । असंजया जह न जग्गंति ॥ २७ ॥ व्याख्या—साधुर्निशायाश्चरमे यामे चतुर्थांशलक्षणे विगता रात्रिर्विरात्रिस्तस्यां भवं वैरात्रिकं कालं गृहीत्वा मंदस्वरेण तथा स्वाध्यायं सूत्रार्थपरिवर्तनादिरूपं करोति, यथाऽसंयता गृहगोधादयो महिषादयो वा न जाग्रति. एतेन सं-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतान् जागरयतोऽपि न दोष इत्युक्तं. कालग्रहणविधिश्च यथासंप्रदायमवसेयः. ॥ २७ ॥

॥ मूलम् ॥—तो पडिक्कमित्तु कालस्स । तस्स पाभाइयं च गहिऊण ॥ पहरस्स चउ- त्थंसे । छव्विहमावस्सयं कुणइ ॥ २८ ॥ व्याख्या—ततः स्वाध्यायकरणानंतरं "तस्सत्ति" पंचम्यर्थे षष्ठी प्राकृतत्वात्. तस्माद्वैरात्रिकात्कालात्प्रतिक्रम्य प्रभाते नवं प्राभातिकं कालं गृहीत्वा तस्यैव प्रहरस्य चतुर्थांशे सावशेषे सति षड्विधमावश्यकं करोति. तत्करणविधिः— पढमं चिय सामाइअं कड्ढिऊण चरित्तविसुद्धिनिमित्तं पणवीसूसासपरिमाणं काउसग्गं करं- ति, तउ नमुक्कारेण पारित्ता दंसणविसुद्धिनिमित्तं चउवीसत्थयं पढंति. पणवीसूसासपरि- माणमेव काउसग्गं करंति. तउ नमुक्कारेण पारित्ता सुअनाणविसुद्धिनिमित्तं सुअनाणत्थुइं करंति काउसग्गं च तस्सुद्धिनिमित्तं करंति. तत्थ य पाउसियथुइमाइयं अहिगयकाउस- ग्गपज्जंतमइयारं चिंतंति. तउ नमुक्कारेण पारित्ता सिद्धाण थुइं काऊण उक्कुडुअ निविठ्ठा मुहणत्तयं पडिलेहित्ता स सीसोवरियं कायं पमज्जंति. तउ वंदित्ता आलोयंति. तउ सामा- इयपुव्वयं पडिक्कमंति, तउ वंदणपुव्वयं खामंति. तउ कयकिइकम्मा सामाइयपुव्वयं काउस्स-

For Private and Personal Use Only

ग्गं करंति, तत्थ य चिंतंति कस्स निउंगे निउत्ता वयं, गुरुहिं तो तारिसं तवं पवज्जामो जारिसेण तस्स हाणी न जवइ. तओ चिंतंति छम्मासखमणं करेमो. एगदिवसेण ऊणं तहावि न सक्केमो तउ बत्तीसइमं तीसइमं जाव चउत्थं आयंबिलं एगठाणं एगासणं पुरिमड्ढं निविगइं पोरिसिं नमुक्कारसहियं च त्ति. एवं जं समत्था तत्रं काउं तमसढभावाहिं य ए करंति. पछा वंदित्ता गुरुसक्खियं पयज्जंति. सव्वे नमुक्कारइत्तगा समगं उट्ठंति वोसरावंति निसीयंति य. एवं पोरिसिमाइसु विज्ञासा. तउ तिन्नि थुईओ अप्पसद्दगं दिंति, जहा घरकोइलाइसत्ता न उट्ठंति. तउ बहुवेलं संदिसावंति, जइ चेईयाइं अत्थितो वंदंति, एवं च पडिक्कमणकालं तुलंति, जहा पडिक्कंताणं थूइ अवसाणे चेव पडिलेहणा जवइत्ति. ॥ २७ ॥

॥ मूलम् ॥—तो सव्वदोसमुक्कं । अचलमणणोवगउंगमुक्ककुरुउं ॥ अंगोवहिपडिलेहं । करेइ तो सोहए वसहिं ॥ २७ ॥ व्याख्या—तत आवश्यकानंतरं उत्कुटकः पुतास्पृष्टजूतलः सन् अंगोपधेः शरीरपरिजोग्यानां मुखपोतिकाद्युपकरणानां प्रतिलेखनां करोति. ननु कः प्रतिलेखनायाः प्रारंभकालः? उच्यते—स्तुतित्रणनानंतरं—मुहणंतय रयहरणे । दु निसि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्जा चोलपट्टकप्पतिए ॥ संथारुत्तरपट्टे । इक्कारसमे तहा दंडे ॥ १ ॥ इत्येतावत्सूपकरणेषु यथा सूर्य उदेति, तथा प्रतिलेखना प्रारब्धव्या. एतेन ये पाणिरेखानिरीक्षणे प्रतिलेखनाक्षण इति मन्यंते ते निरस्ताः, सप्रकाशाप्रकाशोपाश्रयभेदेन पाणिरेखानिरीक्षणस्यानैकांतिकत्वात्. उक्तं च--अरुणावासगपुव्वं परुप्परं पाणिपडिलेहा एए उ अणाएसत्ति. पंचकल्पेऽप्युक्तं—सूरोदये जिणाणं । पडिलेहणियाइ आढवणकालो ॥ थेराणणुग्गयंमि । उवहिणा सो तुलेयव्वो ॥ १ ॥ कथं प्रतिलेखनां करोतीत्याह—सव्वदोसमुक्कमित्यादि त्रीण्यपि क्रियाविशेषणानि, सर्वैः प्रतिलेखनादोषैर्मुक्तं यथा भवत्येवं ते च षट्, यदाह—आरभडा सम्मद्दा । वज्जेयव्वा य मोसली तइया ॥ पप्फोडणा चउत्थी । विक्खित्ता वेइया छट्ठा ॥१॥ तत्र विपरीतकरणात्त्वरितं वान्यवस्त्रग्रहणादारभटा प्रतिलेखना १. वस्त्रांतः कोणसंवलनेनोपधेरुपरि निविश्य प्रतिलेखनाकरणेन वा संमर्दा २. तिर्यगूर्ध्वं अधो वा वस्त्रेण कुड्यादिसंघट्टनादामोसलित्ति प्राकृतत्वादामर्शवती ३. रेणुगुंडितस्य वस्त्रस्य गृहस्थवत्प्रकर्षेण धूननात्प्रस्फोटिका ४. प्रत्युपेक्षितस्य वस्त्रस्याप्रत्युपेक्षिते क्षेपणाद्वस्त्रांचलानां वा ऊर्ध्वं विक्षेपणाद्विक्षि-

For Private and Personal Use Only

ता ५. षष्ठी वेदिका, अत्र संप्रदायः—"वेइया पंचविहा पन्नत्ता, तं जहा–उड्ढवेइया १, अहोवेइया २, तिरियवेइया ३, दुहर्ड वेइया ४ एगर्ड वेइया च ५. तत्थ उड्ढवेइया उवरि जाणुगाणं हत्थे काऊण पडिलेहेइ. अहोवेइया अहोजाणुगाणं हत्थे काऊण पडिलेहेइ. तिरियवेइया संडासयाणं मज्झेणं हत्थे नेऊण पडिलेहेइ. दुहर्ड वेइया बाहाणं अंतरा दोवि जाणुगा काऊण पडिलेहेइ. एगर्ड वेइया एगं जाणुगं बाहाणं अंतरे काऊण पडिलेहेइत्ति. इमे दोषाः प्रतिलेखनायां त्याज्याः. अन्येऽपि–पसिढिलपलंबलोला । एगामोसा अणेगरूवधूणा ॥ कुणइ पमाणे पमायं । संकिए गणणोवयं कुज्जा ॥ १ ॥ अदृढं वस्त्रं गृह्णतः प्रशिथिला, विषमग्रहणेन वस्त्रांचलानां प्रलंबनात्प्रलंबा, भूमौ पाणौ वा प्रत्युपेक्ष्यमाणवस्त्रस्य लालनाल्लोला, मध्ये गृहीत्वा हस्ताभ्यां वस्त्रं घर्षयंस्त्रिभागशेषं करोतीत्येकामर्शा. संख्यातिक्रमेण आस्फोटादिकरणाद्युगपदनेकवस्त्रप्रत्युपेक्षणाद्वानेकरूपधूनना, प्रमाणे प्रस्फोटादिसंख्यायां प्रमादं करोति, शंकिते संदेहे सति गणनांगुलिरेखास्पर्शनादिना द्वित्रिसंख्यात्मिका तामुपगच्छति गणनोपगमं यथा नवत्येवं प्रस्फोटादिकं कुर्वतो दोषः. कथं तर्हि प्रति-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लेखनां कुर्यादित्याह–'अचलंति' अचलं दृढं यथा भवत्येवं. अचलग्रहणेन शेषा अपि तद्गुणाः सूचिताः, तद्यथा—उड्ढं थिरं अतुरियं । सव्वं तावत्थमेव पडिलेहे ॥ तो बीयं पप्फोडे । तइयं च पुणो पमज्जिज्जा ॥ १ ॥ अणच्चावियं अवलियं । अणाणुबंधि अमोसलिं चेव ॥ छप्पुरिमानवखोडा । पाणीपाणपमज्जणं चेव ॥ २ ॥ अनयोर्व्याख्या—तत्र ऊर्ध्वं कायतो वस्त्रतश्च. कायत उत्कुटिको वस्त्रतस्तिर्यक् प्रसारितवस्त्रः, न तु कायत उत्थाय वस्त्रं वा ऊर्ध्वीकृत्य प्रत्युपेक्ष्यते, तथा संप्रदायत्वात्. स्थिरं दृढहस्ततया गृहीतं, अत्वरितं अद्रुतं यथा भवत्येवं सर्वं वस्त्रं तावत्प्रत्युपेक्षेत निरीक्षेत, न तु प्रस्फोटयेत्. तत्र च यदि जंतून् पश्यति ततो यतनयान्यत्र संक्रमयति, तददर्शनेन ततो द्वितीयमिदं कुर्यात्. यदुत प्रस्फोटयेत्. तृतीयं च पुनरिदं कुर्याद्यदुत प्रमृज्यात्. कथं पुनः प्रस्फोटयेत् प्रमृज्याद्वेत्याह–अनर्तितं यथा वपुषो वस्त्रस्य वा नर्त्तनं न भवति. अवलितं यथात्मनो वस्त्रस्य वा वलनं मोटनं न भवति. अननुबंधि न निर्व्यवच्छेदं, किंतु लक्ष्यमाणप्रस्फोटनादिविभागं. 'आमोसलित्ति' तिर्यगूर्ध्वमधश्च कुड्यादौ परामर्शरहितं यथा भवत्येवं, किमित्याह–'पुरिमत्ति'

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षट् पूर्वाः, पूर्वं क्रियमाणतया तिर्यक्कृतवस्त्रप्रस्फोटात्मकाः क्रियाविशेषा येषां ते षट्पूर्वाः, ततो नवाखोटकाः प्रस्फोटनरूपाः कर्त्तव्याः. पाणी प्राणिनां कुंथ्वादीनां प्रमार्जनं प्रस्फोटनत्रिकत्रिकोत्तरकालं त्रिसंख्यं प्राणिप्राणप्रमार्जनं कर्तव्यमिति गाथार्थः. तथा "अणण्णोवउत्तगत्ति" अनन्योपयोगं प्रतिलेखनाव्यतिरिक्तोपयोगरहितं यथा नवत्येवं. यदाह—पडिलेहणं कुणंतो। मिहो कहं कुणइ जणवयकहं वा ॥ देइच्च पच्चक्खाणं। वाएइ सयं पडिच्छइ वा ॥ १ ॥ पुढवीआउक्काए। तेऊवाऊवणस्सइतसाणं ॥ पडिलेहणापमत्तो। छण्हंपि विराहगो होइ ॥ २ ॥ एवं प्रातस्त्यां प्रतिलेखनां कृत्वा प्रतिलेखनासमाप्तिसमकालं चोद्गते सूर्ये वसतिं शोधयति प्रमार्जयति. "तउ वसहिं पमज्जियकालं निवेयंति. अण्णे नणंति थुइसमणंतरमेव कालं निवेयंती" त्यनुक्तमपि द्रष्टव्यं. ॥ २९ ॥

॥ मूलम् ॥—अह वंदिऊण सूरी। पुच्छइ कायव्वमज्ज किं नंते ॥ गुरु आएसेण कुणइ। वेयावच्चं च सज्झायं ॥ ३० ॥ व्याख्या—अथ वंदित्वा सूरिमाचार्यं, उपलक्षणत्वादन्यमपि पुरस्कृतमुपाध्यायादिकं पृच्छति, यत्पृच्छति तदाह—हे नदंत! अद्य मया किं कर्त्तव्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिति. ततस्तस्य योग्यतां विज्ञाय वक्ति, जो वैयावृत्यं कुरु? स्वाध्यायं वा अधीष्वेति. ततः स साधुर्गुर्वादेशेन करोति वैयावृत्यं स्वाध्यायं वा, न पुनः स्वबुद्ध्या किंचित्कुर्यात्, यदाह—छट्ठट्ठमदसमदुवा—लसेहिं मासद्धमासखमणेहिं ॥ अकरंता गुरुवयणं । अणंतसंसारिया जणिया ॥ १ ॥ ३० ॥ ततश्च—

॥ मूलम् ॥——किंचूणपोरसीए । अपडिक्कंतो य चरमकालस्स ॥ सुत्तविहिणा आसीणो । पडिलेहइ पत्तनिज्जोगं ॥ ३१ ॥ व्याख्या——इह चतुर्द्धाविनक्तस्य नजसो यदा प्रथमं जागं किंचिन्न्यूनं सूर्यः प्राप्तो जवति तदा किंचिदूना पौरुषी. अस्याश्च परिज्ञानाय—आसाढे मासे दोपया । पोसे मासे चउप्पया ॥ चित्तासोएसु मासेसु । तिपया हवइ पोरिसी ॥ १ ॥ अंगुलं सत्तरत्तेण । पक्खेण य दुअंगुलं ॥ वड्डए हायए वावि । मासे मासे चउ अंगुलं ॥ २ ॥ जिट्ठामूले आसाढ–सावणे छहिं अंगुलेहिं पडिलेहा ॥ अट्ठहिं बीयतीयंमि । तइए दस अट्ठहिं चउत्थे ॥ ३ ॥ इत्येतद्गाथात्रयं स्पष्टं, सुप्रसिद्धत्वाच्च न व्याख्यातं, नवरं सत्तरत्तेणंति सप्ताहोरात्रेण, एतच्च तिथिपातपक्षापेक्षयोक्तं, अन्यथा सप्तरात्रेण सार्द्धेनेति

For Private and Personal Use Only

द्रष्टव्यं. तस्यां च किंचिदूनपौरुष्यां चरमकालस्य प्राभातिकस्य, तदभावे वैरात्रिकस्याप्यप्रतिक्रांतेश्चतुर्थपौरुष्यां तद्बलेन स्वाध्यायमानत्वात्. यच्चूर्णिः–वेयत्तियपाभाइया दिवसट्ठा घित्वा चेव, आसीन उपविष्टः. पुव्वह्ने अपरह्ने मुहपत्तियमाइ पडिलेहा, इति वचनान्मुखपोतिकां प्रत्युपेक्ष्य ततः पात्रनियोगं वा पात्रप्रतिबद्धोपकरणजातं प्रत्युपेक्षते, कथं? श्रुतविधिना आगमोक्तरीत्या, श्रुतविधिश्चायं–पायस्स पायबंधो सोया उवउत्तो तद्देसो मुहुणंतएण गुछं गुलइयं गुलीउ पमलाणि उक्कुरुयभाणवत्थे पलिमंथाइसु तन्न भवे ॥ ३१ ॥ अथ द्वितीयपौरुषीकर्तव्यमाह—

॥ मूलम् ॥—बीयाइए पोरसीए । अणुपेहइ पुव्वगहियसुअमत्थं ॥ भिक्खाकालंमि मुणी । गुरुपुरउ करइ उवउगं ॥ ३२ ॥ व्याख्या—द्वितीयायामर्थपौरुष्यां प्राप्तायां पूर्वगृहीतस्य श्रुतस्यार्थमनुप्रेक्षते स्मरति, ततो भिक्षाकाले प्राप्ते, भिक्षाकालश्चोत्सर्गतस्तृतीयपौरुषीरूपः स्थविरकल्पिकानां, यत्र लोको यदा भुंक्ते तत्र तदानीं वा एतेन अकालचर्या निषिद्धा, यदार्ष–अकाले चरसि भिक्खू । कालं नो पडिलेहसि ॥ अप्पाणं च किलामेसि । स-

न्निवेसं च गरिहसि ॥ १ ॥ तदानीं जिक्षार्थी मुनिर्गुरूणां पुरत उपयोगं करोति, अत्रौघवृत्तिः—पढममापुच्छइ यडुत संदिस्सह उवउगं करेमि, उवउगकरावणिअं करेमि काउस्सग्गं, अठहिं उसासेहिं नमोकारं चिंतेइ, तउ नमोकारेण पारित्ता जणइ, संदिसह आयरिउ जणइ लाभो, साहु जणइ तहत्ति. तउ आयरिउ जणइ, जह गहियं पुव्वसाहूहिंत्ति, तउ आवस्सियाए जस्स जोगुत्ति जं जं संजमस्स उवगारे वट्टइ, तं तं गिह्निस्सामित्ति ॥ ३२ ॥ ततः किमित्याह—

॥ मूलम् ॥—आवस्सियाइ चलिउ । अचखित्तो अणाउलो असढो ॥ जुगमित्तदत्तदिठी । आयपरविराहणविमुक्को ॥ ३३ ॥ अचियत्तं पडिकुठं । मामगं वा कुलं विवज्जंतो ॥ हिंडइ घराघरं सो । उक्कोसं जाव दोकोसं ॥ ३४ ॥ व्याख्या—निःक्रमणकालेऽवश्यकर्तव्यत्वादावश्यकीतया चलितः स्वोपाश्रयादिति गम्यते, अव्याक्षिप्तो गीतादिव्यासंगरहितः, अनाकुलः सर्वजिक्षाकेभ्यः पूर्वमहं गच्छामि, येन प्रभूतां जिक्षां प्राप्नोमीत्यौत्सुक्यरहितः, अशठः सरलचित्तः, शठो हि सारं वस्त्वशुद्धमपि शुद्धीकृत्य गृह्णीयात्, असारं च शु-

ङ्गमप्यशुद्धीकृत्य परिहरेदिति. तथा युगं चतुर्हस्तप्रमाणं तन्मात्रे पुरः क्षेत्रे दत्ता न्यस्ता दृष्टिः स युगमात्रदत्तदृष्टिः. अतिदूरचक्षुषातिसूक्ष्मसत्वानिरीक्षणात्, अत्यासन्नलोकने तु सहसा जीवं दृष्ट्वा पादसंहरणायोगात्. उपलक्षणत्वात् श्वानादीनां रक्षणार्थं पृष्ठतः पार्श्वतोऽपि दत्तोपयोगः. तथा "आयपरेत्यादि", पंकस्थाणुगर्त्तश्वानसंग्रामधेनुहयहस्त्यादिदूरीजवनादात्मविराधनया बीजहरिदादिवर्जनात्परविराधनया च विमुक्तः. "अचियत्तंति" अप्रीतिकं यत्र साधुप्रवेशे गृहिणां न प्रीतिः, प्रतिकुष्टं निषिद्धं. अत्र चूर्णिः—पडिकुट्ठं दुविहं इत्तरियं आवकहियं च, इत्तरियं मयगसूयगाइ, आवकहियं अनुज्जा डोंबमायंगादि. "मामगंति" यत्र गृहाध्यक्षो वक्ति मा मम गृहं कश्चिदागच्छत्विति. तदेवं कुलं विवर्जयन् स साधुर्गृहाद्गृहं गृहपरिपाट्येत्यर्थः, हिंडते. कियंतीं भूमिं यावदित्याह--उत्कर्षतो यावद् द्वौ क्रोशौ, परतो हि समानीतमशनादि मार्गातिक्रांतदोषदुष्टं स्याद्, यदाह विवाहप्रज्ञप्तिः—अह भंते खित्ताइक्कंतस्स कालाइक्कंतस्स मग्गाइक्कंतस्स, पमाणाइक्कंतस्स पाणभोयणस्स के अट्ठे पण्णत्ते? गोयमा! जेणं निग्गंथे वा निग्गंथी वा फासुअं एसणिज्जं असण-

पाणखाइमसाइमं अणुग्गए सूरिए पडिग्गहित्ता, उग्गए सूरे आहारमाहरेइ, एसणं गोयमा! खित्ताइक्कंते पाणभोयणे ॥ १ ॥ जेणं निग्गंथो वा निग्गंथी वा जावसाइमं पढमाए पोरिसीए पडिग्गहित्ता पच्छिमं पोरिसिं उवायणावित्ता आहारमाहरेइ, एसणं गोयमा! कालाइक्कंते पाणभोयणे ॥ २ ॥ जेणं निग्गंथो वा निग्गंथी वा जाव साइमं पडिग्गहित्ता परं अद्धजोयणमेराए वीइक्कमावित्ता आहारमाहरेइ, एसणं गोयमा! मग्गाइक्कंते पाणभोयणे ॥ ३ ॥ जेणं निग्गंथो वा निग्गंथी वा जाव साइमं पडिग्गहित्ता परं बत्तीसाए कवलाणं कुक्कुडिअंडगपमाणाणं आहारमाहरेइ, एसणं गोयमा। पमाणाइक्कंते पाणभोअणे ॥ ४ ॥ ३४ ॥

अथैवं हिंडमानो यद्विधत्ते तदाह—

॥ मूलम् ॥—वज्जिय बत्तीस गवे-सणाइगहणेसणाइ दस दोसे ॥ गुरु अतिहिगिलाणाणं । पविजत्तं गिएहए जत्तं ॥ ३५ ॥ व्याख्या—इष्यते साधुभिरित्येषणा जक्तादिशुद्धिः, सा च गवेषणैषणा ग्रहणैषणा ग्रासैषणेति त्रिधा. तत्र जिघृक्षितस्य जक्तादेर्निरीक्षणं गवेषणा, तद्विषयैषणा गवेषणैषणा. ग्रहणं तस्यैवादानं तदर्था एषणा ग्रहणैषणा, ग्रासो

ग्रहीतस्य भक्तादेः परिभोगस्तद्विषया एषणा ग्रासैषणा. इयं च पुरस्ताद्वक्ष्यते, भोजनक्षण एव तस्याधिकृतत्वात्. गवेषणैषणायां च द्वात्रिंशद्दोषा वर्ज्याः. यथा—साधूनामाधया संकल्पेन सचित्तस्याचित्तीकरणमाधाकर्म ॥ १ ॥ यद्गृहिणा स्वार्थं राद्धं, पश्चाद्व्रत्युद्देशेन पृथक्कृतं तदौद्देशिकं त्रिधा, तत्र यद्यथोध्धृतं तत्तथाभूतं यावदर्थिकादीनां चतुर्णामुद्दिश्यमानमुद्दिष्टौद्देशिकं ॥ १ ॥. यत्पुनरुध्धृतं कूरादिदध्यादिना संस्क्रियते तत्कृतौद्देशिकं ॥ २ ॥. यत्त्वग्न्यादिना जीवारंभेण संस्क्रियते तत्कर्मौद्देशिकं ॥ ३ ॥ एतत् त्रिविधमपि चतुर्धा, यावदर्थिकार्थमुद्देशं, पाखंड्यर्थं समुद्देशं, निर्ग्रंथार्थं च समादेशमिति द्वादशधौद्देशं. यदविशुद्धकोटिसंगाच्छुद्धमप्यशनादि दूष्यते, तत्पूतिकर्म द्विधा, तत्राधाकर्मिकधूमबाष्पादिसंपृक्तं सूक्ष्मं तदत्याज्यं, बादरं तु आधाकर्मिकचुल्लीभाजनादिस्पृष्टं त्याज्यं. आधाकर्मिकगृहमपि तद्दिनाद्रूध्र्वं दिनत्रयं त्याज्यं पूतिदुष्टमिति ॥ ३ ॥ यद्गृहिणा स्वस्य यावदर्थिकानां पाखंडिनां यतीनां वा कृते मिलितमेव पक्तुमारभ्यते, तन्मिश्रं त्रिधा ॥ ४ ॥ पंक्तिगतगृहत्रयमध्यादेकगृहे साधौ भिक्षां गृह्णति द्वितीये साधौ दत्तोपयोगे तृतीयगृहाद्दात्री स्वहस्तादि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थापितं भक्तमानयति, साऽचिरस्थापनाकल्पा. यत्साध्वर्थं गृही स्थापयित्वा मुंचति सा चिरस्थापना. ॥ ५ ॥ यत्पुत्रादौ भोजनं याचमाने साध्वर्थमुत्थिता तत्रापि दास्यामीति ब्रूते सा सूक्ष्मा, यच्च यतीनागंतून् यियासून् ज्ञात्वार्वाक् परतो वा गृही विवाहादिकं करोति, सा बादरा चेति प्राभृतिका द्विधा ॥ ६ ॥. यदंधकारस्थस्य वस्तुनो यत्यर्थं दीपादिना प्रकटनं बहिरानयनं वा तत्प्रादुःकरणं द्विधा ॥ ७ ॥. यत्स्वपरसत्काभ्यां द्रव्यभावाभ्यां विसाधितं तत्क्रीतं चतुर्धा. ॥ ८ ॥ यदुद्धन्नं याचित्वा गृही दत्ते तत्प्रामित्यं ॥ ९ ॥. यदसारेण वस्तुना सारं परावर्त्य गृही दत्ते तत्परावर्त्तितं ॥ १० ॥. यत्स्वग्रामात्परग्रामाद्वा संमुखमानीतं तदभ्याहृतं, हस्तशतांतरानीतं च कल्पते ॥ ११ ॥. यन्मुद्रितकुतुपादिमुखं यतिहेतोरुन्मुद्र्यापरिभोग्यं कपाटं चोद्घाट्य प्रदत्ते तदुद्भिन्नं ॥ १२ ॥. यन्मालादिभ्य उत्तार्य कुंभादिभ्यो वाकृष्य करदुर्ग्राह्यं दत्ते तन्मालापहृतं जघन्यादिभेदात्त्रिधा, पार्ष्ण्युत्पाटनमात्रेण शिक्यकादेर्यद्दात्री ददाति तज्जघन्यं, मंचकाद्यारोहेण मध्यमं, निःश्रेण्यारोहणेनोत्कृष्टं ॥ १३ ॥. स्वामी राजादिः, प्रभुर्गृहाध्यक्षः, एतौ स्वायत्तमनुष्येभ्यः, स्तेनाश्च पांथादिभ्यो बलादुद्दाल्य

For Private and Personal Use Only

यत्साधुभ्यो ददति तदाछेद्यं त्रिधा ॥ १४ ॥. यद्बहुसाधारणं अन्यैरदत्तं एको दत्ते, यच्च कौ-टुंबिकप्रहितहालिकभोजनमध्यात्तयोरननुज्ञया कश्चित्साधवे दत्ते, जड्डो हस्ती, तत्सत्कं पिंडं राज्ञा गजेन वाननुज्ञातं यदाधोरणः साधवे दत्ते, तत्साधारणचोल्लकजड्डभेदादनिसृष्टं त्रिधा ॥ १५ ॥. यद्गृहिणा मूलारंभे स्वार्थं कृते, पश्चाद्यावदर्थिकानां पाखंडिनां यतिनां वा कृतेऽधिकं गृही क्षिपति सोऽध्यवपूरकस्त्रिधा. ॥ १६ ॥ इति षोडशोद्गमदोषाः ॥ इह आ-धाकर्म कर्मौद्देशिकश्च पाखंडिश्रमणनिर्ग्रंथरूपं भेदत्रयं. आहारपूतिः, मिश्राध्यवपूरकयोश्चां-त्यं भेदद्वयं, बादराप्राभृतिका चेत्यविशुद्धिकोटि तल्लवेनापि स्पृष्टं सर्वं त्यजंति, अनिर्वाहे तु विविच्य तदेव त्यजंति, घृतादिकं तु तावन्मात्रमेव त्यजंति, न शेषमिति. अथोत्पादनादो-षाः षोडश यथा बालस्य क्षीरपानमज्जनमंडनक्रीडनांकधात्रीत्वेन लब्धः पिंडो धात्रीपिंडः १. संदेशनयनानयनरूपेण दौत्येन लब्धो दूतपिंडः २. लाभालाभादिनिमित्तकथनेन लब्धः पिंडो निमित्तपिंडः ३. जातिकुलगणकर्मशिल्पैरात्मनो गृहस्थस्य तुल्यताख्यापनेन लब्ध आजीवनापिंडः ४. यो दाता यद्भक्तस्तत्पुरः स्वमपि तद्भक्तं दर्शयन् यल्लभते स वनीपकपिं-

उप चिं ताभा.४ १०४८

ण्मः ५. दातुरौषध्यादिकथनेन वैद्यादिसूचनेन वा लब्धश्चिकित्सापिंमः ६. बलविद्यातपः संपन्नस्य क्रोधजयाद्गृही दत्ते, सकोपपिंमः ७. प्रशंसितोऽपमानितो वा दातुरभिमानेन यदादत्ते स मानपिंमः ८. पुनः पुनर्ग्रहणार्थं नानारूपकारिणो मायापिंमः ए. गृध्ध्या बहुतरमटतो लोन्नपिंमः १०. मातृपितृश्वश्रूश्वशुरादिसंबंधं कुर्वतः पूर्वं पश्चाद्वा दातारं स्तुवतो वा संस्तवदोषः ११. विद्यामंत्रौ प्राग्व्याख्यातार्थौ, चूर्णमदृश्यांजनादि, योगः पादप्रलेपादिः, तत्प्रयोगेण लब्धा विद्यामंत्रचूर्णयोगपिंडाः १५. गर्भाधानपरिशाटकरणादिनाऽवाप्तो मूलकर्मपिंमः १६. एते च मिलिता द्वात्रिंशज्ञवेषणैषणादोषाः. ग्रहणैषणायां च दोषा दश, तद्यथा—

शुद्धमपि पिंडमाधाकर्मादिशंकया गृह्णतः शंकितदोषः १. सचित्तेन पृथ्व्यप्वनस्पतिरूपेण, अचित्तेनापि लोकागमगर्हितेन मधुमद्यमूत्रोच्चारादिना खरंटितेन करेण जाजनेन वा गृह्णतो म्रक्षितदोषः २. सचित्तेषु पृथ्व्यादिष्वनंतरं परंपरं वा यन्निक्षिप्तं, तद्गृह्णतो निक्षिप्तदोषः ३. सचित्तेन फलादिना ढन्नं वस्तु गृह्णतः पिहितदोषः ४. हस्ते जाजने वा स्थितं सचित्तेऽचित्ते वा निधाय तेन हस्तेन जाजनेन वा यदि दात्री ददाति तदा संहृतदोषः ५.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थविरादिभिर्दीयमानं गृह्णतो दायकदोषः ६. यदाह—थेरपहुपंडुविवर–जरिअंधत्तव्वमत्तउ-म्मत्ते ॥ करचरणछिन्नपयलिअ–नियलंदुयपाउयारूढे ॥ १ ॥ खंडइ पीसइ भुंजइ । कत्तइ लोढेइ विखिणइ पिंजइ ॥ दलइ विरोलइ जेमइ । जा गुव्विणि बालवच्छा या ॥ २ ॥ तहत्थ-काए गिह्णइ । घट्टइ आरभइ खिवइ दहु जइ ॥ साहारणचोरियगं । देइ पराकं परठं वा ॥ ३ ॥ ठवइ वलिं उवत्तइ । पिढराय तहासपच्चवायाजा ॥ दिंतेसु एवमाइसु । ओहेण मुणी न गिह्णंति ॥ ४ ॥ योग्यमयोग्यं च द्वे अपि संमिश्र्य यदा ददाति तदा उन्मिश्रदोषः ७. अप-रिणतं द्विधा, द्रव्यभावभेदात्. तत्र सचित्तं वस्तु द्रव्यापरिणतं, भावापरिणतं द्विधा, दायकग्रा-हकभेदात्. तत्र द्वयोः साधारणेऽन्नादावेकेन दीयमाने द्वितीयस्य भावो न दानपरिणामवानिति दायकभावापरिणतं, ग्राहकभावापरिणतं तु यत्र द्वयोः साध्वोर्मध्ये एकस्य मनसि तदन्ना-दिकं शुद्धं परिणतं, अन्यस्य च तदेवाशुद्धमिति ८. दध्यादिलेपकृल्लिप्तं, तत्र च संसृष्टाभ्यां पात्रकराभ्यां सावशेषद्रव्येण चाष्टौ भंगाः, अत्र समभंगेषु गृह्णतो लिप्तदोषः, तेषु निरवशे-षद्रव्यतया पश्चात्कर्मदोषस्य परिहर्तुमशक्यत्वात्. ९. यत्र दीयमाने परिशाटिर्भवति स छ-

For Private and Personal Use Only

दितदोषः १०. एवं एते सर्वेऽपि मिलिता द्विचत्वारिंशद्दोषाः. अथ गाथार्थः—एवमुक्तान् गवेषणाया द्वात्रिंशतं, ग्रहणैषणायाश्च दश दोषान् वर्जयित्वा साधुर्गुर्वतिथिग्लानेभ्यः प्रविभक्तं विभागेनेत्यर्थः, भक्तं उपलक्षणत्वात्पानकमपि गृह्णाति. यदागमः—जइ तरुणो निरुवहिउ । भुंजइतो मंडलीइ आयरिउ ॥ असुहुस्सवीसुगहणं । एमेव य होइ पाहुणए ॥१॥ आचार्यस्य पृथक् भक्तादिग्रहणेऽमी गुणाः—सुत्तत्थथिरीकरणं । विणउ गुरुपूआ सेहबहुमाणो ॥ दाणवइसद्धिबुद्धि । बुद्धीबलवड्ढणं चेव ॥ १ ॥ "गिलाणंमित्ति" चतुर्थ्यर्थे षष्ठी प्राकृतत्वात्, न त्वतिथिगौरव्याद् ग्लानश्चाशक्तत्वान्न भिक्षार्थं पर्यटतीति, आह—

॥ मूलम् ॥—अइसयसुअवायकहा–इएहिं गुरुउ जिणुव्व आयरिउ ॥ तो सो सयं न हिंडइ । भिक्खाए परियरे संते ॥ ३६ ॥ व्याख्या—अतिशयो देवादिकृतो महिमा, श्रुतं स्वपरसमयात्मकं, वादः परवादिवदनमुद्रादायी तर्कविशेषः, कथा धर्मोपदेशः, आदिशब्दायोगानुयोगदानादयः, एभिर्गुणैर्जिनस्तीर्थंकर इव आचार्यो गुरुर्गौरव्यः, ततः स आचार्यः स्वयं भिक्षायै न हिंडते. अयं भावः—आचार्ये भिक्षार्थं भ्राम्यति अहो! दुष्टशिष्यका अ·

स्मै भगवते भक्तमात्रमपि नानयंतीति प्रकुपिता देवता गच्छमपि विनाशयेत्, श्रुतं च तस्य भूरिभ्रमणश्रांतस्यापरावर्तनया परिगलेत्. परवादी वादार्थमागतस्तं भिक्षाकमालोक्यावहीलयेत्. चातुर्वर्ण्यपूर्णे सदसि धर्मदेशनां वितत्य भिक्षार्थं भ्रमन्नयं महिम्ना भ्रश्येत्, अतः स्वयमाचार्यो न पर्यटति. उक्तं च–उप्पन्ननाणा जह नो अडंति । चउत्तीसबुद्धाइसया जिणंदा ॥ एवं गणी अट्ठगुणोववेओ । सत्थाव नो हिंडइ भिक्खकज्जे ॥ १ ॥ अत्रापवादमाह–'परियरेऽसंतत्ति' असति साधुपरिवाररहितस्य तस्यापि विहरणानुज्ञानात्. सत्यपि परिवारे एषणाविशेषशुद्ध्यर्थं जिनकल्पादितुलनार्थं वा स्वयमपि पर्यटतीत्यपि द्रष्टव्यं. ॥ ३६ ॥ अथ चारित्रस्याहारशुद्धिमूलत्वादेषणाविषयं विशेषोपदेशमाह—

॥ मूलम् ॥—बुहपीडियावि रोगा–उरावि अद्धाण परिकिलंतावि ॥ जिंदंति जाविय-मणा । समणा न हु एसणं पायं ॥ ३७ ॥ व्याख्या—स्पष्टा, नवरं प्रायोग्रहणादागाढकार्ये पंचकपरिहान्याऽनेषणीयमपि गृह्णतोऽदुष्टा एवेति. ॥ ३७ ॥ अथ गृहीतस्य भक्तस्य विधिमाह–

॥ मूलम् ॥—तो वसहीए पविट्ठो । निसीहियाए पडिक्कमे इरियं ॥ विहिणालोइयनि-

म्मिय–सज्झाउं वीसमेइखणं ॥ ३० ॥ व्याख्या—ततो नक्तग्रहणानंतरं वसतौ प्रविष्ट "इ-रियंत्ति" ईर्यापथिकीं प्रतिक्रामति. कथं प्रविष्ट इत्याह–' निसीहियाएत्ति ' बाह्यव्यापारनि-षेधेन निर्वृत्ता नैषेधिकी. तथा इयं च शेषसामाचारीं सूचयति, सा चेयं–गोचरमागतः साधुः प्रथमं वसतेरग्रद्वारे मध्यदेशे मूलद्वारे च त्रिषु स्थानेषु नैषेधिकीं विधत्ते. ततः सागारिका-नावे पादौ प्रमार्ष्टि, गुरुदर्शने च नमो खमासमणाणमित्युक्त्वा इषन्नमन्नंजलिबंधं रचयति. उपर्यधश्च नुवं प्रमृज्य दंमकं स्थाने मुंचति, कल्पादिकं चोपधेरुपरि मुंचति. पटलकानि च पात्रकोपरि स्थापयति, सति संनवे कायिक्यादिव्युत्सर्गं विधाय गुरोः पुर ईर्यां प्रतिक्रामति, कायोत्सर्गे तु आनिर्गमप्रवेशं गोचरातिचारान् चिंतयति. "काउस्सग्गंमि ठिउं चिंतइ स-मुदाणिए अइयारे" इत्योघनिर्युक्तिवचनात्. तथा च चूर्णिः—

"सो य अइयारो साहुणो गमणे पमुच्च होज्जा नत्तपाणा वा घिप्पमाणे जो अइयारो तं अणुचिंतेऊण उस्सारेइ." ततश्चतुर्विंशतिस्तवं नणित्वा–अव्वखित्ताउत्तं । उवसंतमुवट्ठियं च नाऊण ॥ अणुन्नवि तु मेहावी । आलोइज्जा सुसंघए ॥ १ ॥ इति वचनाद्व्याक्षेपादिरहितं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुरुं विज्ञाय उपयुक्ते गुरौ संदिसत्तालोचयामीत्यनुज्ञाप्य तत्पुरोऽनृत्यन्नंगान्यमोटयन्नन्यदजल्पं-
स्तच्चित्तो मूकं नातिगाढस्वरं संयतजाषया श्राद्धेन श्राविकया वा व्यापारं कुर्वंत्या येन जा-
जनेन हस्तेन वा यद्यथादत्तं तत्तथालोचयति. यदि पुनर्दिवसः स्वल्पः, स्वयं चासौ श्रांतः,
गुरुर्वा कुलादिकार्येण व्यापृतः, ग्लानस्य वा वेलातिक्रमः स्यात् तदा "पुरकम्मपछकम्मे अ-
प्प असुद्धे उंहमालोए" इति वचनात् पुरःकर्म पश्चात्कर्म अल्पं न किंचिदस्तीत्यर्थः. अशु-
द्धं वाऽधाकर्मादि अल्पं नास्तीत्योघत एवालोचयति. ततो मुखपोतिकया शिरः सपटलं च
पतद्ग्रहं प्रमार्ज्य मार्जाराद्यापातशंकया ऊर्ध्वमधस्तिर्यक्दृशं ददानो हस्तधृतपतद्ग्रहोऽर्धा-
वनतकायो जक्तपानं च गुरोर्दर्शयति. यच्च न सम्यगालोचितं तदतिचारशुद्ध्यर्थं "पडिक्क-
मामि गोअरचरियाए जिरकायरियाए" इत्यादि दंडकमुक्त्वा कायोत्सर्गं करोति. तत्र च
"अहो जिणेहिं सावज्जा" इति गाथां चिंतयति, नमस्कारं गाथाद्वयं चेत्यन्ये. ततः पारयि-
त्वा चतुर्विंशतिस्तवं जणित्वा यदि पूर्वं न प्रस्थापितस्तदा स्वाध्यायं प्रस्थापयति. ततः क्षणं
जघन्यतो गाथात्रयमात्रं स्वाध्यायं करोति, उत्कृष्टतो महाप्राणध्यानबलाच्चतुर्दशापि पूर्वा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ण्यंतर्मुहुर्तेन परावर्तयति. एवं च धातुक्षोभादयो दोषाः परित्यक्ता भवंति. एतदेवाह—"वि-
हिणालोइयनिम्मियसज्झाउ वीसमेइ खणं" इत्युक्तार्थ. ॥ ३८ ॥ ततः—

॥ मूलम् ॥—कयआउराइकज्जो । संवरणं पारिउं छहिं पएहिं ॥ भुंजेइ अपरिसाडी । आलोए पंचगयदोसं ॥ ३९ ॥ व्याख्या—कृतानि, आतुरग्लानाः, आदिशब्दाद्वालवृद्धादयस्तेषामौषधपथ्यपारिष्ठापनिकादीनि कार्याणि येन स कृतातुरादिकार्यः, यदार्ष—जे गिलाणं पडियरइ से मं पडियरइ, जे मं पडियरइ से गिलाणं पडियरइत्ति. ततः संवरणं प्रत्याख्यानं पुरिमार्धादिकं पारयित्वा षड्भिः पदैराहारकारणैः, तानि चामूनि—क्षुद्वेदनोपशमार्थं १, वैयावृत्यार्थं २, ईर्याशुद्ध्यर्थं ३, सप्तदशधा संयमपालनार्थं ४, प्राणधारणार्थं ५, स्वाध्यायादिधर्मचिंतार्थं वा भुंक्ते. ६. न निष्कारणं भुंक्ते इत्यर्थः. यदाह—छण्हमण्णयरे ठाणे । कारणंमि य आगए ॥ आहारिज्ज मेहावी । संजएसु समाहिए ॥ १ ॥ वेयण वेयावच्चे । इरियट्ठाए य संजमट्ठाए ॥ तह पाणवत्तियाए । छट्ठं पुण धम्मचिंताए ॥ २ ॥ कथं भुंक्ते इत्याह—अपरिशाटिः कवलान्मुखाच्च परिशाटिमकुर्वन्, क भुंक्ते? आलोके सूक्ष्मजीवरक्षार्थं सप्रकाश-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थाने, न पुनर्गृहस्थादीनामालोके, जुगुप्सादिनिबंधनत्वात्. उक्तं च—छक्कायदयावंतोवि । संजउ दुल्लहं कुणइ बोहिं ॥ आहारे नीहारे । दुगंछिए पिंमगहणे य ॥ १ ॥ "पंचगयदोसत्ति" क्रियाविशेषणं, पंचसंख्यागता अनावं प्राप्ता दोषा ग्रासैषणासत्का. यत्र भोजने तत्पंचगतदोषं यथा जवत्येव. ते चामी—वसतेर्बहिर्मध्ये वानुरूपाणि खंमगमकादीनि द्रव्याणि संयोजयतः संयोजनादोषः १. आहारस्य प्रमाणं द्वात्रिंशत्कवलादिरूपं, यावता यस्योदरं षड्भागोनं पूर्यते, तावद्वा तदतिरिक्तं जुंजानस्य प्रमाणदोषः २. इष्टमेतदिति रागेण जुंजानस्यांगारदोषः ३. अनिष्टमेतदिति द्वेषेण जुञ्जानस्य धूमदोषः ४. सत्याहारकारणेऽजुञ्जानस्य कारणाजावे च जुंजानस्य कारणदोषः ५. आहारकारणानि प्रागेवोक्तानि, अकारणानि चामूनि—ज्वराद्यातंकशमनार्थं १, क्रुद्धदेवताद्युपसर्गवारणार्थं २; पुरुषवेदाद्युदये ब्रह्मधारणार्थं ३, वृष्टिमहिकादौ प्राणिदयार्थं ४, चतुर्थादितपश्चरणार्थं ५, अंत्यकाले शरीरत्यागार्थं ६, वा न जुंजीत. यदाह—आयंके उवसग्गे । तितिक्खया बंजचेरगुत्ती य ॥ पाणिदया तवहेउं । सरीरवोछेयणठ्ठाए ॥ १ ॥ एएहिं उहिं ठाणेहिं । अणाहारो उ जो जवे ॥

For Private and Personal Use Only

धम्मं नाइक्कमे भिक्खू । झाणजोगरओ भवेत्ति ॥ २ ॥ भोजनविधिश्चायं—निद्धमहुराणि पुव्वं । पित्ताइपसमणट्ठया भुंजे ॥ बुद्धिबलवद्धणट्ठा । दुक्खं च विगंचिउं निद्धं ॥ १ ॥ असुरसुरं अचवचवं । अदुयमविलंबियं अपरिसाडिं ॥ मणवयणकायगुत्तो । भुंजे अहपखिवणसोही ॥ २ ॥ ३९ ॥ ततः किं कुर्यादित्याह—

॥ मूलम् ॥—बहियावियारमत्तग–धावणपमुहे करित्तु तो कज्जे ॥ पहरम्मि चउत्थे सो । पडिलेहइ पत्तवत्थाइं ॥ ४० ॥ व्याख्या—बहिर्विचारः संज्ञार्थं गमनं, तद्विधिश्चायं–इह सधावो भुक्तोत्थिताः शुद्धोदकमादायावश्यकीपूर्वं निःक्रम्य युगलिताः समश्रेणिस्था इत्यर्थः, अत्वरमाणा विकथारहिताः स्थंडिलासन्नभुवं प्राप्य पूर्वं उपविश्य डगलकानि गृहीत्वा तल्लग्नजीवापनोदार्थं तानि प्रस्फोटयंति. तत उत्थाय गुणवति स्थंडिले संडासकं प्रमार्ज्यानुजानातु यस्यायमवग्रहमित्युक्त्वा वामोरुनिवेशितरजोहरणदंडका दक्षिणकरगृहीतपात्रा दिवा पूर्वोत्तरयोर्दिशोः, रात्रौ तु याम्याया अपि, तथा पवनस्य ग्रामस्य सूर्यस्य च पृष्टमददाना निषीदंति. यः संसक्तग्रहणीकः स कृम्यादिरक्षार्थं छायायां निवसते, अथ छाया ना-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्ति तदा व्युत्सृज्य मुहूर्त्तमात्रं तिष्टेत्, ते कृमयः स्वयमेव परिणमंते. स्थंमिलगुणाश्चामी —
अणावायमसंलोए । परस्सणुवघाइए ॥ समे अज्झुसिरे यावि । अचिरकालकयंमि य ॥ १ ॥
विच्छिन्ने दूरमोगाढे । नासन्ने बिलवज्जिए ॥ तसप्पाणबीयरहिए । उच्चाराईणि वोसिरे ॥
॥२॥ अनयोर्लेशतो व्याख्या—आपातोऽन्यागमः, संलोको दर्शनं, तत्र मनोज्ञसंयतवर्जमि-
तरस्वपरपक्षपातसंलसंलोकरहिते. परस्यानुपघातिके यत्र कस्यापि बाधा न भवतीत्यर्थः. समे
लुठनरहितेऽशुषिरे तृणादिरहितेऽचिरकालकृते यस्मिन्नृतौ अग्न्यादिना यत्स्थंमिलं जातं,
तस्मिन्नेव ऋतौ नान्यत्र, यत्र च ग्राम एकमपि वर्षं उषितस्तत्र द्वादश वर्षाणि यावत्स्थंमि-
लं स्यादित्यागमः. विस्तीर्णे जघन्यतोऽपि हस्तप्रमाणे, दूरमवगाढेऽग्न्यादिना येनाधो जघ-
न्यतोऽपि चत्वार्यंगुलानि प्रासुकीभूते, शेषं स्पष्टं. ततः संज्ञां व्युत्सृज्य स्थंमिलासन्ने त्रिभि-
श्चुलुकैराचमंति. ततो यथा गतास्तथा व्यावृत्य नैषेधिकीपूर्वमुपाश्रये विशंतीति. मात्रकं का-
यिक्यादिभाजनं, तस्य धावनं क्षालनं, प्रमुखशब्दात्स्वाध्यायवैयावृत्यादिसंग्रहः. ततो भो-
जनानंतरं बहिर्विचारमात्रकधावनप्रमुखानि कार्याणि कृत्वा प्रागुक्तकारणवशाज्जाते चतुर्थे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रहरे स मुनिः पात्रोपकरणानि वस्त्राणि शारीरिकानि प्रत्युपेक्षते. अत्रापि पूर्वं मुखव-स्त्रिकां प्रत्युपेक्षेत. यद्युपोषितस्तदा गुर्वादिसत्कमुपधिं प्रत्युपेक्ष्य, ततः स्वे पात्रकोपधी प्रत्युपेक्षते यावदंते चोलपट्टं, भुक्तवांश्च चेत्तदा मुखवस्त्रिकानंतरं चोलपट्टं प्रत्युपेक्षते, ततः स्वं पात्रकं, ततो गुरूणामुपधिं, ततस्ताननुज्ञाप्य स्वमुपधिं रजोहरणं चांते प्रत्युपेक्षते. ॥ ४० ॥

॥ मूलम् ॥—तो काउं सज्झायं । तुरियंसे पडिक्कमित्तु कालस्स ॥ सत्तावीसं पेहेइ । थंडिले तदुवउत्तासो ॥ ४१ ॥ व्याख्या—ततः प्रत्युपेक्षणानंतरं स्वाध्यायं कृत्वा उपलक्षणत्वादन्यदपि वैयावृत्यादिकं कृत्वा तुर्यांशे तस्यैव प्रहरस्य चतुर्थभागे सावशेषे सति कालात्प्राभातिकाद्वैरात्रिकाद्वा प्रतिक्रम्य " दिवसचरिमपोरि-सिए चउब्भागावसेसाए ॥ कालग्गहणभूमिउ । तउ पडिलेहियव्वाउ ॥१॥ इति चूर्णिवचनात्. त्रीणि कालयोग्यानि जघन्यतोऽपि हस्तांतरितानि स्थंडिलानि, तथा द्वादशद्वादशोच्चारप्रश्रवणयोः, तत्र द्वारस्यांतरासन्ने मध्ये दूरे च त्रीणि अध्यासिकानि स्थंडिलानि संज्ञार्त्तः सन् यानि सुखेन यायात्.

For Private and Personal Use Only

तथा त्रीणि अनध्यासिकानि तेभ्योऽर्वाक् स्थंमिलानि, अतीवातुरोऽध्यासिकानि यावज्जंतु-मशक्तो येषु संज्ञामुत्सृजेत्. एवमेतानि द्वारस्यांतः षट्, एवं द्वाराद्बहिरपि षट्, यथा एतानि द्वादशोच्चारस्य, तथा द्वादश प्रश्रवणस्यापि, सर्वाग्रेण सप्तविंशति स्थंमिलानि, तदुपयुक्तोऽनन्यध्यानः सन् सा साधुः प्रत्युपेक्षते, यथा चतुर्विंशति स्थंमिलानि प्रत्युपेक्ष्य ततः कालस्थंमिलानि प्रत्युपेक्षते. यदाह—चउत्नागवसेसाए । चरिमाए पमिक्कमित्तु कालस्स ॥ उच्चारे पासवणे । ठाणे चउवीसइं पेहे ॥ १ ॥ अहियासिया य अंते । आसन्ने चेव मज्क दूरे य ॥ तिन्नेव अणहियासि य । अंतो ठच्च बाहिरउ ॥ २ ॥ एमेव य पासवणे । बारस चउवीसइं तु पेहित्ता ॥ कालस्स य तिन्नि जवे । अह सूरो अत्थमुवयाइ ॥ ३ ॥ ४१ ॥

अथ सांध्यं विधिमाह—

॥ मूलम् ॥—अत्थमिए दिणनाहे । सव्ववियारस्स उ गुरुसमक्खं ॥ गिह्निय पउसकालं । पहरं पकरेइ सज्झायं ॥ ४२ ॥ व्याख्या—स्थंमिलप्रत्युपेक्षणासमकालं अस्तमिते मन्नार्धबिंबे दिननाथे सूर्ये गुरोः समक्षं सत्यापितावश्यकाः, अत्र विधिः—यदि चैत्यगृहे स्थिता-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तदा पूर्वं चैत्यानि वंदंते. यद्व्यवहारचूर्णिः—जइ चेइयघरे ठिया वेयालियं कालं पडिक्कंता
अकए आवस्सएगे से कए आवस्सए चेइए न वंदंति मासलघु. ततो यद्यव्याक्षिप्तो गुरु-
स्तदा सर्वे गुरुणा सह प्रतिक्रमितुमारभंते. यदि पुनर्धर्मकथादिना व्याक्षिप्तो गुरुस्तदा सा-
धवो गुरुनापृच्छ्य यथा ज्येष्टमावश्यकभूमौ संतिष्टंते. तत्थ पडिक्कमंताण इमा ठवणा, तत्थ
य पुव्वामेव ठायंता करेमि भंते सामाइयमिति सुत्तं करंति. ततः कायोत्सर्गेऽपि स्थिताः सू-
त्रार्थौ स्मरंति, तावद्यावद् गुरुरागच्छति. ततो गुरुः सामायिकसूत्रमाकृष्य कायोत्सर्गस्थो दै-
वसिकमतीचारं चिंतयति, तेऽपि कायोत्सर्गस्था एव दैवसिकमतिचारं चिंतयंति. अयं चा-
वश्यकविधिरामूलं चूर्ण्युक्त एव लिख्यते—इह किर साहुणो कयसयलवेयालियं करणिज्जा
सूरत्थमणवेलाए सामाइयाइं सूत्तं कड्ढित्ता दिवसाइयारचिंतणत्थं काउस्सग्गं करंति. तत्थ
य गोसमूहणंतगाइयं अहिगयचिट्ठा काउसग्गपज्जवसाणं दिवसाइयारं चिंतंति, तओ नमु-
क्कारेण पारित्ता चउविसत्थयं पढंति. तओ संडासगे पडिलेहित्ता उक्कुडुअनिविट्ठा मुहणंतयं
पडिलेहित्ता ससिसोवरियं कायं पमज्जंति. तओ परेणं विणएण तिगरणसुद्धं किइकम्मं क-

For Private and Personal Use Only

रंति. एवं वंदित्ता उत्थाय उन्नयकरगहियरउहरणा अद्धावयणकाया पुव्वपरिचिंतिए दोसे जहा रायणियाए संजयन्नासाए जहा गुरूसुणंति, तहा पवड्ढमाणसंवेगा मायामयविप्पमुक्का अप्पणो विसुद्धिनिमित्तमालोयंति. जइ नत्थि अइयारो ताहे सीसेण संदिसहत्ति नणिए गुरुहिं पडिक्कमहत्ति नाणियव्वं. अह अइयारो पायछित्तं पुरिमड्ढाइ दिंति, तउ गुरुदिन्नपायछित्ता विहिणा निसीइत्ता समनावनाविया सम्ममुवउत्तो अणवत्थपसंगन्नीया पए पए संवेगमावज्जमाणा दंसमसगाइ अगणेमाणा पयंपएण सामाइयमाइयं पडिक्कमणसुत्तं कड्ढंति. जाव तस्स धम्मस्सत्ति पयं. तउ उध्धुठिया अप्नुट्ठिउमि आराहणाए इच्चाइं जाव वंदामि जिणे चउव्वीसंत्ति नणित्ता खामणानिमित्तं किइकम्मं करित्ता नणंति, इच्छामि खमासमणो उवट्ठिउमि अप्नंतरदेवसियं खामेउं जंकिंचियं अपत्तियं इत्यादि. पच्छा साहुदुगं खामंति, तउ आयरियस्स अछियावणनिमित्तं किइकम्मं करंति. आयरिअ उवज्झाए गाहा, एएणाभिसंबंधेण वंदणाणंतरं खमावणा. तउ सेसगावि जीवा खमावेयव्वा. तउ डुरालोइयं वा डुप्पडिक्कंतं वा हुज्जा, अणाभोगाइणा कारणेण तउ पुणोवि कयसामाइयसुत्तुच्चारणा चरि-

त्तविसोहणत्थमेव पंचासुस्सासपरिमाणं काउस्सग्गं करंति. तउ नमुक्कारेण पारित्ता विसुद्ध-चारित्तदेसयाणं दंसणविसुद्धिनिमित्तं नामुक्कित्तणं करंति. लोगस्सुज्जोयगरे इत्यादि. तउ दंसणविसुद्धिनिमित्तं पणवीसूसासमाणं काउस्सग्गं करंति. तउ नमुक्कारेण पारित्ता नाणविसुद्धिनिमित्तं सुअनाणथुइयं पढंति, पुक्खरवरदीवड्ढे इत्यादि. तउ सुअनाणविसुद्धिनिमित्तं पणवीसूसासमाणं काउसग्गं करंति, तउ नमुक्कारेण पारित्ता सिद्धथुइं पढंति, सिद्धाणं बुद्धाणमित्यादि. तउ विहिणा निसीइत्ता मुहपत्तियं पडिलेहित्ता आयरियाणं वंदणगं करंति, तं च काऊण पुणो उक्कुडुआ आयरियाभिमुहा विणयरइयंजलिपुडा चिट्ठंति. जाहे पुव्वं आयरिया थुइं पभणंति, पच्छा तेवि; अन्नहा अविणउ भवइ. ताउ य थुइउ एकस्सिलोगाइ वड्ढंति, आउ पयअक्खराइएहिं वासरेण वा वड्ढंतेण तिन्नि भणिऊण तउ पाउसियं करंति. एतदेवाह—" गिह्णियपउसकालमिति " गृहीत्वा प्रादोषिकं कालं प्रहरं यावत् स्वाध्यायं कालिकश्रुतपरावृत्तिरूपं करोति. प्रादोषिकः कालस्तथा तुलयितव्यो यथा कालसमाप्तौ पश्चिमायां रागाभिव्यंग्या संध्यापि समाप्यते. उक्तं च—कालो संझाय तहा दोवि समप्पंति

उप.चिं- जह समं वेवत्ति. कालस्याशुद्धौ उत्कालिकं श्रुतं परावर्त्तनीयमिति प्रतीतमेव. ॥ ४२ ॥ अथ
ता भा.४ स्वापविधिमाह—

१०६३ ॥ मूलम ॥—कालंमि पडिक्कंते । जइ सुयइ तउ गुरुहिं णुन्नाउ ॥ पडिलेहिय भुवसंथा—रयं च उच्चरिय सामाइयं ॥ ४३ ॥ व्याख्या—काले प्रादोषिके प्रतिक्रांते यदि स साधुः स्वपिति, तदा गुरुभिरनुज्ञातः प्रत्युपेक्ष्य भुवं संस्तारकं च उच्चार्य सामायिकं, यदीति ग्रहणाद् दृढसंहननो जितनिद्रश्च स्यात्, स सकलामपि रात्रिं जागृयादिति निवेदितं. स्वापविधिश्चायं—जइ रत्तिं आगया ताहे कालं न गिह्णंति, निज्जुत्तीउ संगहणीउ गुणंति, जइ पुण कालभूमी पडिलेहिया ताहे कालं गिह्णंति, जइ सुद्धो करंति सज्झायं, अह न सुद्धो न पडिलेहिया वा वसही, ताहे निज्जुत्तिउ गुणंति पढमपोरसिं काऊण बहुपडिपुन्नाए पोरसीए गुरुसगासं गंतूण भणंति “ इच्छामि खमासमणो जाव वंदामि ” खमासमणा बहुपडिपुन्नाए पोरिसी अणुजाणह राइसंथारयं, ताहे पढमं काइया भूमिं वच्चंति, ताहे जत्थ संथारगभूमी तत्थ वच्चंति. उवहिम्मि उवओगं करंता पमज्जंता उवहीए दोरयं उभो-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हंति संथारपट्टयं उत्तरपट्टयं च पडिलेहित्ता दोवि एगत्थलाएउ उरुम्मि ठावंति, संथारय-भूमिं पमज्जंति, संथारयं च अच्छरंति, उत्तरपट्टं तत्थ य लग्गा मुहपोत्तियाए उवरिल्लं कायं पमज्जंति, हिट्ठिल्लं रयहरणेणं कप्पे वामे पासे ठवंति, पुणो संथारए चमंता जणंति जिट्ठ-जाईणं पुरउ चिठंताणं अणुजाणह पुणो सामाइयं तिन्निवारे कड्डिऊण सोवई. कथं स्वपितीत्युच्यते, बाहूपधानेन वामपार्श्वेन कुक्कुटीपादप्रसारेण, यथा कुक्कुटी पूर्वमाकाशे पादौ प्रसारयति, एवं साधुनापि प्रथममाकाशे पादौ प्रसार्यौ, यदा एवं स्थातुं न शक्नोति, तदा भुवं प्रमृज्य पादौ स्थापयति, संकोचयंश्चोरुसंदंशके प्रमार्ज्य संकोचयति, शयानैश्च द्वौ हस्तौ परस्परमंतरे कार्यौ. यदाह—" दो हत्थे उ अबाहा नियमा साहुस्स साहुउ " रजोहरणं तु नोच्छीर्षके न वामतश्च मोक्तव्यं, किंतु दक्षिणत एव, यन्निशीथसूत्रं—जे भिक्खू तुयट्टं। रयहरणं सीसपट्टविज्झाहिं ॥ पुरउ व मग्गउ वा । वामे पासे निसन्नो वा ॥ १ ॥ सो आणा अणवत्थं । मिच्छत्तविराहणं तहा दुविहं ॥ पावइ जम्हा तेणं । दाहिणपासंमि तं कुज्जा ॥ ॥ २ ॥ अनेन रात्रौ स्वापविधिभणनेनोत्सर्गतः साधूनां दिवा स्वापो निषिद्धः, यदाह—' तु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अट्टणं कप्पए न दिवा ' अपवादतस्तु मार्गश्रमादिकारणैः सोऽपि कल्पते. ॥ ४३ ॥ एवं स्वापविधिमुक्त्वा अथ विधिशेषमाह—

॥ मूलम् ॥—जायंमि अड्ढरत्ते। गिन्हइ तो अड्ढरत्तियं कालं ॥ अइनिद्दावसएणं। न साहुणा कहवि जवियव्वं ॥ ४४ ॥ व्याख्या—स्पष्टा, न वरं उत्कृष्टो विधिरुक्तः, यदाह—कालचउक्कं उक्को—सएण जहन्नतियं तु बोधव्वं ॥ बीयपयंमि दुगंतं । मायामयविप्पमुक्केणत्ति ॥ १ ॥ ४४ ॥ अथ याममर्यादाविधिमाह—

॥ मूलम् ॥—सव्वे पढमे जामे। वसहा बीए तहा गुरु तईए ॥ जग्गंति चरमपहरे। सव्वे एसा हु गणमेरा ॥ ४५ ॥ व्याख्या—स्पष्टा, नवरं समर्था गीतार्थाश्च साधवो वृषभाः, एसत्ति एषः, हु अवधारणे गणस्य समुदायस्य मेरा मर्यादा, यत्र च समुदायो न स्यात्तत्र यथायोग्यं स्वापजागरौ कार्यौ, न चास्य विधेरवकाशः. ॥ ४५ ॥ एवमहोरात्रानुष्ठानमुक्त्वाथ नित्यचिंतामाह—

॥ मूलम् ॥—किं तव चरणं चिन्नं। किमहीयं किं कयं कवणकज्जं ॥ किं वा मे कय-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सेसं । चिंतइ रत्तिं दिवं एवं ॥ ४६ ॥ व्याख्या—सुबोधा, नवरं अनथा चिंतयाऽपवादमपि सेवमानः सालंबनत्वान्न विराधकः, यदार्षं—काहं अछित्तिं अदुवा अहिस्सं । तवोवहाणेसु य उज्जमिस्सं ॥ गणं च नीईं वहुस्सारविस्सं । सालंबसेवी समुवेइ मुक्खं ॥ १ ॥ ४६ ॥ इत्युक्तं सप्रपंचं साधूनां दिनकृत्यं, अथ फलं वक्तव्यं, तच्च द्विधा, जघन्यत उत्कृष्टतश्च. तत्र उत्कृष्टतोऽपि द्विधा, अकर्मणां सकर्मणां च. तत्र सापेक्ष्यं प्रथममुत्कृष्टफलमाह—

॥ मूलम् ॥—इय विहरंतो साहू । आरूढो खवगसेढिनिस्सेणिं ॥ धूअकम्मा तंमि भवे । लहेइ लोअग्गिमं ठाणं ॥४७॥ व्याख्या–अत्र क्षपकश्रेणिर्यथा जवति तथा दर्श्यते–इह क्षपकश्रेणिप्रतिपत्ता उत्तमसंहननोऽविरतप्रमत्ताप्रमत्तानामन्यतमो विशुद्धपरिणामो विज्ञेयः, तत्र पूर्वधरोऽप्रमत्तः शुक्लध्यानोपगतोऽप्येतां प्रतिपद्यते, शेषास्त्वविरतादयो धर्मध्यानिन एव, क्षपणक्रमश्चायं, तद्यथा—प्रथममंतर्मुहूर्त्तेनानंतानुबंधिनश्चतुरोऽपि क्रोधादीन् युगपत् क्षपयति, तदनंतनागं च मिथ्यात्वे प्रक्षिपति, ततो मिथ्यात्वं सहैव तदंशेन क्षपयति, यथा ह्यदारुणो दावानलोऽर्धदग्धेंधन एवैंधनांतरमासाद्योजयमपि निर्दहति, एवमसाव-

उप.चिं- ला भा.४ १०६७

पि तीव्रशुभपरिणामत्वात्सावशेषमन्यत्र प्रक्षिप्य क्षपयति, ततस्तथैव सम्यग्मिथ्यात्वं. इह च यदि बद्धायुः प्रतिपत्तानंतानुबंधिक्षये च विरमति, ततः पश्चात्कदाचिन्मिथ्यात्वोदये पुनरप्यनंतानुबंधिचतुष्टये बध्नाति. तस्यावंध्यतत्कारणत्वात्. क्षीणमिथ्यात्वस्तु तन्न बध्नाति, कारणाभावात्. तस्मिंश्चानंतानुबंधिचतुष्टये क्षीणेऽनष्टपरिणाम एव यदि म्रियते, तदा सुरलोकमेव व्रजति. एवं दर्शनसप्तकक्षयेऽपि कृते वाच्यं. नष्टपरिणामस्तु यदि म्रियते, तदा नानामतित्वान्नानागतिको भवति, उक्तं च—बद्धाऊ अपडिवन्नो । पढमकसायक्खए जइ मरिज्जा ॥ तो मिच्छत्तोदयउ । चिणिज्ज भुज्जो न खीणंमि ॥ १ ॥ तम्मि मओ जाइ दिवं । तप्परिणामो य सत्तए खीणे ॥ उवरयपरिणामो पुण । पच्छा नाणामइगइओ ॥ २ ॥ यदि च बद्धायुरिमां श्रेणिमारभते, तदा दर्शनसप्तकं क्षपयित्वा नियमाद्विरमति, ततो यत्रायुर्बद्धं तत्रोत्पद्यते, यः पुनरबद्धायुः स निःशेषमपि एतां श्रेणिं समापयत्येव. उक्तं च—बद्धाऊ पडिवन्नो । नियमा खीणंमि सत्तए ठाइ ॥ इयरो अणुवरओ च्चिय । सयलं सेढिं समाणेइ ॥ १ ॥ तस्य चायं क्रमः—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्यक्त्वस्य क्षपितशेषे स्वल्पेऽवतिष्ठमान एव अप्रत्याख्यानप्रत्याख्यनावरणकषाया- ष्टकं सममेव क्षपयितुमारजते, एतैश्चार्द्धक्षपितैरेवान्याः षोडशकर्मप्रकृतीः क्षपयति, तद्य- था—नरकतिर्यगानुपूर्व्यौ नरकगतितिर्यग्गती एकद्वित्रि चतुरिंद्रियरूपाश्चतस्रो जातयः आ- तपोद्योतस्थावरसाधारणसूक्ष्माणि निद्रानिद्राप्रचलाप्रचलास्त्यानर्द्धिरूपास्तिस्रो निद्राश्चेति १६. एतत्क्षपणोत्तरकालं कषायाष्टस्य यच्छेषं तत्क्षपयति. ततो नपुंसकवेदं, ततः स्त्रीवेदं, ततो हास्यादिषट्कं, ततः पुरुषवेदं खंडत्रयं च कृत्वा खंडद्वयं युगपत्क्षपयति, तृतीयं खंडं तु संज्वलनक्रोधे प्रक्षिपति, पुरुषे प्रतिपत्तरि अयं क्रमो बोधव्यो, नपुंसकादौ तु प्रतिपत्तरि उदितवेदस्य पश्चात्क्षपणं, अनुदितवेदद्वयस्य तु मध्येऽधमवेदस्य प्रथममितरस्य तु तदनंतरं क्षयो वाच्यः, ततः क्रोधादींश्चतुरः संज्वलनान् प्रत्येकमंतर्मुहूर्त्तकालेन क्षपयति, क्षपणं चै- षां खंडत्रयादिक्रमेण पुरुषवेदवाच्यं. यदाह—सव्वत्थ सावसेसे मग्गिल्ले लगइ पुरिल्लेति क्रोधसत्कं च तृतीयखंडं माने प्रक्षिपति, मानसत्कं मायायां, मायासत्कं च लोभे, क्षपण- कालश्च प्रत्येकं सर्वत्रांतर्मुहूर्त्तमानोऽवगंतव्यः, लोभतृतीयखंडं तु संख्येयानि खंडानि कृत्वा

For Private and Personal Use Only

पृथक् पृथक् कालभेदेन क्षपयति, एषामपि संख्याततमं चरमखंडमसंख्येयानि खंडानि करोति. तान्यपि समये समये एकैकं क्षपयन्नंतर्मुहूर्त्तेन सर्वाण्यपि क्षपयति. इह च दर्शनसप्तके क्षीणे निवृत्तिबादर उच्यते, न पुनस्तत्र किंचित्क्षपयति, तत ऊर्ध्वं त्वनिवृत्तिबादरो यावत्संख्याततमं लोभखंडं, तत ऊर्ध्वमसंख्येयानि तत्खंडानि क्षपयन् सूक्ष्मसंपरायोऽभिधीयते, यावच्चरमलोभांशक्षयः; तत ऊर्ध्वं क्षीणमोहो भवति, सर्वापि चेयं श्रेणिर्महतांतर्मुहूर्त्तेन समर्थ्यते. स्थापना यथा—

ततः क्षीणमोहछद्मस्थः कालस्यांतर्मुहूर्त्तमानस्य योऽसौ द्विचरमसमयस्तत्र निद्रां प्रचलां क्षपयति, चरमसमये तु पंचविधं ज्ञानावरणं चक्षुरचक्षुरवधिकेवलदर्शनावरणचतुष्टयं पंचविधमंतरायं च क्षपयित्वा सकलमूर्त्तामूर्त्तद्रव्यपर्यायप्रकाशकं केवलज्ञानमाप्नोति, ततश्च जघन्यतोन्तर्मुहूर्त्तमुत्कृष्टतो देशोनां पूर्वकोटीं विहृत्य मुक्तिं यियासुरसौ प्रथममत्र र्जीकरणं गच्छति. आवर्ज्यतेऽभिमुखीक्रियते मोक्षोऽनेनेत्यावर्ज्यः, शुभमनोवाक्कायव्यापारविशेषः. " एतस्य तस्य करणं " इति च्विप्रत्यये आवर्जीकरणं, अन्ये त्विदं " आउस्सियकरणं "

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्याहुः. ततश्च यदि स नगवान् स्वमायुर्वेदनीयादिकर्मनिः सह प्रदेशतः स्थितितश्च समं वेत्ति, तदा आवर्जीकरणानंतरमेव योगनिरोधमारनते. यदि पुनरायुषो वेदनीयाद्यं कर्माधिकं पश्यति, तदा तत्समीकरणाय समुद्घातं करोति. तस्य चायं क्रमः—प्रथमसमये स्वदेहविष्कंनबाहल्यमायामतस्तूर्ध्वाधोलोकांतगामिनं जीवप्रदेशान् देहान् निर्वास्य केवलज्ञानानोगतो ध्यानबलेन दंडं करोति, द्वितीयसमये तु तमेव दंडं पूर्वापरदिग्द्वये वितत्य तिर्यग्लोकांतगामि कपाटमिव कपाटं करोति. तृतीयसमये तु तमेव कपाटं दक्षिणोत्तरदिग्द्वयप्रसारणात्तिर्यग्लोकांतगामिनमेव मंथानमिव मंथानं करोति. एवं च लोकस्य प्रायो बहुपूरितं नवति, मंथांतराणि त्वपूरितानि जीवप्रदेशानां विश्रेणिगमनानावादिति. चतुर्थसमये तान्यपि सह लोकनिष्कुटैः पूरयति, तथा च सर्वोऽपि लोकः पूरितो नवति. एवं पूरणक्रमेण चतुर्निः समयैर्मथांतरमंथकपाटदंडानपि संहृत्य देहस्थ एव नवति. समुद्घाते च मनोवाग्योगौ न व्यापारयति प्रयोजनानावात्, काययोगं पुनरौदारिकौदारिकमिश्रकार्मणरूपं युनक्ति. न शेषं. उक्तं च—यस्य पुनः केवलिनः। कर्म नवत्यायुषोऽतिरिक्ततरं ॥

For Private and Personal Use Only

समुद्घातं भगवा-नथ गच्छति तत्समीकर्तुं ॥ १ ॥ दंडं प्रथमे समये । कपाटमथ चोत्तरे त-
था समये ॥ मंथानमथ तृतीये । लोकव्यापी चतुर्थे तु ॥ २ ॥ संहरति पंचमे त्वं-तराणि
मंथानमथ पुनः षष्ठे ॥ सप्तमके तु कपाटं । संहरति ततोऽष्टमे दंडं ॥ ३ ॥ औदारिकप्रयो-
क्ता । प्रथमाष्टमसमययोरसाविष्टः ॥ मिश्रौदारिकयोक्ता । सप्तमषष्ठद्वितीयेषु ॥ ४ ॥ कार्मण-
शरीरयोगी । चतुर्थके पंचमे तृतीये च ॥ समयत्रयेऽपि तस्मिन् । भवत्यनाहारको नियमात्
॥ ५ ॥ एवमष्टसामयिकं समुद्घातं कृत्वा निवृत्तः सन् योगत्रयमपि युनक्ति, यतः स भग-
वानद्याप्यंतर्मुहूर्त्तभाविमोक्षः, ततस्तस्मिन् काले यद्यनुत्तरसुरादिना मनसा पृच्छ्यते, तर्हि
तद्व्याकरणाय मनःपुद्गलान् गृहीत्वा मनोयोगं युनक्ति. एवं मनुष्यादिना पृष्टो वाग्योगमपि,
काययोगं पुनर्युंजानः स आगच्छेद्गच्छेत्तिष्ठेन्निषीदेत्, प्रातिहारिकं पीठफलकाद्यं प्रत्यर्पयेत्.
तदेवमंतर्मुहूर्तं यथायोगं योगत्रयमपि व्यापार्य, ततो लेश्यातीतं परमनिर्जराहेतुध्यानं प्र-
तिपत्सुरवश्यं योगनिरोधाय उपक्रमते, योगे सति यथोक्तध्यानस्यासंभवात्. योगनिरोधं च
कुर्वन् प्रथमं पर्याप्तसंज्ञिपंचेंद्रियस्य प्रथमसमये यावान् मनोद्रव्यव्यापारस्तस्मादसंख्येयगु-

णहीनं मनोयोगं प्रतिसमयं रुंधानोऽसंख्यैः समयैस्तमपि सामस्त्येन रुणद्धि. ततो द्वींद्रियस्य पर्याप्तस्य जघन्ययोगिनः सत्काद्वाग्योगादसंख्यगुणहीनं वाग्योगं समये समये रुंधानोऽसंख्यैः समयैस्तमपि साकल्येन रुणद्धि. ततः सूक्ष्मस्य पनकजीवस्य प्रथमसमयोत्पन्नस्य यः काययोगः, तस्मादसंख्यगुणहीनं काययोगं समये समये रुंधन्नसंख्यैः समयैस्तमपि सर्वं रुणद्धि. तदा च सूक्ष्मक्रियमप्रतिपातिध्यानमारोहति, तत्सामर्थ्याच्च वदनोदरादिविवरपूरणेन संकुचितदेहत्रिभागवर्तिप्रदेशो भवति. एवमयोगताभिमुखो भूत्वा नातिद्रुतं नातिलंबितं ह्रस्वपंचाक्षरोच्चिरणमात्रेण कालेन विशिष्टां चांतर्मुहूर्तिकीं सर्वसंवररूपां शैलेशीं प्रतिपद्यते, तदानीं च व्यवच्छिन्नक्रियमप्रतिपातिध्यानं ध्यायति. तस्यां शैलेश्यवस्थायां वर्त्तमानः प्रतिसमयमसंख्येयान् कर्मस्कंधान् विपाकतः प्रदेशतो वा वेदनेन क्षपयन् चरमसमये वेदनीयमायुर्नामगोत्रमित्येताश्चतुरः कर्मांशान् क्षपयित्वा ततोऽनंतरसमये औदारिकतैजसकार्मणशरीराणि सर्वथा त्यक्त्वा तस्मिन्नेव समये कोशबंधविमुक्तैरंडफलमिव स भगवान् कर्मबंधविमुक्तोऽविग्रहगत्या समयांतरप्रदेशांतरास्पर्शनेन ऋजुश्रेणिं प्रपन्नः साकारोपयुक्त ऊर्ध्वलोकांतमु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पैति. न हि लोकाग्रप्राप्तिमात्रेणैव सर्वज्ञविरतेः सम्यक् फलं मन्यंते, संततसुखानुभवार्थमेव तेषां प्रवृत्तेरित्याह–

॥ मूलम् ॥—जम्मजरमरणआयव—भयवाहिविवज्जिओ ठिओ तत्थ ॥ सोऽणंतनाणदंसण—विरओ सुहमणुवहइ निच्चं ॥ ४७ ॥ व्याख्या—स साधुस्तत्र लोकाग्रे स्थितः सन् नित्यं सर्वकालं सुखं परमाह्लादलक्षणं अनुभवति स्वयं वेदयति. कुतस्तत्र शाश्वतसुखानुभव इति विशेषणद्वारेण हेतुमाह—जम्मेत्यादि, जन्म नूतनदेहप्राप्तिः, जरा वयोहानिः, मरणं प्राणत्यागः, आपदो वधबंधरोधाद्याः, भयं इहलोकादि, व्याधयो रोगास्तैर्विवर्जितः. ननु जन्माद्यभावे उपलसकलकल्पोऽयं भविष्यतीत्याह—अनंतानि स्वावारककर्मक्षयादप्रतिपातीनि ज्ञानदर्शनवीर्याणि यस्य सोऽनंतज्ञानदर्शनवीर्यः. ततो जन्मादिदुःखरहितत्वादनंतज्ञानादिमयत्वाच्च स सिद्धिपदं प्राप्तः केवलजीवस्वभावजं परमानंदनिःस्पंदरूपं संसारीभिर्जीवैः स्वप्नेऽप्यननुभूतं शाश्वतं सुखं भुंक्ते इत्यर्थः. तदेवमुक्तमकर्मापेक्षमुत्कृष्टफलं ॥ ४७ ॥ अथ सकर्मापेक्षं तदाह—

For Private and Personal Use Only

॥ मूलम् ॥—छठेणं मुणी जं खिवइ । कम्मणा तितिएण सेसेण॥ होइ लवसत्तमो वा । जहन्नउं जाइ सोहम्मे ॥ ४ए॥ व्याख्या—वा इत्युक्तष्टफलस्यैव पक्षांतरसूचनार्थः, षष्टेनोपवासद्वयेन मुनिर्निर्ग्रंथो यत्कर्म क्षिपति निर्जरयति, तावन्मात्रेण कर्मणा शेषेणायुषः समाप्तत्वादनिर्जीर्णेन स साधुर्लवसप्तमसुरो जवति. पूर्वजवे सिद्धिगमनयोग्यविशुद्धाध्यवसायवानपि सप्तयवमुष्टिलवनमात्रेण कालेन न्यूनायुष्कतया सिद्ध्यगमनाद्योऽनुत्तरविमानेषूत्पद्यते, स देवः समयजाषया लवसप्तम उच्यते. तथा च श्रीविवाहप्रज्ञप्तिः—

अत्थि णं जंते लवसत्तमा देवा हंता अत्थि, से केणठेणं जंते एवं वुच्चइ लवसत्तमा देवा? गोयमा! से जहानामए केइ पुरिसे तरुणे जावनिउणसिप्पोवगए सालीण वा, वीहीण वा, जाव जवाण वा, पक्काणं परियायाणं हरियाणं तिरकेणं नवपज्जएणं असिपएणं पमिसाहरिय साहरिय जावइणामेव त्तिकट्टु सत्तलवे लविज्जाजोइणं गोयमा! तेसिंणं देवाणं एवइयं कालं आउअं पहुप्पंते तेणं ते देवा तेणं एव जवगहणेणं सिज्झंता जाव अंतं करंता, से तेणठेणं गोयमा! एवं वुच्चइ लवसत्तमा देवा. अणुत्तरोववाइआणं जंते देवा केवइएणं क-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

म्मावसेसेणं अणुत्तरोववाइअ देवत्ताए उववन्ना. गोयमा! जावइयं छठ्ठभत्तिए समणे नि-
ग्गंथे कम्मं निज्जरेइ, एवइएणं कम्मावसेसेणं अणुत्तरोववाइयदेवत्ताए उववन्ना. तदेवमुक्त्व-
ष्टतोऽकर्मणः सकर्मणश्च चारित्रफलमुक्त्वाथ जघन्यतस्तदाह—" जहन्नउ " इत्यादि. ज-
घन्यतः साधुस्तादृग्मनःसंहननादिबलहीनोऽपि यथाशक्ति पूर्वोक्तक्रियानिरतः सौधर्मं क-
ल्पं याति. यदाह—अविराहियसामन्नस्स । साहुणो सावगस्स य जहन्नो ॥ सोहम्मे उव-
वाउ । भणिउ तिल्लुक्कदंसीहिं ॥ १ ॥ तदेवमुक्तं फलद्वारं, तद्भणने च समर्थिता सर्वापि
सर्वविरतिवक्तव्यता. तत्तत्संपदकंपसद्मपरमज्योतिःसमुन्मीलन–ध्वस्ताज्ञानतमोभरः सुरनर-
श्रेणीभिरभ्यर्चितः ॥ कल्याणप्रभवः प्रभावभवनं धार्यः सुधीभिर्मनो–मंजूषासु सुखं तनोतु
कृतिनां चारित्रचिंतामणिः ॥ १ ॥ क्रोधः स्फूर्जद्विरोधो निकृतिरुपचिता सावधानोऽभिमानो
। लोभः क्षोभस्य मूलं रतिररतिकरी दुर्व्यपोहश्च मोहः ॥ जातोन्मादः प्रमादः कुसुमशरशरा
दुर्निवारा जगत्यां । तावद्यावन्महौजा भजति रणभुवं नैष चारित्रयोधः ॥ २ ॥ इति श्रीअं-
चलगच्छाधिराजश्रीमहेन्द्रप्रभसूरिशिष्यश्रीजयशेखरसूरिविरचितायां स्वोपज्ञोपदेशचिंतामणि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

टीकायां चतुर्थः सर्वविरत्यधिकारः समाप्तः ॥

अथाशेषं पूर्वोक्तमर्थमुपसंहरन्नाह—

॥ मूलम् ॥—इह दुल्लहसामग्गी-पूव्वा विरई मए दुहाऽभिहिया ॥ जं आयणिय भ-विया । नणु जिणधम्मे पयट्टंति ॥ ५० ॥ व्याख्या—इत्युक्तप्रकारेण दुर्लभसामग्रीपूर्वा मया देशतः सर्वतश्चेति द्विधा विरतिरभिहिता. तत्र द्वितीयेऽधिकारे सामग्रीदुर्लभता, तृतीये देशविरतिः, चतुर्थे सर्वविरतिश्च, यां विरतिमाकर्ण्य भव्या आसन्नसिद्धिका ननु निश्चितं जिनधर्मे प्रथमाधिकारव्याख्याते प्रवर्तंते, ज्ञानश्रद्धानाचरणैरुद्यच्छंति, तेन चतुर्णामप्यधिकाराणां परामर्शः कृतः. ॥ ५० ॥ इदानीं जिनधर्मप्रवृत्तानां विशेषस्थैर्यापादनार्थमाह—

॥ मूलम् ॥—अप्पत्थियं सुहं एइ । जाइ अनिसेहियं दुहं तेसिं ॥ जेसिं जिणोवइहेसु । होइ अत्थेसु अणुराउ ॥ ५१ ॥ व्याख्या—उत्तानार्था, नन्वेवं सकलसुखानां सुलभेऽप्युपाये किमयापि विश्वव्यापि संतापमनुभवंति जंतव इत्याह—

॥ मूलम् ॥—जे संसारपरित्ता । गुरुसु भत्ता गुणेसु आउत्ता ॥ तेसिं चिय जिणवुत्तं ।

तत्तं परिणमइ चित्तंमि ॥ ५२ ॥ व्याख्या—ये जीवा एवंविधा भवंति, कीदृशा इत्याह—परीत्तः तथा भव्यत्वपरिपाकवशात्स्वल्पीभूतः संसारो येषां ते परीत्तसंसाराः, क्तांतस्य परतो निपातः प्राकृतत्वात्. तथा गुरुषु धर्मोपदेष्टृषु भक्ता विनीताः, तथा गुणेषु क्षांतिमार्दवार्जवादिषु आयुक्ता आदृताः, तेषामेव चित्ते जिनोक्तं तत्वं उपदेशरहस्यं परिणमति स्थिरीभवति. ॥ ५२ ॥ अथ व्यतिरेकमाह—

॥ मूलम् ॥—जे उण चरणे अलसा । कम्मवसा पवयणे अपत्तरसा ॥ तेसिं ऊसरवुठिव्व । निप्फला होइ जिणवाणी ॥ ५३ ॥ व्याख्या—जिनानां भगवतां वाणी तेषु श्रोतृषु ऊषरक्षेत्रेषु वृष्टिरिव निःफला भवति. तेषु केष्वित्याह—" जे उणेत्यादि " पुनः शब्दः पूर्वेभ्यो व्यतिरेकज्ञापनार्थः. ये चरणे साधुश्राद्धक्रियायामलसाः प्रमादिनः, तथा कर्मणां प्रस्तावादशुभानां मिथ्यात्वाज्ञानादीनां वशा आयत्ताः, अत एव प्रवचने द्वादशांगीरूपे पीयूषरसप्रायेऽपि अप्राप्तरसा अलब्धस्वादाः, यो हि यत्रालब्धस्वादः स स्वाद्वन्यपि तत्र वस्तुनि न रज्यते, इति प्रतीतमेव. ॥ ५४ ॥ यत एवं ततः—

॥ मूलम् ॥—निच्चमिमे उवएसा । सुपुरिसपरिस्साइ च्चिअ धरणिज्जा ॥ मा निवडंतु कुपत्ते ॥ कयावि दुद्धंव सोवीरे ॥ ५५ ॥ व्याख्या—इमे प्रागुक्ता उपदेशा विनयविवेकवैराग्यादिगुणग्रामाभिरामतया सुष्टु शोभनाः पुरुषाः सुपुरुषाः, तेषां परिषद् घटा तस्या एव धरणीयाः संग्रहणोचिताः. मा कदापि सौवीरे दुग्धमिव कुपात्रे तिंतिणिकत्वादिदोषदुष्टे निपतंतु. यथा हि स्निग्धमधुरमपि दुग्धं सौवीरे कांजिके पतितमात्रमेव स्निग्धत्वमधुरत्वादिस्वस्वरूपापाद्भ्रश्यति, दधिघृताद्युत्तरकरणस्य चायोग्यीभवति, तथा सरसा अपि गुरूपदेशाः कुपात्रे निपतितमात्रा एवास्मरणादिना विनश्यंति. सम्यक्त्वदेशविरत्यादिस्वकार्यस्यायोग्यीभवंति. यदाह—आमे घडे निहित्तं । जहा जलं तं घडं विणासेइ ॥ इय सिद्धंतरहस्सं । अप्पाहारं विणासेइ ॥ १ ॥ ततोऽमी सुपुरुषपरिषदैव धार्याः, यथा न लभंते कदाचिदपि दुर्जनसंकटमिति गाथार्थः. ॥ ५५ ॥ अथ सहृदयहृदयं प्राप्तानामेषां फलातिशयमभिलष्यन्निदमाह—

॥ मूलम् ॥–एसा उवएसाली । सालीव विबुहहिययठाणेसु ॥ सुहभावसलिलसित्ता ।

फलेउ मणवंछियफलेण ॥ ५६ ॥ व्याख्या—एषा प्राग्निर्दिष्टा उपदेशाली उपदेशश्रेणिरुज्ज्वलत्वान्मंगल्यत्वाच्च शालिरिव विबुधानां विदुषां हृदयान्येव सुसंवृतत्वाद्विस्तारहेतुत्वाच्च स्थानानि केदारजूमयस्तेषु निहिता, ततः शुभो जावो मनःपरिणामः, स एव निर्मलत्वात् सलिलं तेन सिक्ता सती मनोवांछितफलेन ऐहिकपारत्रिकसुखप्राप्तिलक्षणेन फलतु. शालिर्हि केदारेषूप्तो जलेन सिक्तः कर्षुकमनोवांछितेन फलेन फलतीत्युपमार्थः सुबोधः. ॥५६॥ अथ प्रकरणकारो जंग्यंतरेण निजाजिधानमजिदधानः स्वस्य गुंफश्रमस्याफलतादोषं परिहरन्नाह—

॥ मूलम् ॥—कुंजरनयरविसेसा—हवसरसपसूणवरिसमज्झाए ॥ सरिसक्खरनामेणं । रइयमियं सपरबोहट्ठा ॥ ५७ ॥ व्याख्या—कुंजर नयर विसेस आहव सरस पसूण वरिस इत्येते शब्दाः प्राकृतरूपा एव समश्रेण्या उत्तराधर्येण संस्थाप्यंते, ततश्च एषां ये मध्यवर्णा जवंति, तत्सदृशाक्षरं प्राकृतजाषया नाम यस्य, तेन रचितं गुंफितमिदं प्रकरणं, किमर्थं? स्वपरबोधार्थं, स्व आत्मा, परे स्वव्यतिरिक्ताः साधुश्रावकास्तेषां बोधः स्वस्वाचारकौशलं, तदर्थं. ॥ ५७ ॥ अथास्य सुवर्णार्थसंबंधबंधुरस्य निरस्तसमस्तदौर्गत्यक्लेशस्य परमनिधानदे-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यस्य उपदेशचिंतामणिप्रकरणस्यायतौ स्थिरावस्थायित्वमाशंसुरिदमाह–

॥ मूलम् ॥–जाव सिरिवीरतित्थं । ताव इमा पंक्तियाण हियमंमि ॥ तह रयणा रयणावलि–सरिसा सिरिसाहणी होउ ॥ ५८ ॥ व्याख्या–यावदिह श्रीवीरस्य वर्धमानस्वामिनः श्रेयःश्रेणिविश्राणनसमर्थं तीर्थं शासनं विजयते, तावदियं मम रचना धर्माधिकारक्रमोपन्यासरूपा पंक्तितानां धीमतां हृदयेंतःकरणे स्थिता सती श्रियो वांछिताः संपदः साध्यंतेऽनयेति श्रीसाधनी संपत्संपादयित्री जवतु. कथंभूता रचना? सुसंहतत्वेन सद्गुणत्वेन निर्मलत्वेन च रत्नावलीसदृशी. रत्नावली हि हृदये वक्षसि धृता श्रियं सौनाग्यशोजां साधयतीति. ॥ ५८ ॥

अथ ग्रंथकारप्रशस्तिः—वंशे वीरविनोरभूदिति वहन् वीरत्वमत्यूर्जितं । मिथ्यात्वादिविपक्षवारणविधौ धर्मोद्यमे चोत्तमे ॥ जातः पूर्वमिहार्यरक्षितगुरुश्चक्रेश्वरीदेवतां । साक्षात्कृत्य तपोनिरंचलगणं विस्तारयन् भूतले ॥ १ ॥ मौलिं धुनातिस्म विलोक्य यस्य । निःसंगतां विस्मितचित्तवृत्तिः ॥ श्रीसिद्धराजः स्वसमाजमध्ये । सोऽभूत्ततः श्रीजयसिंहसूरिः ॥ २ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्पट्टपंकेरुहराजहंसः । सदा सदाचारकृतप्रशंसः ॥ गुरुर्निरस्तान्यमतप्रघोषः । श्रीधर्मघोषः स्वगणं पुपोष ॥ ३ ॥ येनाज्ञानतमोघ्नवाक्यकिरणैर्दूरागतश्रावक-स्वांतांभोरुहतश्चतुर्भिरधिकाशीतिः सुबद्धा अपि ॥ रोलंबा इव दूरिताः प्रथमकालोकेऽप्यहो संशयाः । श्रीमानेष महेंद्रसिंहसुगुरुर्ब्रेजे ततो भानुवत् ॥ ४ ॥ सिंहप्रभो गुरुरथ प्रथितस्ततोऽपि । रेजे जगत्यजितसिंहगुरुर्गुणाब्धिः ॥ पापद्विपक्षपणसिंहसमानशक्ति-र्देवेन्द्रसिंहगुरुरभ्युदयाय तस्मात् ॥ ५ ॥ भावारिनिष्कृपतपःकरवालशाली । धर्मप्रभः सुगुरुराज इतो रराज ॥ पीयूषबिंदुसदृशाक्षरवाग्विलासः । श्रीसूरिसिंहतिलकश्च ततः प्रतीतः ॥ ६ ॥ तत्पट्टनंदनवन-कल्पद्रुमसमश्रियः ॥ जयंति सांप्रतं श्रीम-न्महेन्द्रप्रभसूरयः ॥ ७ ॥ यत्पाणिमाहुः कृतिनः श्रियश्च । गिरश्च मैत्री घटनैकतीर्थं ॥ संपर्कतस्तस्य जनो विनीतः । श्रीमांश्च धीमांश्च किमन्यथा स्यात् ॥ ८ ॥ येषां कीर्तिभरे भरेण धवलीकर्तुं जगत्प्रोद्यते । नाभूत्कोऽपि स यो ददाति तमसस्त्रस्तस्य शश्वत्पदं ॥ भग्नाशस्य च तस्य निर्जितचरैर्दुर्वादिवृंदैः स्फुरत्-कारुण्यैरिव वासभूमिरचला स्वीये सुखेऽदीयत ॥ ९ ॥ तेषां शिष्याः श्रीम-न्मुनिशेखरसूरयो नयोपेताः ॥

For Private and Personal Use Only

श्रीजयशेखरसूरिः । श्रीसूरिर्मेरुतुंगश्च ॥ १० ॥ एतेषु शिष्यः खलु मध्यमोऽहं । मोहं कुबोधप्रभवं विहाय ॥ गुरूपदेशादुपदेशचिंता-मणिश्रुतं सूत्रतया व्यगुंफं ॥ ११ ॥ व्यधां च तस्य स्वयमव्यलीकां । टीकां कथासारविचारहृद्यां ॥ दंतायुधांभोनिधिचंद्रसंख्ये (१४३६) । वर्षे पुरे श्रीनृसमुद्रनाम्नि ॥ १२ ॥ अनुजश्च सतीर्थ्यश्चा-स्माकं टीकामिमां मुदा ॥ लिलेख प्रथमादर्शे । मानतुंगगणिर्गुणी ॥ १३ ॥ प्रत्यक्षरं निरूप्यास्यां । ग्रंथमानं विनिश्चितं ॥ सहस्त्रा द्वादश श्लोका-श्चतुःषष्ट्यधिका इति ॥ १४ ॥ कालोऽसौ कलिरुत्कटः किल पटुप्रज्ञोज्झितोऽयं जनः । श्रेयःकार्यमत्रार्यविघ्नविवशं विद्वत्सभा दुर्लभा ॥ एवं सत्यपि सिद्ध्यतिस्म यदयं गुंफप्रयासो मम । श्रीमद्देवगुरुप्रसादमहिमा मन्ये तदत्यद्भुतः ॥ १५ ॥ वक्तुः कोऽपि विशेष एष महिमा जैनागमस्योक्तयः । श्रूयंते बहुशः श्रुता अपि जनैरुत्कैरपूर्वा इव ॥ गोधूमाः खलु ते तदेव च घृतं सैवेह खंडावली । संस्कर्तुः कलयाश्चतोऽभिनवतां किंत्वत्र धत्ते रसः ॥ १६ ॥ अपार्थमुत्सूत्रमपप्रयोगं । मया यदासूत्रितमत्र किंचित् ॥ परोपकारैकरसैरखिलै-स्तच्छोध्यमेवाशु बुधैः प्रसद्य ॥ १७ ॥ उन्मीलन्नीलचूलः प्रवरजरलुनत्कंठिकः स्वर्णकांति-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नानारत्नोपमानोरुगुणकटिगुणः प्रोल्लसत्कंदरास्यः ॥ यावन्मेरुः कुमारो वसति वसुमतीमातुरंके सलीलं । तावद्वृत्तिः शुभेयं जगति विजयतां वाच्यमाना मुनींद्रैः ॥ १० ॥ इति श्रीमदंचलगच्छाधीश्वरमहाकविश्रीजयशेखरसूरिभिरचितायां श्रीमदुपदेशचिंतामणिटीकायां चतुर्थो भागः समाप्तः ॥ तत्समाप्तौ च समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

आ महान् ग्रंथ छापी प्रसिद्ध करवामाटे तेनी लखेली प्रति आदिक मेळवी आपवामां वर्तमानकाळे विचरता, तथा श्रीमदंचलगच्छनो उद्योत करनारा त्यागी वैराग्यवान् महासंवेगी मुनिमहाराज श्रीगौतमसागरजी महाराज तथा तेमना प्रशिष्य श्रीधर्मसागरजी महाराजे घणी सहाय आपेली छे, अने तेथी तेमनी सहायथी स्वपरना श्रेयमाटे आ ग्रंथ श्रीजामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे पोताना श्री जैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे. ॥ श्रीरस्तु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीउपदेशचिंतामणिः समाप्ता ॥

For Private and Personal Use Only